[illegible]

[illegible]

[illegible]

Library IIAS, Shimla
S 181.42 Sa 84 V
00006975

May 1933.

THE

# CHOWKHAMBÂ SANSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS

NO. 425.

INDIAN INSTITUTE OF ADVA[NCED STUDY]
Acc. No. 6975
Date 29.10.
SIMLA

श्रीसत्यज्ञानानन्दतीर्थकृतः

# वेदप्रकाशः ।

श्रीकाशीहिन्दूविश्वविद्यालयप्रधानमीमांसाध्यापकानां

पं० अ. चिन्नस्वामिशास्त्रिणामादेशानुसारं

तच्छिष्येण श्रीगोयनकासंस्कृतमहाविद्यालयमीमांसाध्यापकेन

पं० श्रीपट्टाभिरामशास्त्रिणा मीमांसाशास्त्रिणा

टिप्पण्यादिभिरलङ्कृत्य संशोधितः ।

THE

# VEDA PRAKĀS'A

By

SRI SATYAJÑĀNĀNANDA TIRTHA

*Edited by*

MIMAMSAS'ASTRĪ

PANDIT PATTĀBHIRĀMA S'ĀSTRĪ

*PUBLISHED & SOLD BY THE SECRETARY,*
CHOWKHAMBA SANSKRIT SERIES OFFICE.
*Benares City.*

1934.

श्रीः

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबक ४२५

*Printed by Jai Krishna Das Gupta*
*at the Vidya Vilas Press, Benares.*

S
1842
Sa84V

THE

# CHOWKHAMBA SANSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

## NO. 425.

The

# VEDA PRAKAS'A

By

S'RĪ SATYAJÑĀNĀNANDA TĪRTHA

*Edited with Notes, Introduction, and Index etc.,*

By

MĪMĀṂSĀ S'ĀSTRĪ

*Pandit Paṭṭābhirāma S'āstrī*

Professor. Goenka Sanskrit Maha Vidyalaya,
Benares.

*BENARES.*

JAI KRISHNADAS-HARIDÂS GUPTA,

*The Chowkhamba Sanskrit Series Office.*

1934.

श्रीः

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २ ॥

स्तबकः ४२५

[ *Registered According to Act XXV of 1867,*
*All Rights Reserved by the Publisher.* ]

Printed by, Jai Krishna Das Gupta
Vidya Vilas Press, Benares City.

1934.

→ चौखम्बा–संस्कृत–ग्रन्थमाला: ←

( ग्रन्थ-संख्या ७७ )

नं० ४२५.

श्रीसत्यज्ञानानन्दतीर्थकृतः

# वेदप्रकाशः ॥

श्रीकाशीहिन्दूविश्वविद्यालयप्रधानमीमांसाध्यापकानां

पं० अ० चिन्नस्वामिशास्त्रिणामादेशानुसारं

तच्छिष्येण

श्रीगोयनकासंस्कृतमहाविद्यालयमीमांसाध्यापकेन

पं० पट्टाभिरामशास्त्रिणा मीमांसाशास्त्रिणा

टिप्पण्यादिभिस्समलङ्कृत्य संशोधितः ।

प्रकाशकः—

जयकृष्णदास-हरिदासगुप्तः—

चौखम्बा-संस्कृत-सीरिज़ आफिस,

बनारस सिटी ।

१९३१.

राजकीयनियमानुसारेणाऽस्य सर्वेऽधिकाराः प्रकाशकेन स्वायत्तीकृताः ।

इस कार्यालय द्वारा "चौखम्बासंस्कृतसीरिज" के अलावा और भी ३ सीरिज यथा "काशीसंस्कृतसीरिज" "बनारससंस्कृतसीरिज" "हरिदाससंस्कृतसीरिज" ग्रन्थमालायें निकलती हैं तथा इन ४ सीरिजों के पश्चात् और भी विविध शास्त्र की पुस्तकें प्रकाशित की गई हैं तथा अन्य सब स्थानों के छपे हुए संस्कृत तथा भाषा-भाष्य के ग्रन्थ विक्रयार्थ प्रस्तुत रहते हैं, सूचीपत्र पृथक् मंगवाकर देखें।

प्राप्तिस्थानम्

जयकृष्णदास हरिदास गुप्तः—

चौखम्बा संस्कृत सीरिज़ आफिस, बनारस सिटी।

# उपोद्घात ः॥

नैतत्तिरोहितं भारतवर्षीयाणां समेषामपि विद्वन्मणीनां यत्—सर्वपुरुषार्थरत्नाकरः परमप्रबोधसाधनभूतो धर्म एव केवलमस्माकं शरणमिति । स चाऽयं धर्मो वेदाम्नायाद्यपरनामधेयश्रुत्यैकसमधिगम्य इत्यपि सर्वस्वसंवेद्यम् । तस्य च वेदस्य भ्रमप्रमादादिदोषदूषितस्वान्तैरर्वाग्दृष्टिभिर्न याथातथ्येनाऽर्थोऽवगन्तुं शक्यत इति मन्वानः परमकारुणिको भगवान् सर्वज्ञकल्पो महर्षिर्जैमिनिः वेदार्थाधिगमाय तच्चादृशं मीमांसाशास्त्रं न्यायनिबन्धनात्मकं द्वादशभिरध्यायैरसूसूत्रत् , येषु च सूत्रेषु चोदनालक्षणस्य तत्तदर्थवादप्रकाशितप्राशस्त्याविलसितस्य श्रुतिलिङ्गादिसम्पादितसकलाङ्गकलापपुङ्खितस्य विधिनिषेधविकल्पसमुच्चयोत्सर्गापवादबाधाभ्युच्चयादिमतो निखिलपुरुषार्थरत्नाकरस्य भगवतो धर्मस्य तत्त्वतो निर्णयः प्रतिपादितः ।

तदमीषां जैमिनीयसूत्राणां शब्दतस्संक्षिप्तानामपि निगूढार्थानां बोधायनोपवर्षादिभिर्व्याख्यातानामपि यथावदर्थग्रहणं न सर्वसुशकमित्यवधार्य विदितवेदितव्यास्तत्रभवन्त आचार्यशबरस्वामिनोऽनितरसाधारण्यया शय्यया, अनन्यसुलभया च वाग्धोरण्या भाष्यं प्रणीय तपस्विनीं मीमांसामनुजगृहुः ।

भाष्यकारपर्यन्तमेकरूपैव प्रवृत्तेयं भगवती मीमांसा ततस्त्रिपथगेव मार्गत्रयसञ्चारिणी बभूव । तत्र प्रथमो मार्गः मीमांसागृहस्य प्रधानस्तम्भभूतैः कार्तिकेयावतारभट्टकुमारिलपादैः प्रवर्तितः, य इमेऽद्यत्वे सकलविद्याविद्योतिन्यार्यावर्ते वर्तमानस्य मीमांसाप्रबन्धराशेस्सकलस्य शिरसि वर्तमानं वार्तिकं पद्यचम्पूभेदेन प्राणैषुः ।

द्वितीयस्तु मार्गः प्रतिवादिवाङ्मुद्रणाकर्मणेन विषयोपपादनचातुरीपरिपूर्णेन प्रभाकरमिश्रेण प्रकाशितः । अयमपि शाबरभाष्यमेवाऽवलम्ब्य तट्टीकात्वेन विवरणापरपर्यायां बृहतीम्, निबन्धनाभिधश्च प्रबन्धमररचत् । तृतीयस्तु पन्थाः प्रवर्तितो मुरारिमिश्रेण । एवं मार्गत्रये प्रवृत्तेऽपि कौमारिलमतस्यैव महान् प्रचारः, ततोऽल्पीयान् प्राभाकरमतस्य, आत्यन्तिकोऽभावो मुरारिमिश्रमतस्येत्येतत्सर्वं विदितमेव । तत्र कौमारिलमते शास्त्रदीपिकातौतातितमततिलकभाट्टदीपिकान्यायप्रकाशादयो ग्रन्थाः परश्शताः पार्थसारथिभवदेवखण्डदेवापदेवादिभिर्विरचितास्समुपलभ्यन्ते । इमे च ग्रन्था अतिगभीरया शैल्या विरचिताः मीमांसाशास्त्रे प्रविविक्षूणां बालानां कृते क्लेशाय भवेयुरित्यत्रधार्य श्रीसत्यज्ञानानन्दतीर्थेन परमहंसपरिव्राजकाचार्यश्रीरामकृष्णानन्दतीर्थशिष्येण वेदप्रकाशनामा ग्रन्थो व्यरचि ।

सोऽयमिदानीं मीमांसाशास्त्रे झटिति प्रविविक्षूणां माणवकानामत्यन्तोपकाराय मुद्राप्य प्रकाशं नीयते । अस्मिंश्च प्रबन्धे प्रबन्धा त्रीणि प्रकरणानि परिकल्पितानि–शास्त्रार्थसङ्ग्रहः, विधिभेदः, भावनाभेदश्चेति । तत्र प्रथमे प्रकरणे द्वादशसु अध्यायेषु ये ये विषयाः प्रतिपादिताः ते सर्वेऽपि तत्तदध्यायपौर्वापर्यनिरूपणपूर्वकमन्यूनानतिरिक्तं सङ्क्षेपेण सन्निवेशिताः । द्वितीये प्रकरणे उत्पत्तिविनियोगप्रयोगाधिकारभेदेन विभक्तस्य विधेः स्वरूपं लक्षणञ्च सोदाहरणं कार्त्स्न्येन न्यरूपि । अन्तिमे च प्रकरणे द्विविधाया अपि भावनायास्स्वरूपमतिसरलया वचोभङ्ग्या सविशदं प्रत्यपादि ।

ग्रन्थोऽयं माधवापदेवशङ्करभट्टविरचितानां जैमिनीयन्यायमालान्यायप्रकाशमीमांसासारसङ्ग्रहाणां सङ्ग्रहरूप एवेति वक्तव्यं भवति, यतश्च प्रायशोऽस्मिन् ग्रन्थे पूर्वोक्तग्रन्थस्था एव पङ्क्तय आनुपूर्व्या सङ्गृह्य ग्रन्थकारेण सन्निवेशिताः । शाब्दीभावनानिरूपणावसरे शम्भुभट्टकृतप्रभावलीस्थाः पङ्क्तयोऽप्यनेन क्वाश्चनोद्‌धृताः । अत एवाऽयं ग्रन्थकारश्शम्भुभट्टानन्तरकालिक इति प्रतिभाति । शम्भुभट्टस्तु वैक्रमीयसप्तदशशतक ( 1665. A. D. ) कालिकानां श्रीखण्डदेवाचार्याणां साक्षाच्छिष्यः । एवञ्च वैक्रमीयाष्टादशशतकानन्तरकालिकोऽयं भवेदिति वक्तव्यं भवति ।

मन्येऽहं ग्रन्थस्याऽस्याऽध्ययनेन मीमांसाशास्त्रीयप्रमेयविषये समीचीना व्युत्पत्तिः, तेन चोपरि न्यायप्रकाशशास्त्रदीपिकादिप्रौढग्रन्थाध्ययनसमये विद्यार्थिनामत्यन्तं सौलभ्यञ्च स्यादिति । अत्र च तत्तद्विषमस्थले यथामति टिप्पण्यपि समावेशिता । विषयवाक्यानामन्येषाञ्च ग्रन्थकारोद्‌धृतवाक्यानां यथोपलम्भं स्थानादिकमन्विष्य सूचितमधष्टिप्पण्याम् । तेषां सङ्केतशब्दानां विवरणावेदनिका सूचिकाऽपि सर्वपरिज्ञानाय समावेशिता ।

ग्रन्थोऽयं पुस्तकद्वयावलम्बेन शोधितः । एकन्तु पुस्तकं मदीयम् । द्वितीयं तु नेपालाभिजनात् पण्डितगजराजशर्मकेसरीमहोदयात् केभ्यश्चन वर्षेभ्यः पूर्वं स्वर्गवासिनां महामहोपाध्यायानां पण्डितप्रवराणां श्रीनित्यानन्दपर्वतीयमहोदयानां द्वारा गृहीत्वा चौखम्बासंस्कृतग्रन्थमालाध्यक्षेण श्रीजयकृष्णदासगुप्तमहोदयेन दत्तम् । एवं प्रकारेण मुद्राप्य प्रकाशितोऽयं वेदप्रकाशः ।

सर्वमिदं कार्यमस्मत्पूज्यपादानामाचार्यचरणानां वेदविशार-

दमीमांसाकेसर्याद्यनेकबिरुदावलीरलङ्कुर्वाणानां ब्रह्मश्रीयुतचिन्नस्वामिशास्त्रिपादानामनुपमया कृपया निर्वृत्तमिति तेभ्यः प्रत्युपकर्तुमशक्तोऽहं सप्रश्रयं समर्पयामि मदीयं हृदयकमलं तेषां चरणनलिनयोः ।

शोधनकार्ये इदम्प्रथमतया प्रवृत्तेन मया सावधानेन शोधितमऽपि मनुष्यमात्रसुलभान् दोषानुपेक्षमाणा गुणैकपक्षपातिनो विपश्चिद्वर्या मामनुगृह्णीयुरिति सविनयमभ्यर्थये ।

एतादृशग्रन्थप्रकाशनादिकार्ये भृशं प्रोत्साहनप्रदातृभ्यस्तत्र भवद्भ्यः पण्डितकुलाग्रगण्येभ्योऽस्मद्विद्यालयाध्यक्षेभ्यः श्रीचण्डीप्रसाद शुक्लमहोदयेभ्यश्शतशो धन्यवादान् वितरामि ।

आशासे च गीर्वाणवाणीसमुद्धरणबद्धपरिकरायाऽत्युत्तमप्राचीनग्रन्थप्रकाशनैकतानमतये श्रेष्ठवयाय श्रीजयकृष्णदास-हरिदास-गुप्तमहोदयाय चौखम्बा-बनारस-काशी-हरिदास-संस्कृतपुस्तकमालाध्यक्षाय श्रेयःप्राप्तिमुत्तरोत्तरामिति शिवम् ॥

वैशाख. कृष्ण द्वादशी.<br>सं. १९९१.<br>वाराणसी.

इति सुधीजनविधेयतमः<br>पट्टाभिरामशास्त्री.

# ॥ वेदप्रकाशगतविषयसूची ॥


| विषयः— | पृष्ठम् |
|---|---|
| स्वाध्यायविधिविचारः ... ... ... | १ |
| जिज्ञासासूत्रविचारः ... ... ... | ५ |
| चोदनासूत्रविचारः ... ... ... | ७ |
| उत्पत्तिविधिस्वरूपम् ... ... ... | ९ |
| मन्त्रविचारः ... ... ... | ११ |
| नामधेयविभागः ... ... ... | १३ |
| धर्मस्वरूपम् ... ... ... | १५ |
| प्रमाणाध्यायविचारः ... ... ... | १७ |
| अधिकाराध्यायविचारः ... ... ... | १९ |
| बाधहेतुनिरूपणम् ... ... ... | २१ |
| नञर्थनिरूपणम् ... ... ... | २३ |
| पादानां पूर्वोत्तरीभावः ... ... ... | २५ |
| सङ्गतिप्रदर्शनम् ... ... ... | २७ |
| अध्यायानां पौर्वापर्यम् ... ... ... | २९ |
| अनुष्ठानक्रमाभिधानम् ... ... ... | ३१ |
| स्वर्गस्य भाव्यत्वनिरूपणम् ... ... ... | ३३ |
| आत्मस्वरूपोपसंहारः ... ... ... | ३५ |
| आत्मज्ञानस्य क्रत्वर्थता ... ... ... | ३७ |
| विशेषातिदेशविचारः ... ... ... | ३९ |
| कृष्णलेष्ववघाताभावः ... ... ... | ४१ |
| तन्त्रप्रसङ्गयोर्भेदः ... ... ... | ४३ |
| पादाधिकरणविवेचनम् ... ... ... | ४५ |
| वेदस्वरूपनिरूपणम् ... ... ... | ४७ |
| शास्त्रार्थसङ्ग्रहोपसंहारः ... ... ... | ४९ |

| | |
|---|---|
| विभक्तिश्रुतेर्विनियोजकत्वम् ... ... ... | ५१ |
| प्रकरणस्य विनियोजकत्वम् ... ... ... | ५३ |
| लिङ्गेन वाक्यस्य बाधः ... ... ... | ५५ |
| सन्निपत्योपकारकाङ्गानि ... ... ... | ५७ |
| क्रमबोधकप्रमाणानि ... ... ... | ५६ |
| नित्यकर्मणां यथाशक्त्यनुष्ठानम् ... ... ... | ६३ |
| परिसङ्ख्याविधिः ... ... ... | ६५ |
| नियमपरिसङ्ख्याविध्योर्भेदः ... ... ... | ६७ |
| विधिप्राशस्त्यम् ... .. | ६९ |
| शाब्दीभावनाविचारः ... ... ... | ७३ |
| आर्थी भावनाविचारः ... ... ... | ८३ |
| ग्रन्थोपसंहारः ... ... ... | ८७ |

## ( सङ्केतशब्दानां विवरणसूचिका )

| | |
|---|---|
| शा. भा. ... ... ... | शाबरभाष्यम् |
| वाल्मी. रा. ... ... ... | वाल्मीकिरामायणम् |
| तै. सं. ... ... ... | तैत्तिरीयसंहिता |
| तै. ब्रा. ... ... ... | तैत्तिरीयब्राह्मणम् |
| मै. सं. ... ... ... | मैत्रायणीयसंहिता |
| जै. सू. ... ... ... | जैमिनिसूत्राणि |
| आप. श्रौ. ... ... ... | आपस्तम्बश्रौतसूत्रम् |
| का. श्रौ. ... ... ... | कात्यायनश्रौतसूत्रम् |
| म. भा. व. ... ... ... | महाभारते वनपर्व |
| मा. सं. ... ... ... | माध्यन्दिनसंहिता |
| पा. सू. ... ... ... | पाणिनिसूत्राणि |
| निरु. ... ... ... | निरुक्तम् |
| मीमां. सं. ... ... ... | मीमांसासारसङ्ग्रहः |
| शा. दी. ... ... ... | शास्त्रदीपिका |
| या. स्मृ. ... ... ... | याज्ञवल्क्यस्मृतिः |
| मनु. ... ... ... | मनुस्मृतिः |
| तं. वा. ... ... ... | तन्त्रवार्तिकम् |
| श्लो. वा. ... ... ... | श्लोकवार्तिकम् |
| का. सं. ... ... ... | काठकसंहिता |
| सा. का. ... ... ... | साङ्ख्यकारिका |
| छा. उ. ... ... ... | छान्दोग्योपनिषत् |
| बृ. उ. ... ... ... | बृहदारण्यकोपनिषत् |
| विधि वि. ... ... ... | विधिविवेकः |

[illegible]

## [illegible]

[illegible]

[illegible] ... ... ...
[illegible] ... ...
... ... ...
[illegible] ...
[illegible] ... ... ...
[illegible] ... ... ...
[illegible] ... ... ...
[illegible] ... ... ...
[illegible] ... ... ...
[illegible] ... ... ...
[illegible] ... .. ...
[illegible] ... ... ...
[illegible] ... ... ...
[illegible] ... ...
[illegible] ... ... ...
[illegible] ... ... ...
[illegible] ... ... ...
[illegible] ... ... ...
[illegible] ... ... ...
[illegible] ... ... ...
[illegible] ... ... ...
[illegible] ... ... ...
[illegible] ... ...

[illegible]

श्रीगणेशाय नमः ।

सत्यज्ञानानन्दतीर्थकृतः

# वेदप्रकाशः ॥

सत्यज्ञानानन्दतीर्थं प्राप्तोऽहं यत्प्रसादतः ।

तं गुरुं सच्चिदानन्दं वन्दे वेदं विधिं विभुम् ॥ १ ॥

वेदस्यैव सर्वार्थप्रकाशकत्वेन सर्वपुरुषार्थसम्पादकत्वात्तदध्ययनादौ द्विजातीनां प्रवृत्त्यर्थं स्वाभीष्टसिद्धये च तमेव नमस्कारव्याजेनाऽऽचार्यमूर्तिरित्थं स्तौति—सत्यज्ञानेत्यादिना । यस्य प्रसादादहं मन्दोऽपि सत्यज्ञानादिपदघटितं परमार्थप्रकाशकमन्वर्थनामधेयं प्राप्तोऽस्मि, तं गुरुं तत्त्वोपदेष्टारं वन्दे सर्वावस्थास्वभिवादय इत्यर्थः । गुर्वादिपूजाभिवादनशीलस्य सदा विजय इत्यभिप्रायः । किं लक्षणम् ? वेदयति प्रकाशयति स्थावरजङ्गमात्मकं सर्वमिति वेदः सर्वज्ञः सर्वशक्तिः, तं वेदम्, अत एव विधिं सर्वप्रवर्तकं सर्वान्तर्यामिणम्, अत एव विभुं व्यापकम्, सर्वात्मकमिति यावत् । अत एव सच्चिदानन्दं अनृतजडदुःखविलक्षणमित्यर्थः ।

पुनरपि सरस्वत्यात्मानं तं स्तौति—

सुस्फोटवर्णपदवाक्यविभक्तिकायां

ब्रह्मादिदेवमुनिवन्दितपादपद्माम् ।

गाङ्गेन्दुकुन्दधवलां करमञ्जुवीणां

वाणीं परां भगवतीं प्रणमामि नित्याम् ॥ २ ॥

स्फुटत्यस्मादर्थ इति स्फोटः सर्वार्थप्रकाशकः, वर्णा लौकिका वैदिकाश्च त्रिषष्टिश्चतुष्षष्टिर्वा । तत्र लौकिका गौरश्वः पुरुषो हस्तीत्यादयः । वैदिकास्तु 'अग्निमीळे पुरोहितम्' 'इषे त्वोर्जे त्वा' 'अग्न आयाहि

वीतये' 'शन्नो देवीरभीष्टय' इत्यादयः । पदानि वर्णघटितानि सुप्तिङन्तानि, तद्रहितान्यपि च तु नेत्यादीनि, तद्घटितानि वाक्यानि पदसमूहात्मकानि, विभक्तयः सु औ जसित्यादयः, अथ वा विभक्तयो विभागाः शक्तयः शब्दनिष्ठ(१)तत्तदर्थप्रकाशनसामर्थ्यानि औत्पत्तिकान्याचिन्त्यानि कार्यैकलिङ्गगम्यानि, शोभना(२)उक्तस्फोटादयः तैरुपलक्षितः कायो यस्यास्तां वाणीं प्रकृष्टया भक्त्या नमामि । शेषं सुलभम् ।

अथ तमेव पुनर्ब्रह्मात्मना स्तुवन् प्रणमति—

दुर्बोधमतिगम्भीरं अगाह्यमकृतात्मनाम् ।
अनन्तशक्तिसम्पन्नं शब्दब्रह्म नमाम्यहम् ॥३॥

येषां सतां सुपदवीमनुनीय नूनं नानानिबन्धकरणे कुशलोऽहमस्मि ।
तानानमामि ननु नौमि हरं हरिं मां काशीं शिवां शिवसुतं द्युमणिं च गङ्गाम् ॥

नत्वा श्रीजैमिनिं(३) भट्टान् शबरस्वामिनं मुनिम् ।
वेदप्रकाशं कुर्वेऽहं स्वशिष्यमतिशुद्धये ॥ ५ ॥
शास्त्रार्थसङ्ग्रहं चाऽऽदौ द्वितीये विधिभेदनम् ।
द्विविधां भावनां वक्ष्ये तृतीये विशदां सतीम् ॥ ६ ॥
क्व दुग्धसागरो वेदः क्वाऽहमल्पबलो लघुः ।
हास्यास्पदं गमिष्यामि धूर्तानां न महात्मनाम् ॥ ७ ॥
अथाऽप्यस्य गमिष्यामि पारं मारुतसूनुवत् ।
रामभक्तिं तरिं कृत्वा भवार्णवविलङ्घिनीम् ॥ ८ ॥

इह खलु 'स्वाध्यायोऽध्येतव्य' इति नित्याध्ययनविधिना विधिवदधीतसाङ्गस्वाध्यायं निष्पापं द्विजातिमापाततोऽधिगतवेदार्थं निस्सान्दिग्धतया वेदबोधितधर्मानुष्ठानार्थं तं जिज्ञासुमुपलभमानो भगवान् जैमिनिराचार्यः सर्वशास्त्रोपोद्घातरूपं बह्वर्थमतिगम्भीरं इदं सूत्रमादौ स्फुटमुच्चारयामास—'अथाऽतो धर्मजिज्ञासे'ति । अत्राऽथशब्द आनन्तर्यार्थः ।

---

१. तदर्थप्रकाशनेति. क. पु. २. पूर्वोक्तस्फोटादय इति. क. पु.
३. कुमारिलभट्टानित्यर्थः ।

अतःशब्दो हेत्वर्थः । ज्ञातुमिच्छा जिज्ञासा, (१)धर्माय जिज्ञासा धर्मजिज्ञासा । अत्र धर्मानुष्ठानपर्यवसायि धर्मज्ञानं विवक्षितम्, न हि केवलं धर्मज्ञानमात्रं पुरुषार्थपर्यवसायि भवितुमर्हति, येन तावतैव कृतार्थस्स्यात्, किन्तु धर्मानुष्ठानद्वारा । तथेच्छाशब्देन विचारो विवक्षितः, शास्त्रस्य विचारात्मकत्वात् । धर्मशब्देन कृत्स्नो वेदार्थो विवक्षितः निषेधवाक्यार्थाधर्मस्याऽपि प्रतिपिपादयिषितत्वाद्धानाय । तथा चाऽयं सूत्रार्थस्सम्पन्नः—वेदाध्ययनानन्तरं वेदाध्ययनस्य तदर्थज्ञानाङ्गत्वात्, ज्ञानस्य च धर्मानुष्ठानहेतुत्वात् तस्य च साक्षात्पुरुषार्थहेतुत्वात् तदर्थिभिर्धर्माधर्मज्ञानाय वेदार्थविचारः कर्तव्य इति । सा च धर्मजिज्ञासा चतुर्विधा धर्मस्वरूपप्रमाणसाधनफलैः ।

ननु अध्ययनविधिना वेदवाक्यार्थविचारमात्राक्षेपाद्धर्मस्वरूपप्रमाणजिज्ञासयोः कः प्रसङ्गः? उच्यते--उपोद्घातत्वात्प्रसङ्गः । यदि हि वेदवाक्यार्थो धर्मः प्रयोजनवान् स्यात्, वेदश्च तत्र प्रमाणम्, तदाऽसौ विचारः कर्तव्यो भवति । इतरथा काकदन्तपरीक्षावत्स्यात् । तस्मादध्ययनविधिरेव प्रमाणादिविचारमप्याक्षिपति ज्ञानार्थमध्ययनं विदधत् । एतेन शास्त्रस्य वेदार्थविचारपरत्वात् अथाऽतो वेदार्थजिज्ञासेति सूत्रं युक्तं तद्विचारेण धर्मोऽपि विचारितस्स्यादिति शङ्का परास्ता । धर्मस्यैव साक्षात्पुरुषार्थहेतुत्वेन मुख्यवेदार्थत्वात् । यद्यपि धर्मार्थकाममोक्षाख्याश्चत्वारः पुरुषार्थास्सेव्यत्वेन प्रसिद्धाः, तथाऽपि काममोक्षयोरेव मुख्यं पुरुषार्थत्वम्, सार्वजनीनोत्कटेच्छाविषयत्वात्, इतरयोस्तु तद्धेतुत्वाद्गौणम्, तत्राऽपि मोक्षस्यैव उत्कृष्टता, नित्यत्वात् प्रेक्षावदिष्टत्वाच्च । एवं गौणयोरपि धर्मस्यैवोत्कृष्टता साक्षान्मोक्षहेतुत्वात्, अर्थस्य तु धर्मद्वारेति विवेकः । तथा चाऽनेन सूत्रेण

---

१. इदन्तु न विग्रहप्रदर्शनपरम्, प्रकृतिविकारभावस्थल एव 'यूपाय दारु' इत्यादौ चतुर्थीसमासस्येष्टत्वात्, किन्तु तादर्थ्यरूपषष्ठ्यर्थविशेषग्रहणसूचनपरं द्रष्टव्यम्, 'प्रकृत्या विकृतिर्यस्माच्चतुर्थ्यन्ता समस्यते । तादर्थ्ये यूपदार्वादौ तेनाऽस्मिन्न समासता ॥ सा हि तस्येत्यनेनोक्ता धर्मस्येत्येष विग्रहः । धर्मायेति तु तादर्थ्ये षष्ठी वृत्तेति कथ्यते' ॥ इति वार्तिकोक्तेः । ( श्लो. वा. अ. १. पा. १. अधि. १. श्लो. ११८,११९. )

प्ारीप्सितस्य शास्त्रस्य श्रोतृप्रवृत्त्यङ्गानुबन्धचतुष्टयमप्यर्थात्सूत्रितं भवति। तत्राऽथाऽतश्शब्दाभ्यामधिकारी सूचितः। धर्मजिज्ञासापदेन विषयप्रयोजने, तत्प्रतिपादकत्वाच्छास्त्रस्य प्रतिपाद्यप्रतिपादकसम्बन्धश्च सूचित इति बोध्यम्।

अत्रेदं चिन्त्यते--किमध्ययनानन्तरं धर्मजिज्ञासया गुरुगृहेऽवस्थातव्यम्? उत गुरुगृहात्समावर्तितव्यमिति? किञ्चाऽतः? यदि स्वाध्यायाध्ययनविधिना धर्ममात्रमध्ययनं स्वर्गाय विधीयते ततस्तन्मात्रेणैव शास्त्रार्थस्य समाप्तत्वा "दधीत्य स्नाया"दिति स्मृतिबलेन समावर्तितव्यम्। अथ त्वक्षरादिग्रहणपरम्परोपजायमानवाक्यार्थज्ञानार्थमध्ययनं विधीयते ततस्तस्य विचारमन्तरेणाऽसम्भवादध्ययनविधिनैवाऽर्थाद्विचारोऽपि विहित इति गुरुगृह एवाऽवस्थाय धर्मो विचारयितव्यः।

## ( विचारशास्त्रविषयः )

तत्र 'चोदनालक्षणोऽर्थो धर्म' इत्यारभ्य 'अन्वाहार्ये च दर्शनादि' त्येतदन्तं जैमिनिप्रोक्तं सूत्रजातं धर्मविचारशास्त्रम्, तदेतस्य प्रथमाधिकरणस्य विषयः।

## ( संशयः )

तत्रैवं संशयः--किमिदं शास्त्रं विधिप्रयुक्त्याऽनारम्भणीयम्? उतारम्भणीयम्? इति।

## ( पूर्वपक्षः )

तत्र नाऽऽरम्भणीयमिति तावत्प्राप्तम्। कुतः?

'विनाऽपि विधिना दृष्टलाभान्न हि तदर्थता।
कल्प्यस्तु विधिसामर्थ्यात्स्वर्गो विश्वजिदादिवत्'

इति स्वाध्यायसंस्कारद्वारेणाऽध्ययनस्याऽर्थज्ञानहेतुत्वं विनैव विधिना प्रमाणान्तरेण सिद्धमिति तादर्थ्ये विध्यानर्थक्यमिति प्राप्ते—

## ( सिद्धान्तः )

अभिधीयते--यथा दर्शपूर्णमासजन्यं परमापूर्वं अवघातनियमजन्यत्वावान्तरापूर्वस्य कल्पकम्, तथाऽशेषक्रतुजन्यमपूर्वजातं क्रतुज्ञानसाध-

नाध्ययननियमजन्यस्याऽपूर्वस्य कल्पकं भविष्यति । नियमादृष्टानङ्गीकारे च श्रूयमाणो विधिरनर्थकः स्यात् । न च (१)विश्वजिन्न्यायेन स्वर्गार्थत्वं युक्तम्, दृष्टफलेऽर्थज्ञाने सम्भवति अदृष्टस्य कल्पयितुमशक्यत्वात् । (२)अत एवोक्तम्--

'लभ्यमाने फले दृष्टे नाऽदृष्टपरिकल्पना ।
विधेस्तु नियमार्थत्वान्नाऽऽनर्थक्यं भविष्यती' ति ।

अतो विचारो वैधः । तस्माद्विधिवशादेव विचारशास्त्रमारम्भणीयमिति स्थितम् । अत्र श्रीशाबरं भाष्यम्--(३)"वेदमधीत्य न त्वरितेन स्नातव्यम् । अनन्तरं धर्मो जिज्ञासितव्य इत्यथशब्दार्थः । अतश्शब्दो वृत्तस्याऽपदेशको हेत्वर्थः । यथा--क्षेमसुभिक्षोऽयं देशोऽतोऽहमस्मिन् देशे वसामीति । एवमधीतो वेदो धर्मजिज्ञासाया हेतुर्ज्ञातः, अनन्तरं धर्मो जिज्ञासितव्य इत्यतश्शब्दस्य सामर्थ्यम् । धर्माय हि वेदवाक्यानि विचारयितुमनधीतवेदो न शक्नुयात्, अत एतस्मात्कारणादनन्तरं धर्मं जिज्ञासितुमिच्छेदित्यतश्शब्दस्याऽर्थः । धर्माय जिज्ञासा धर्मजिज्ञासा । सा हि तस्य ज्ञातुमिच्छा, स कथं जिज्ञासितव्यः ? को धर्मः ? कथं लक्षणकः ? कान्यस्य साधनानि ? कानि साधनाभासानि ? किं परश्चेति । तत्र को धर्मः, कथं लक्षणक इत्येकेनैव सूत्रेण व्याख्यातम्--'चोदनालक्षणोऽर्थो धर्म'इति । कान्यस्य साधनानि, कानि साधनाभासानीति(४) शेषलक्षणेन व्याख्यातम् । क्व पुरुषपरत्वं क्व वा पुरुषो गुणभूत इति चैतासां प्रतिज्ञानां पिण्डस्यैतत्सूत्रम्--'अथाऽतो धर्मजिज्ञासे'ति" । तत्सिद्धं वेदाध्ययनानन्तरं समावर्तनात्प्राक्

---

१. पू. मी ४. ३. ७.   २. शास्त्रदीपिकायां पार्थसारथिमिश्रैरिति शेषः ।
३. शा. भा. पृ. २ पं. १६.
४. अवशिष्टैरध्यायैः प्रतिपाद्यत इत्यर्थः । अध्यायानां बहुत्वेऽप्येकवचनं लक्षणत्वरूपसामान्याभिप्रायकं बोध्यम् ।

धर्मस्य प्रमाणस्वरूपफलसाधनैः क्रमेण (१)प्रथमद्वितीयषष्ठतदितरविषयैर्जिज्ञासा कर्तव्येति ।

अथ धर्मः प्रसिद्धो वा स्यादप्रसिद्धो वा? आद्ये न जिज्ञास्यः, द्वितीये नतराम्। तदेतदनर्थकं धर्मजिज्ञासाप्रकरणमिति। अत्रोच्यते—विधिवदधीतसाङ्गस्वाध्यायस्याऽऽपाततोऽर्थज्ञानसम्भवेऽपि निर्णयस्य विचाराधीनत्वात् आपातप्रसिध्या धर्मस्य विषयत्वसंभवात् नाऽनर्थकमिति। प्रथमं तावत्को धर्मः, किं लक्षणक इति धर्मस्वरूपप्रमाणप्रतिपादनपरमिदं सूत्रम्—'चोदनालक्षणोऽर्थो धर्म' इति ।

## ( धर्मप्रमाणसंशयः )

तदिह धर्मं विषयीकृत्य चिन्त्यते—किमस्य न किञ्चित्प्रमाणमस्ति? किं वा प्रत्यक्षादिकमेव प्रमाणम्? उत चोदनैव? अथ वा विकल्पः? अथ वा समुच्चयः? इति ।

## ( पूर्वपक्षः )

तत्र शब्दस्य प्रमाणान्तरप्राप्तप्रापकत्वेन स्वयमप्रमाणत्वात् प्रत्यक्षादीनां चाऽसामर्थ्यादप्रमाणको धर्म इत्येकः पक्षः। प्रत्यक्षादिगम्य एवेत्येकः पक्षः। योगिनां प्रत्यक्षगम्यः, अर्वाचीनानां तु चोदनागम्य इत्यपरः। जगद्वैचित्र्यार्थापत्त्या किमप्यदृष्टमस्तीति सामान्येन प्रसिद्धो धर्मश्चोदनयाऽग्निहोत्रादिविशेषरूपेण गम्यते, तस्मात्समुच्चय इति पक्षान्तरम् ।

## ( सिद्धान्तः )

चोदनैव प्रमाणं सा च प्रमाणमेवेति नाऽप्रमाणकत्वमिति सिद्धान्तः। तदिह चोदनैव प्रमाणमेवेत्यवधारणद्वयं प्रतिज्ञायते। तथा च यो धर्मस्स चोदनालक्षणः, चोदनैव तस्य लक्षणं प्रमाणम्, चोदना च तस्य लक्षणमेवेति श्रुत्या प्रमाणविधौ अर्थाच्चोदनागम्य एवाऽग्निहोत्रादिर्धर्मो नाऽतल्लक्षणश्चैत्यवन्दनादिरिति स्वरूपमपि सिध्यति। तथा यश्चो-

---

१. प्रथमाध्यायस्य प्रमाणं विषयः, द्वितीयस्य स्वरूपम्, षष्ठस्य फलम्, इतरेषां साधनामीति भावः ।

दनालक्षणः स धर्म इति स्वरूपविधौ अर्थात्प्रमाणसिद्धिर्वेदितव्या । (१)कश्चिदेवं प्रलपति—कार्यरूपो वेदार्थो न सिद्धस्वरूप इत्यनेन सूत्रेणोच्यते । चोदनालक्षणशब्देन कार्यमुच्यते धर्मशब्देन वेदार्थ इति ।

अथ मन्दबुध्यनुग्रहार्थं सूत्रपदानि स्फुटं व्याख्यास्यामः । 'चोदनालक्षणोऽर्थो धर्म' इति लक्षणसूत्रम् । तत्र चोदना नाम विधिघटितं वाक्यम्,(२) 'चोदनेति क्रियायाः प्रवर्तकं वचनमाहुरि'ति शाबरात्, (३)'चोदना चोपदेशश्च विधिश्चैकार्थवाचिन'इति भाट्टाच्च । लक्ष्यते प्रमीयतेऽनेनेति लक्षणं प्रमाणम् । अर्थ्यत इत्यर्थः प्रयोजनवानिति यावत् । चोदनैव लक्षणं प्रमाणं यस्मिन् तादृशोऽर्थो धर्मः । धारणात् स्वानुष्ठातुरभीष्टसंयोजनेन प्रतिष्ठापनाद्धर्मः । अभीष्टं नाम सुखं दुःखनिवृत्तिर्वा । तदर्थमेव सर्वेषां प्राणिनां प्रवृत्तिदर्शनात् । तच्चाऽत्र स्वर्गपदवाच्यम्--

(४)'यन्न दुःखेन सम्भिन्नं न च ग्रस्तमनन्तरम् ।
अभिलाषोपनीतं च तत्सुखं स्वःपदास्पदमि' ति वचनात् ।

न च लक्षणं नाम लक्ष्यपरिच्छेदकस्तद्गतासाधारणो धर्मः कश्चिल्लोकप्रसिद्ध आकारः । तेन लक्ष्ये वस्तुनि सम्भावनाज्ञाने जाते तन्निर्णेतुमुद्युक्तः प्रमाणेन तदवगच्छतीति सुप्रसिद्धम् । तद्यथा—कश्चिद्गां जिज्ञासुः सास्नादिमती गौरित्याप्तादुपश्रुत्य चतुष्पाज्जीवेषु तल्लक्षणलक्षितां व्यक्तिमन्विष्येयं गौरिति चक्षुषाऽवगच्छति । न हि कश्चिद्धर्मे आकारोऽस्ति, अलौकिकत्वाद्रूपादिहीनत्वाच्चेति कथं जिज्ञास्य इति वाच्यम् । मा भू-

---

१. प्राभाकरमतमिदम् ।   २. शा. भा. पृ. ३. पं. ९.

३. श्लो. वा. अ. ५. श्लो. ११. पृ. २११.

४. यत्सुखम्, न दुःखेन सम्भिन्नम्—दुःखमिश्रं न भवति, न च ग्रस्तम्–शत्रुकृतापहारादिशङ्कारहितम्, अनन्तरम्–अविच्छिन्नं सन्ततं वर्षादियावत्कालभोग्यम्, अभिलाषोपनीतम्—प्रयत्नानपेक्षाभिलाषमात्रोपनीतविषयम्. तत्सुखं स्वःपदास्पदम्—स्वर्गपदवाच्यं भवतीत्यर्थः । अत्र विशेषणचतुष्टयेन सांसारिकसुखवैलक्षण्यं प्रदर्शितमिति बोध्यम् ।

च्चक्षुरादिगम्य आकारः, चोदनागम्यः स्वर्गफलसाधनत्वादिलक्षणस्तु वेदप्रसिद्धोऽस्त्येवेति उक्तदोषानवसरात्। अर्थो धर्म इत्युक्ते ब्रह्मणि चैत्यवन्दनादौ घटादौ चाऽतिव्याप्तिः, तद्व्यवच्छेदाय चोदनागम्य इत्युक्तम्। तावत्येवोक्ते चोदनागम्येऽपि फलतोऽनर्थरूपे श्येनाद्यभिचारकर्मणि अतिव्याप्तिः, तत्परिहारार्थं अर्थ इत्युक्तम्। तथा चाऽर्थत्वे सति चोदनागम्यत्वमिति लक्षणं भवतीति(१) यथाश्रुतग्राहिणः।

## ( वार्तिककारमतम् )

अन्ये तु चोदनाशब्देन प्रवर्तकं निवर्तकं च वाक्यमुच्यते। ततश्च निषेधवाक्यैः'न हिंस्यात्सर्वा भूतानी' त्यादिभिरनर्थत्वेन लक्ष्यमाणानां हिंसादीनामपि धर्मत्वं स्यात्। तद्व्यावृत्त्यर्थमर्थपदं यदेवाऽर्थरूपं प्रवर्तकवाक्ये लक्ष्यते तस्यैव धर्मत्वमित्यर्थकम्। भाष्ये श्येनादिग्रहणं तु तत्साध्यहिंसापरमिति। युक्तं चैतत्—श्येनस्य विहितत्वेन तत्र धर्मस्यैवोचितत्वात्। न च 'न हिंस्यादि'ति श्येने प्रवर्तते, तस्य हिंसाविषयत्वात्। श्येनस्य चाऽहिंसात्वात्। अत एव (२)'यो हिंसितुमिच्छेत्तस्याऽयमभ्युपाय' इति भाष्यं श्येनफलस्यैव हिंसात्वपरं सङ्गच्छते।

न च तस्य धर्मत्वे शिष्टानां तत्र प्रवृत्त्यापत्तिः, तेषां तत्फलेच्छाभावात्। श्येनानुष्ठायिषु अधार्मिकत्वव्यवहारस्य फलमादायैवोपपत्तेश्च। अत्रेदं बोध्यम्—श्रेयस्साधनत्वेन वेदबोधितत्वं धर्मत्वम्। अनिष्टसाधनत्वेन वेदबोधितत्वमधर्मत्वम्। अस्ति चेदं यागादौ हिंसादौ च। प्रवर्तनाविषयभावनाविषये इष्टसाधनत्वस्य, निवर्तनाविषयभावनाविषयेऽनिष्टसाधनत्वस्य सत्त्वात् प्रवर्तनानिवर्तनान्यथानुपपत्त्या तत्कल्पनात्। अत एव च नाऽपूर्वं धर्माधर्मशब्दवाच्यत्वमस्माकं मते, तस्य शक्तिरूपत्वेनेष्टानिष्टसाधनत्वाभावात्। यस्य हि शक्तिस्तत्साधनम्, न तु सैव तत्। अत एव यो यागमनुतिष्ठति तं धार्मिकमाचक्षते। अदृष्टे तच्छब्दप्रयोगस्तु शक्तिशक्तिमतोरभेदाल्लक्षणया बोध्यः। न च विनिगमनाविरहः,

---

१, प्राभाकरा इत्यर्थः। २. शा. भा. पृ. ४. पं. २६.

'धर्मं चरे' त्यादिवैदिकप्रयोगस्यैव विनिगमकत्वात् । पूर्वसूत्रेऽधर्मविचारस्याऽपि प्रतिज्ञातत्वेन तल्लक्षणावश्यकत्वादकारप्रश्लेषेणाऽधर्मलक्षणमपि सूत्रेण क्रियत इति ।

अत्र च यद्यपि 'अग्नीषोमीयं पशुमालभेते' त्यादिविशेषविधिगोचरत्वात्क्रत्वङ्गहिंसाया 'न हिंस्यात्सर्वा भूतानी' ति सामान्यनिषेधस्य तदितरपरत्वमिति सर्वाचार्यसम्मतम्, तथाऽप्यस्ति कश्चन विशेषः । तथा हि—'चोदनालक्षणोऽर्थो धर्म' इत्यत्राऽर्थपदव्यावृत्त्यर्थत्वेनाऽधर्मत्वं श्येनादेः प्राभाकरमते । भाट्टमते तु श्येनफलस्यैवाऽभिचारस्याऽनर्थहेतुत्वादधर्मत्वम्, श्येनस्य तु विहितस्य समीहितसाधनत्वाद्धर्मत्वमेव । अर्थपदव्यावर्त्यत्वं तु कलञ्जभक्षणादेर्निषिद्धस्यैवेति । तार्किकाणां तु मते कृतिसाध्यत्वमर्थहेतुत्वमनर्थाहेतुत्वं चेति त्रयं विध्यर्थः । तत्र क्रत्वर्थहिंसायां साक्षान्निषेधाभावात्प्रायश्चित्तानुपदेशाच्च कृतिसाध्यत्वार्थहेतुत्ववदनर्थाहेतुत्वमपि विधिना बोध्यत इति न तस्या अनर्थहेतुत्वम्, श्येनादेस्त्वभिचारस्य साक्षादेव निषेधात्प्रायश्चित्तोपदेशाच्चाऽनर्थहेतुत्वमिति । औपनिषदैस्तु भाट्टमेव दर्शनं (१)व्यवहारे प्रायेणाऽवलम्बितमिति दिक् । तत्सिद्धं चोदनालक्षणोऽर्थो धर्म इति ।

## ( वेदस्य पञ्चविधता )

वेदः पञ्चविधो ज्ञेयो विधिमुख्योऽनपेक्षकः ।
फलवान् बोधको नित्योऽपूर्वार्थस्यैव निर्मलः ॥

वेदयति प्रकाशयति सर्वं क्रियाकारकफलात्मकमिति वेदः मन्त्रब्राह्मणात्मको नारायणाख्यस्य परमात्मन आज्ञाशक्तिः । अत एव स्वतन्त्रो निर्दोषत्वादिगुणसम्पन्नश्च । स च पुनर्विधिनिषेधार्थवादमन्त्रनामधेयात्मकः पञ्चप्रकारः ।

## ( विधेः प्रयोजनवत्त्वम्, उत्पत्तिविधिश्च )

तत्र विधिरनधिगतप्रयोजनवदर्थविधानेनाऽर्थवान् । यथा—(२)'अ-

---

१. 'व्यवहारे भट्टनय' इति प्रवादादिति भावः ।

२. यद्यपि 'अग्निहोत्रं जुहोती'त्येवोत्पत्तिवाक्यम्, इदं त्वधिकारवाक्यम्, तथाऽपि कर्मणस्स्पष्टतया फलवत्त्वज्ञापनार्थमिदमुदाहृतमिति बोध्यम् ।

ग्निहोत्रं जुहुयात्स्वर्गकाम' इति(१) अप्राप्तप्रयोजनवद्धोमं विधत्ते—अग्निहोत्रहोमेन स्वर्गं भावयेदिति ।

## ( गुणविधिः )

यत्र तु कर्म प्रकारान्तरेण प्राप्तं तत्र तदुद्देशेन गुणमात्रं विधत्ते । यथा—'दध्ना जुहुयादि'त्यत्र होमस्य 'अग्निहोत्रं जुहुयादि' त्यनेन प्राप्तत्वाद्धोमोद्देशेन दधिमात्रविधानम्—दध्ना होमं भावयेदिति ।

## ( विशिष्टविधिः )

यत्र तूभयमप्राप्तं तत्र विशिष्टं विधत्ते, तदुक्तम्—(२)'न चेदन्येन शिष्टा' इति । शिष्टा उपदिष्टा इत्यर्थः । यथा—'सोमेन यजेते' त्यत्र सोमयागयोरप्राप्तत्वात्सोमविशिष्टयागविधानम्—सोमवता यागेनेष्टं भावयेदिति । विधिरेव मुख्यः प्रधानं यस्य स विधिमुख्यः । तत्सिद्धम्-अप्राप्तं प्रयोजनवन्तमर्थं विधत्ते विधिरिति । तं च पुनर्विस्तरेण द्वितीयप्रकरणे प्रतिपादयिष्यामः ।

## ( निषेधानां निवर्तकत्वम् )

अनर्थहेतुकर्मणस्सकाशात्पुरुषस्य निवृत्तिकरत्वेन निषेधानामपि पुरुषार्थानुबन्धित्वम् । तथा हि—यथा विधयः प्रवर्तनामभिदधतः स्वप्रवर्तकत्वनिर्वाहार्थं विधेयस्य यागादेः श्रेयस्साधनत्वमाक्षिपन्तः पुरुषं तत्र प्रवर्तयन्ति, एवं 'न (३)कलञ्जं भक्षयेत्' 'ब्राह्मणो न हन्तव्यः' 'न सुरां पिबेत्' इत्यादयो निषेधा अपि निवर्तनामभिदधतः स्वनिवर्तकत्वनिर्वा-

---

१. अप्राप्तः एतद्वाक्यं विना केनाऽपि प्रमाणेन स्वातन्त्र्येणाऽबोधितः, प्रयोजनवान् स्वर्गादिरूपफलवान् साध्यत्वसम्बन्धेन, तादृशो यो होमः, तं विधत्त इत्यर्थः ।

२. 'तद्गुणास्तु विधीयेरन् अविभागाद्विधानार्थे न चेदन्येन शिष्टाः' इति समग्रं जैमिनिसूत्रम् ( १. ४. ९. ) तद्गुणाः स च गुणाश्च तद्गुणाः प्रधानभूतो यागः अग्न्यादिरूपा गुणाश्च, विधानार्थे तत्तद्गुणविशिष्टतत्तत्प्रधानरूपे विधेये, अविभागात् भेदविरहात् , विधीयेरन् विधेयतया प्रतिपाद्येरन् , न चेदन्येन शिष्टाः वाक्यान्तरेण यदि न विहितास्स्युरिति सूत्रार्थः ।

३. कलञ्जं रक्तलशुनम् ।

हार्थं निषिद्धस्य कलञ्जभक्षणादेरनर्थहेतुत्वमाक्षिपन्तः पुरुषं ततो निवर्तयन्तीति स्थितम् ।

## ( अर्थवादानां प्राशस्त्यसमर्पकत्वम् )

यथा विध्यादीनामध्ययनविध्युपात्तानां नाऽनर्थक्यम्, एवमर्थवादानामपि तदुपात्तत्वेनाऽऽनर्थक्यानुपपत्तेः, स्वार्थप्रतिपादने च प्रयोजनाभावात्, लक्षणया प्रयोजनवदर्थपर्यवसानं वक्तव्यम् । ते चाऽर्थवादा द्विविधाः—विधिशेषा निषेधशेषाश्च । तत्र 'वायव्यं श्वेतमालभेते'त्यादिविधिशेषाणां (१)'वायुर्वै क्षेपिष्ठा देवते'त्यादीनामर्थवादानां विधेयार्थस्तावकतयाऽर्थवत्त्वम् । 'बर्हिषि रजतं न देय'मित्यादिनिषेधशेषाणां(२) 'सोऽरोदी'दित्यादीनामर्थवादानां तु निषेध्यनिन्दकतयेति । अतश्च लक्षणया प्राशस्त्यमर्थवादैर्बोध्यते । तच्च प्राशस्त्यज्ञानं शब्दभावनायामितिकर्तव्यतात्वेन सम्बध्यते ।

## ( मन्त्राणां प्रयोगसमवेतार्थस्मारकत्वम् )

एवं मन्त्राणामपि प्रयोगसमवेतार्थस्मारकतयाऽर्थवत्त्वम्, न तु तदुच्चारणमदृष्टार्थम्, दृष्टे सम्भवत्यदृष्टस्याऽन्याय्यत्वात् । न च दृष्टस्य प्रकारान्तरेणाऽपि सम्भवात् मन्त्राम्नानमनर्थकम्, मन्त्रैरेव स्मर्तव्यमिति नियमविध्याश्रयणात् । अतो युक्तं 'इषे त्वोर्जे त्वा' 'उरु प्रथस्वे'त्यादि-

---

१. ( तै. सं. २. १. १ ) 'वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेयेनोपधावति स एवैनं भूतिं गमयती' ति समग्रोऽर्थवादभागः । अस्याऽर्थः—वायुः क्षेपिष्ठा—क्षिप्रगामिनी देवता । वैशब्दः प्रसिद्धौ । स्वेन भागधेयेन स्वसम्बन्धिना श्वेतपशुरूपेण हविषा यजमानस्तं यदि प्रीणयति, तर्हि सः वायुः, एनं यजमानं भूतिं प्रापयत्येवेति ।

२. ( तै. सं. १. ५. १ ) 'सोऽरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वमि'ति वाक्यम् । अत्राऽयं पूर्वसन्दर्भः—पुरैकदा देवा असुरैस्सह युयुत्सवः, कदाचिदस्माकं पराजये जीवनार्थमिदं भविष्यतीति मन्वानाः स्वनिकटस्थममूल्यं वस्तुजातमग्नौ निधाय योद्धुमगच्छन् । तदवलोक्याऽयमग्निः लोभाकृष्टचेतास्तैर्वस्तुभिस्साकं पलायाम्बभूव । युद्धे जयं प्राप्य प्रतिनिवृत्ता देवा अग्निमपश्यन्तस्तमन्विष्य क्वचिल्लब्ध्वा स्वीयानि वस्तूनि तत आच्छिन्दन् इति । एवं गृहीतधनस्सोऽग्निररोदीत् । यस्मादरुदत् तस्मात्तस्य रुद्रत्वमिति प्रकृतवाक्यार्थः ।

मन्त्राणां प्रयोगसमवेतार्थस्मारकतयाऽर्थवत्त्वम् । तत्र ये मन्त्रा यत्र पठितास्तेषां तत्र यद्यर्थप्रकाशनं प्रयोजनं सम्भवति तदा तत्रैव विनियोगः । येषां तु न सम्भवति तेषां यत्र सम्भवति तत्रोत्कर्षः । यथा(१)पूषानुमन्त्रणमन्त्राणामित्युक्तम् । येषां क्वाऽपि न सम्भवति तदुच्चारणस्य त्वगत्याऽदृष्टार्थत्वम्, सर्वथाऽपि तु तेषां नाऽऽनर्थक्यमिति ।

## ( नामधेयप्रामाण्यम् )

नामधेयानां विधेयार्थपरिच्छेदकतयाऽर्थवत्त्वम् । तथा हि—'उद्भिदा यजेत पशुकाम' इत्यत्र हि उद्भिच्छब्दो यागनामधेयम् । तेन च विधेयार्थपरिच्छेदः क्रियते । अनेन हि वाक्येनाऽप्राप्तत्वात्फलोद्देशेन यागो विधीयते । यागसामान्यस्य चाऽविधेयत्वाद्यागविशेषो विधीयते । तत्र कोऽसौ विशेषः ? इत्यपेक्षयामुद्भिच्छब्दादुद्भिद्रूपो याग इति ज्ञायते, उद्भिदा यागेनेति सामानाधिकरण्येन नामधेयान्वयात् । तस्य च यजिना सामानाधिकरण्यं न नीलोत्पलादिशब्दवत् । तत्र हि उत्पलशब्दस्याऽर्थादुत्पलादन्यो नीलशब्दस्य वाच्योऽर्थोऽस्ति नीलगुणः । लक्षणया तु नीलशब्दस्य द्रव्यपरत्वेन सामानाधिकरण्यम् । उद्भिच्छब्दस्य तु यज्यवगतयागविशेषान्नाऽन्यो वाच्यार्थोऽस्ति, विशेषवाचित्वात्तस्य । अतश्चाऽर्थान्तरवाचित्वाभावेन न नामधेयस्य नीलशब्दवत्सामानाधिकरण्यम् । किं तर्हि ? 'वैश्वदेव्यामिक्षे'त्यत्राऽऽमिक्षाशब्दवत् । वैश्वदेवीशब्दस्य हि देवतातद्धितान्तत्वात्तद्धितस्य च 'साऽस्य देवते'ति सर्वनामार्थे स्मरणात्सर्वनाम्नां चोपस्थितविशेषवाचित्वेन विशेषपरत्वम् । तत्र कोऽसौ वैश्वदेवीशब्दोपात्तो विशेषः ? इत्यपेक्षायां आमिक्षापदसान्निध्यादामिक्षारूपो विशेष इत्यवगम्यते । यथाऽऽहुः—

(२)'आमिक्षां देवतायुक्तां वदत्येवैष तद्धितः ।

---

१. 'पूष्णोऽहं देवयज्यया पुष्टिमान् पशुमान् भूयासमि' ति पूषानुमन्त्रणमन्त्रः । तत्तद्यागीयहविःप्रक्षेपानन्तरं यजमानेन पठ्यमाना मन्त्रा अनुमन्त्रणमन्त्राः ।

२. (तं. वा. २. २. ९. पृ. ५३३. ) अस्याऽर्थः—एषः 'साऽस्य देवते'त्यधिकारे विहितः अण्प्रत्ययरूपस्तद्धित एव देवतायुक्तमामिक्षारूपं द्रव्यविशेषमभिदधाति । न-

आमिक्षापदसान्निध्यात्तस्यैव विषयार्पण'मिति ।

तथा--

(१)'श्रुत्यैवोपपदस्याऽर्थस्सर्वनाम्ना प्रतीयते ।
तदर्थस्तद्धितेनैवं त्रयाणामेकवाच्यते'ति ॥

तस्माद्यथा वैश्वदेवीशब्दोपात्तविशेषसमर्पकत्वेनाऽऽमिक्षापदस्य वैश्वदेवीशब्देन सामानाधिकरण्यम्, एवं सामान्यस्याऽविधेयत्वात् यज्यवगतयागविशेषसमर्पकत्वेन नामधेयस्य यजिना सामानाधिकरण्यम् । तत्सिद्धं नामधेयानां विधेयार्थपरिच्छेदकतयाऽर्थवत्त्वम् । यथाऽऽहुः--(२) 'तदधीनत्वाद्यागविशेषसिद्धेरि'ति ।

## ( नामधेयानां चातुर्विध्यम् )

नामधेयत्वं च निमित्तचतुष्टयात्-मत्वर्थलक्षणाभयात्, वाक्यभेदभयात्, तत्प्रख्यशास्त्रात्, तद्व्यपदेशाच्चेति । तत्र(३)'उद्भिदा यजेत पशुकाम' इत्यत्रोद्भिच्छब्दस्य यागनामधेयत्वं मत्वर्थलक्षणाभयात । एवं ज्योतिष्टोमादिशब्दानामपि । (४)'चित्रया यजेत पशुकाम'इत्यत्र चित्राशब्दस्य वाक्यभेदभयात्कर्मनामधेयत्वम् । एवं बहिष्पवमानाज्यपृष्ठशब्दानामपि । (५)'अग्निहोत्रं जुहोती'त्यत्राऽग्निहोत्रशब्दस्य कर्मनामधेयत्वं तत्प्रख्य-

---

न्वेवं तद्धितेनैवाऽऽमिक्षोक्तौ आमिक्षापदवैयर्थ्यमिति चेदत्राऽऽह--आमिक्षापदेति । तस्य सन्निहितार्थविशेषवाचित्वेन विहितस्य तद्धितस्य देवतायुक्तामिक्षारूपद्रव्यसमर्पकापेक्षायां आमिक्षापदेन तत्समर्पणं क्रियत इति ॥

१. (तं.वा. २.२.९.पृ. ५३३.) अस्याऽयमर्थः--उपपदस्य आमिक्षारूपस्य योऽर्थः, सः वृत्तिघटकेन 'अस्ये'ति सर्वनाम्ना श्रुत्यैव प्रतीयते, तदर्थ एव च तद्धितेनेति त्रयाणां उपपदतद्धितोपपदसर्वनाम्नां एकवाच्यता एकमेव वाच्यमिति ॥

२. (तं. वा. १. ४. १. पृ. २८४.) वार्तिके नामधेयस्य सार्थक्यप्रतिपादनप्रकरणस्थमिदं वाक्यम् । तदधीनत्वात् नामधेयाधीनत्वादित्यर्थः । 'यजेत' 'जुहुयात्'इत्यादिना यागहोमादिरूपं धात्वर्थसामान्यमेव प्रतीयते । तस्यैव च विधायकप्रत्ययेन विधिर्भवितुमर्हति । तत्तद्विशेषपरिज्ञानं तु तत्तद्वाक्योपात्तैरग्निहोत्रदर्शपूर्णमासादिनामधेयैरेवेत्यर्थः ॥

३. तां ब्रा. १९. ७. २.　　४. तै. सं. २. ४. ६.　　५. तै. सं. १. ५. ९.

शास्त्रात् । तस्य गुणस्य (१)प्रख्यापकशास्त्रस्य (२)विद्यमानत्वेनाऽभिहोत्रशब्दः कर्मनामधेय इति यावत् । एवमाघारादिशब्दानामपि । (३)'श्येनेनाऽभिचरन् यजेत' 'गवाऽभिचर्यमाणो यजेते'त्यत्र श्येनगोशब्दयोः कर्मनामधेयत्वं तद्व्यपदेशात् । तेन व्यपदेशः(४)उपमानं तदन्यथानुपपत्त्येति यावत् । एवं 'सन्दंशेनाऽभिचरन् यजेते'त्यत्र सन्दंशशब्दस्याऽपि । तत्सिद्धं निमित्तचतुष्टयान्नामधेयत्वम् । उत्पत्तिशिष्टगुणबलीयस्त्वमपि पञ्चमं नामधेयत्वे निमित्तं केचिदाहुः—(५)'वैश्वदेवेन यजेते'त्यत्र वैश्वदेवशब्दस्य कर्मनामधेयत्वं उत्पत्तिशिष्टगुणबलीयस्त्वात् । उक्तमत्वर्थलक्षणादिप्रकारचतुष्टयासम्भवात् ।

तदेवं संक्षेपेण निरूपितं मत्वर्थलक्षणादिप्रकारचतुष्टयनिरूपणेन नामधेयानां विधेयार्थपरिच्छेदकतयाऽर्थवत्त्वम् । प्रयोजनं तु तेषां सर्वत्र व्यवहार एव । न ह्यन्तरेण नामधेयं ऋत्विग्वरणादिषु 'अनेनाऽहं यक्ष्य' इत्याख्यानोपायो लघुः कश्चिदस्तीति दिक् ।

## ( वेदादीनां धर्मे प्रामाण्यम् )

एवं पञ्चविधो वेदः प्रामाण्येनैव संस्थितः ।
चोदनासाचिवस्साक्षात्तेन धर्मो जयत्यलम् ॥
(६)पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥
(७)श्रुतिस्स्मृतिस्सदाचारः स्वस्य च प्रियमात्मनः ।
सम्यक् सङ्कल्पजः कामो धर्ममूलमिति स्थितम् ॥
(८)वेदमेव सदाऽभ्यस्येत्तपस्तप्यन् द्विजोत्तमः ।

---

१. अत्र 'अग्निर्ज्योतिर्ज्योतिरग्निस्स्वाहे'त्यादिमन्त्रवर्ण एव तत्प्रख्यापकं शास्त्रम् ।

२. विद्यमानत्वादिति ख. पु. ३. आप. श्रौ. २२. ४. १३.

४. 'यथा वै श्येनो निपत्याऽऽदत्त एवमयं द्विषन्तं भ्रातृव्यं निपत्याऽऽदत्त'इत्याद्यर्थवादेनोपमानोपमेयभावो बोध्यत इति बोध्यम् ।

५. मै. सं. १. १०. ८. ६. याज्ञ. स्मृ. अ. १ श्लो. ३.

७. याज्ञ. स्मृ. अ. १. श्लो. ७. ८. म . अ. २. श्लो. ११६.

वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते ॥
(१)योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥
(२)यज्ञानां तपसां चैव शुभानां चैव कर्मणाम् ।
वेद एव द्विजातीनां निःश्रेयसकरः परः ॥
वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः ।
तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ॥
(३)आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणाऽनुसन्धत्ते स धर्मं वेद नेतरः ॥

(४)स्थाणुरयं भारहारः किलाऽभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ॥
(५)"यस्तित्याज सखिविदं सखायं न तस्य वाच्यपि भागो अस्ति ।
यदीं शृणोत्यलकं शृणोति न हि प्र वेद सुकृतस्य पन्थाम् इति" ॥

"तस्मात्स्वाध्यायोऽध्येतव्यः," "ब्राह्मणेन निष्कारणो धर्मष्षडङ्गो वेदोऽध्येयो ज्ञेयश्च" "न हिंस्यात्सर्वा भूतानि" "अग्नीषोमीयं पशुमालभेत," "श्येनाजिराभ्यामभिचरन् यजेत"

श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ॥
स्वे स्वेऽधिकारे या निष्ठा स गुणः परिकीर्तितः ।

---

१. मनु. अ. २. श्लो. १६८.　　२. याज्ञ. स्मृ. अ. १. श्लो. ४०.
३. मनु. अ. १२. श्लो. १०६.　　४. निरु. अ. १. खं. १८.

५. तै. आ. १. १. ३. यः क्रूरहृदयः पुमान्, सखिविदं मदीयोऽयं सखेति ज्ञातारमन्यं सखायं तित्याज परित्यजति, तस्य सखिद्रोहिणः, वाच्यपि वेदशास्त्राध्ययनेऽपि, भागो भाग्यं नाऽस्ति । यद्यप्ययं सखिद्रोही ईमिदं वेदवाक्यं शृणोति, तथाऽप्यलकमलीकं मिथ्यैव शृणोति । तस्मादयं वेदद्रोही सुकृतस्य पन्थां पुण्यमार्गं न हि प्रवेद सर्वथा न जानाति । इतिशब्दश्शास्त्रान्तरप्रदर्शनार्थः । एवञ्च सखिद्रोहस्याऽन्याय्यत्वादेकस्सखाऽन्यस्मिन्सहयावुपलम्भं वक्तुं नार्हतीति मन्त्रस्याऽभिप्राय इति सिद्धम् ।

विपर्ययस्तु दोषस्स्यादुभयोरेष निर्णयः ॥
इत्येवमादिवाक्यैश्च प्रमाणैर्धर्मतत्परैः ।
उत्थापितमिदं शास्त्रं सन्दिग्धस्वार्थविनिर्णये ॥
वेद एव प्रमाणं स्याद्धर्मेऽधर्मे यथा तथा ।
तद्विचार इदं शास्त्रं निश्चितं वेदवित्तमैः ॥
शास्त्रं धर्मविचाराख्यं द्वादशाध्यायलाक्षितम् ।
पञ्चावयवसंयुक्तसहस्राधिकृतं विदुः ॥
विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम् ।
सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं मतम् ॥
तस्य सङ्ग्राहकश्लोकान् पूर्वाचार्यविनिर्मितान् ।
विविच्य सुखबोधार्थं लिखाम्यनतिविस्तरान् ॥
धर्मो द्वादशलक्षण्यां व्युत्पाद्यस्तत्र लक्षणैः ।
प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकाः ॥
अधिकारोऽतिदेशश्च सामान्येन विशेषतः ।
ऊहो बाधश्च तन्त्रं च प्रसङ्गश्चोदिताः क्रमात् ॥

लक्षणान्यध्यायाः, द्वादशानां लक्षणानां समाहारः द्वादशलक्षणी। तादृशस्य द्वादशाध्यायोपेतस्य शास्त्रस्य धर्मो विषयः। प्रमाणादयः प्रसङ्गान्ता द्वादश पदार्थाः क्रमाद्द्वादशानामध्यायानां विषयः। तथाहि--

**प्रथमेऽध्याये** विध्यर्थवादादिरूपं धर्मस्य प्रमाणं निरूपितम्। **द्वितीयेऽध्याये** यागदानादिकर्मभेदः। तथा च समस्तेनाऽध्यायेन धर्मप्रमाणनिरूपणात् 'कथं लक्षणो धर्म' इत्ययमंशो विचारितः। तद्विचारादेव तत्प्रमेयस्य ज्योतिष्टोमाष्टकादेर्धर्मत्वावधारणात् 'को धर्म' इत्ययमंशोऽपि विचारितो भवति। वेदादिप्रमेयो धर्म इत्यवगतेऽपि न कृत्स्नधर्मस्वरूपमवगतं भवति, किन्तु लक्षणेन इयन्ति धर्मस्वरूपाणीत्यवधारणात्। अतो भेदलक्षणमपि 'को धर्म' इत्यस्मिन्नंशेऽन्तर्गतम्। 'कान्यस्य साधनानी'ति 'अथाऽतः शेषलक्षणमि'त्यादिना तान्यपि ज्ञातुं शक्यन्ते। कर्तुरधिकारिणः

फलं तु षष्ठेन, सर्वं च भेदाभेदशेषशेष्यादि प्रमाणबलेन निरूपणीयमिति प्रमाणलक्षणात्पश्चादारम्भ इति बोध्यम् । **तृतीये** प्रयाजादीनां दर्शपूर्णमासाद्यर्थत्वेन तच्छेषत्वम् । **चतुर्थे** गोदोहनस्य पुरुषार्थत्वप्रयुक्त्याऽनुष्ठानं न तु क्रत्वर्थत्वप्रयुक्त्येत्येवमादयः । **पञ्चमे** क्रमनियतिविधेयत्वादयः । **षष्ठे** कर्तुरविकारो नाऽन्धादेरित्यादयः ।

**सप्तमे** 'समानमितरच्छ्येनेने'त्यादिप्रत्यक्षवचनेनाऽग्निहोत्रादिनाम्नाऽनुमितवचनेन च सामान्यतोऽतिदेशः । **अष्टमे** 'सौर्यं चरुं निर्वपेदि'त्यत्र निर्वापस्तद्धितेन देवतानिर्देशः, एकदैवतत्वमौषधद्रव्यकत्वमित्यादिलिङ्गेनाऽऽग्नेयपुरोडाशे(१)तिकर्तव्यता नाऽन्यस्येत्येवमादिविशेषतोऽतिदेशः । **नवमे** (२)प्रकृतौ 'अग्नये जुष्टं निर्वपामी'ति पठिते मन्त्रे (३)विकृतौ सौर्यचरावग्निपदपरित्यागेन सूर्यपदप्रक्षेपेण 'सूर्याय जुष्टं निर्वपामी'त्येवमाद्यूहः । **दशमे** कृष्णलेषु चोदकप्राप्तस्याऽवघातस्य वितुषीकरणासम्भवेन लोप इत्येवमादिर्बाधः । **एकादशे** बहूनामाग्नेयादीनां प्रधानानां सकृदनुष्ठितेन प्रयाजाद्यङ्गेनोपकार इत्यादि तन्त्रम् । **द्वादशे** प्रधानस्य पशोरुपकारायाऽनुष्ठितेन प्रयाजाद्यङ्गेन पश्वङ्गपुरोडाशेऽप्युपकार इत्यादिप्रसङ्गः ।

पादानामसाधारणं विषयं दर्शयति—

विध्यर्थवादस्मृतयो नाम चेति चतुर्विधम् ।
प्रथमाध्यायगैः पादैः चतुर्भिर्मानमीरितम् ॥

प्रथमे पादे विधिरूपं मानमीरितम् । द्वितीयेऽर्थवादरूपम् । अर्थवादो मन्त्रस्याऽप्युपलक्षकः । तृतीये स्मृतिरूपम् । स्मृतिराचारमप्युपलक्षयति । चतुर्थे उद्भिच्चित्रादिनामरूपम् । विधिश्चोदना, सैव भेदादिसर्वविशेषणविशिष्टे धर्मस्वरूपे प्रमाणमेवेत्यवधारणेन तदितरेषां प्रत्यक्षादीना-

---

१. इतिकर्तव्यता अङ्गकलापः ।

२. अतिदेशेन यत्राऽङ्गानामप्राप्तिस्तत्कर्म प्रकृतिशब्देनाऽभिधीयते । यथा दर्शपूर्णमासादिः ।

३. यस्मिन् कर्मणि समग्राङ्गोपदेशो नाऽस्ति तत्कर्म विकृतिरित्युच्यते । यथा सौर्यादिः ।

मप्रामाण्यं सूचितम् । न चैवमर्थवादादीनामप्रामाण्यं स्यादिति वाच्यम् । तुल्यजातीयापेक्षत्वादवधारणस्य । यथा शुक्लः पट इत्युक्ते कृष्णादीनामेव निवृत्तिर्न तु द्रव्यादीनाम् , एवं चोदनैवेत्यवधारणेन प्रत्यक्षादीनामेव व्यावृत्तिर्न त्वर्थवादादीनाम् । चोदनैकवाक्यतया चोदनामूलतया च प्रमाणीभवतां तेषां चोदनाविषयेणाऽवधारणेन न प्रमाण्यं निरस्तम्, नाऽपि साधितम् । अत उपरितनपादत्रयं तत्साधनपरमिति बोध्यम् । (१)तथा चाऽऽहुः--

इति प्रमाणत्वमिदं च सिद्धमुक्त्वेह धर्मं प्रति चोदनायाः ।
अतः परं च प्रविभज्य वेदं त्रेधा ततो वक्ष्यति तस्य योऽर्थः ॥ इति॥

**अथ द्वितीयाध्यायपादार्थसङ्ग्रहारम्भः—**

उपोद्घातः कर्मभेदमानं तस्याऽपवादगीः ।
प्रयोगभेद इत्येते द्वितीयाध्यायपादगाः ॥

द्वितीयाध्यायस्य प्रथमे पादे आख्यातमेवाऽपूर्वबोधकम्, अपूर्वसद्भावश्चेत्यादिकः कर्मभेदचिन्तोपयुक्तोपोद्घातो वर्णितः । द्वितीये धातुभेदपुनरुक्त्यादिभिः कर्मभेदः । तृतीये रथन्तरादीनां कर्मभेदप्रामाण्यापवादः । चतुर्थे नित्यकाम्ययोः प्रयोगभेदः ।

**अथ तृतीयाध्यायपादार्थसङ्ग्रहारम्भः—**

श्रुतिर्लिङ्गं च वाक्यादि विरोधप्रतिपत्तयः ।
अनारभ्योक्तिबह्वर्थस्वाम्यर्था अष्टपादगाः ॥

तृतीयाध्यायस्य प्रथमे पादे शेषत्वबोधकानां श्रुतिलिङ्गादीनां मध्ये श्रुतिर्विचारिता । द्वितीये लिङ्गम् । तृतीये वाक्यप्रकरणादि । चतुर्थे निवीतोपवीतादिष्वर्थवादत्वविधित्वादिनिर्णयहेतुः श्रुत्यादेः परस्परविरोधसदसद्भावः । पञ्चमे प्रतिपत्तिकर्माणि । अवशिष्टस्य कोऽप्युपयोगो वाचनिकः प्रतिपत्तिः । यथा पुरोडाशभक्षणादि । षष्ठेऽनारभ्याधीतानि । सप्तमे बहुप्रधानोपकारकप्रयाजादीनि । अष्टमे याजमानानि ।

---

१. श्लोकवार्तिकान्ते वार्तिककारा इति शेषः ।

अथ चतुर्थाध्यायपादार्थसङ्ग्रहः—

प्रधानस्य प्रयोक्तृत्वमप्रधानप्रयोक्तृता ।
फलचिन्ता जघन्याङ्गचिन्तेत्येते चतुर्थगाः ॥

चतुर्थाध्यायस्य प्रथमे पादे प्रधानभूताऽऽमिक्षा दध्यानयनस्य प्रयोजिकेत्यादिप्रधानप्रयोक्तृत्वं विचारितम् । द्वितीये त्वप्रधानं वत्सापाकरणं शाखाच्छेदने प्रयोजकमित्याद्यप्रधानप्रयोक्तृत्वं विचारितम् । तृतीये जुहूपर्णमयीत्यादेरपापश्लोकश्रवणादिफलभावाभावचिन्ता । चतुर्थे राजसूयगतजघन्याङ्गामिक्षाद्यूतादिचिन्ता ।

अथ पञ्चमाध्यायपादार्थसङ्ग्रहः—

श्रुत्यादिः क्रमस्तस्य विशेषो वृध्यवर्धने ।
श्रुत्यादेर्बलिता चेति पञ्चमाध्यायपादगाः ॥

पञ्चमाध्यायस्य प्रथमे पादे श्रुत्यर्थपाठादिभिः क्रमो निरूपितः । स च विधिनिरूपणे स्फुटीभविष्यति । द्वितीये वाजपेयगतेषु सप्तदशसु पशुष्वेकैकधर्मसमापनमित्यादिक्रमविशेषः । तृतीये पञ्चप्रयाजादीनामावर्तनेनैकादशत्वमित्यादिवृद्धिः, अदाभ्यग्रहचित्रिण्योरनावृत्तिरित्यादिवृध्यभावः । चतुर्थे क्रमनियामकानां श्रुत्यर्थपाठादीनां प्रबलदुर्बलभावः ।

अथ षष्ठाध्यायपादार्थसङ्ग्रहः—

अधिकारी तस्य धर्माः प्रतिनिध्यर्थलोपने ।
दीक्षा सत्रं देयवह्नी षष्ठे पादेष्वमी स्थिताः ॥

षष्ठाध्यायस्य प्रथमे पादे कर्माधिकारः कर्तुरस्ति, अन्धादेर्नाऽस्ति । स्त्रिया अस्ति, योऽस्ति स च पत्या सहेत्येवमादिनाऽधिकारी निरूपितः । द्वितीये सत्राधिकारिणां प्रत्येकं कृत्स्नं फलम्, दर्शपूर्णमासयोः कर्त्रैक्यनियमः, काम्यकर्म समापनीयमित्येवमादयोऽधिकारिधर्मा उक्ताः । तृतीये द्रव्यस्य प्रतिनिधिरस्ति देवादीनामग्न्यादीनामधिकारिणश्च स नाऽस्तीत्यादिनिरूपणम् । चतुर्थे पदार्थलोपनं विचारितम्, अवत्तनाशे सति आज्येन यजेत, इडार्थस्य नाशे सति शेषं न ग्राह्यमित्यादिकम् । पञ्चमे कालापराधेन चन्द्रोदये सत्यभ्युदयेष्टिः प्रायश्चित्तम्, ज्योतिष्टोमस्यै-

कादयो दीक्षाः, द्वादशाहस्य द्वादश दीक्षा इत्यादि निरूपितम् । षष्ठे सत्राधिकारिणस्तुल्यकक्ष्या एव, सत्रं विप्रस्यैवेत्येवमादिकं चिन्तितम् । सप्तमे पित्रादिकं न देयम्, महाभूमिर्न देयेत्येवमादिर्देयविचारः । अष्टमे लौकिकाग्नौ उपनयनहोमः स्थपतीष्टिस्तथैवेत्येवमाद्यग्निविचारः कृतः ।

अथ सप्तमाध्यायपादार्थसङ्ग्रहः—

प्रत्यक्षोक्त्याऽतिदेशोऽस्य शेषस्सामानिरूपणात् ।
नामलिङ्गातिदेशौ द्वौ सप्तमाध्यायपादगाः ॥

सप्तमाध्यायस्य प्रथमे पादे 'समानमितरच्छ्येनेने'त्यादिप्रत्यक्षवचनातिदेशः । द्वितीये रथन्तरशब्देन गानमात्राभिधायिना गानस्यैवातिदेश्यत्वमित्येतादृशः पूर्वोक्तातिदेशस्य शेषो विचारितः । तृतीयेऽग्निहोत्रनाम्नाऽतिदेशः । चतुर्थे निर्वापौषधद्रव्यादिलिङ्गातिदेशः ।

अथाऽष्टमाध्यायपादार्थसङ्ग्रहः—

स्पष्टलिङ्गादथाऽस्पष्टात्प्रबलादपवादतः ।
अतिदेशविशेषास्स्युरष्टमाध्यायपादगाः ॥

अष्टमस्य प्रथमे पादे स्पष्टेन लिङ्गेनाऽतिदेशविशेषः । तद्यथा—सौर्यचरावतिदेशकानि निर्वापः, तद्धितेन देवतानिर्देशः, एकदेवतात्वमित्यादीनि स्पष्टान्याग्नेयलिङ्गानि । द्वितीये त्वस्पष्टैर्लिङ्गैरातिदेशः । तद्यथा-(१)वाजिने हविस्सामान्येन लिङ्गेन पयोविध्यन्तोऽतिदिश्यते । तत्र लिङ्गमस्पष्टम्, शीघ्रं तद्बुध्यनुत्पादनात् । तृतीये प्रबलेन लिङ्गेनाऽतिदेशः । तद्यथा—(२)आभिचारिकेष्टौ आग्नावैष्णवसारस्वतबार्हस्पत्येषु हविष्षु त्रित्वेन लिङ्गेन यथाक्रममाग्नेयादिविध्यन्ते प्राप्ते द्विदेवत्यत्वेन लि-

१. चातुर्मास्येषु 'वाजिभ्यो वाजिनमि'ति विहिते वाजिनयाग इत्यर्थः । तप्ते पयसि दध्न्यासिक्ते सति तत्पयः घनीभूतत्वेन द्रवीभूतत्वेन च द्विधा परिणमति । तत्र घनीभूतं यत्तदामिक्षापदवाच्यम् । द्रवीभूतं यत्तद्वाजिनम् ।

२. 'आग्नावैष्णवमेकादशकपालं निर्वपेत्, सारस्वतं चरुं, बार्हस्पत्यं चरुमभिचरन्नि'ति ( का. सं. १०. १. ) वाक्यविहितायामिष्टावित्यर्थः ।

Acc. No 6975
dt 29.10.65



ङ्गेन प्रथममाग्नावैष्णवे तृतीयस्थानीयस्याऽग्नीषोमीयस्य विध्यन्तोऽतिदिष्टः (१)प्रबलश्च द्विदेवत्यत्वम्, शब्दोच्चारणमात्रेण सहसा प्रतिभासात्। क्रमस्तु विलम्बितप्रतीत्या दुर्बलः। चतुर्थे (२)दर्विहोमेऽतिदेशोऽपोद्यते ।

अथ नवमाध्यायपादार्थसङ्ग्रहः—

ऊहारम्भोऽथ सामोहो मन्त्रोहस्तत्प्रसङ्गजः ।
नवमाध्यायपादेषु चतुर्ष्वेते प्रकीर्तिताः ॥

नवमाध्यायस्य प्रथमे पादे उपोद्घातपूर्वकमूहविचारारम्भः । ऊहो नाम प्राकृतस्य प्रयोगस्याऽन्यथाभावः । तत्र प्रयाजादयो धर्मा अपूर्वप्रयुक्ताः, अवघातमन्त्रादिष्वविवक्षितं व्रीह्यग्न्यादिस्वरूपम्, साधनविशेषत्वमात्रं विवक्षितमित्येवमादिरूपोद्घातः । सावित्राश्विपूषशब्दानां विकृतिषु नाऽस्त्यूहः, अग्निशब्दस्याऽस्त्यूह इत्याद्यूहविचारारम्भः । द्वितीये सपरिकरस्सामोहः । तृतीये मन्त्रोहः । चतुर्थे मन्त्रोहप्रसङ्गापातितो विचारः ।

अथ दशमाध्यायपादार्थसङ्ग्रहारम्भः—

द्वारलोपोऽस्य विस्तारः कार्यैकत्वं समुच्चयः ।
ग्रहसामप्रकीर्णानि नञर्थाश्चाऽष्टपादगाः ॥

दशमाध्यायस्य प्रथमे पादे बाधहेतुर्द्वारलोपो निरूपितः । तद्यथा—(३)'स्वयं कृता वेदिर्भवती'त्यत्र वेदिनिष्पादनरूपस्य लोपेन निष्पाद-

---

१. प्रथमद्वितीयभावस्येतरनिरूप्यत्वेन विलम्बितत्वान्निरपेक्षतयोत्पत्तिवेलायामेव प्रथमप्रतीतदेवतासामान्यं प्रबलमिति देवतासामान्यात्प्रथमस्थानेऽप्याग्नावैष्णवे तृतीयस्थानाग्नीषोमीयविध्यन्तः, तृतीयस्थानेऽपि बार्हस्पत्ये प्रथमस्थानाग्नेयविध्यन्त इति भावः ।

२. याज्यापुरोनुवाक्याभ्यां विना स्वाहाकारान्तमन्त्रप्रदेयतया विहिता ये होमास्ते दर्विहोमाः कथ्यन्ते ।

३. राजसूयान्तर्गतमैत्राबार्हस्पत्येष्टौ 'स्वयं कृता वेदिर्भवती'ति श्रूयते । यथावस्थित एव भूप्रदेशो वेदित्वेन स्वीकर्तव्य इति तदर्थः । अनेन प्रकृतौ 'स्फ्येनोत्तमां त्वचमुद्धन्ति' 'देवस्य त्वा सवितुः प्रसव इति खनति' 'स्फ्येन वेदिं परिलिखन् परिगृह्णाति' ( आप. श्रौ. प्र. २. कं. १. सू. ३, ४, ७. ) इत्यादिवाक्यविहितानां वेदिनिष्पादकानां उद्धननखननपरिलेखनानामुपकारस्य विकृतावत्राऽभावाद्बाधस्सिध्यतीति भावः । उत्तमां त्वचम्—वेदिभूमेरुपरितनीं मृदमित्यर्थः ।

कानामुद्धननादीनां बाधः । (१)कृष्णलेषु वितुषीकरणस्य द्वारस्य लोपेनाऽवघातस्य बाधः । बाधो द्विविधः । प्राप्तबाधः अप्राप्तबाधश्चेति । तत्र तार्तीयबाधो द्वितीयः । तत्र हि यावद्दुर्बलेन प्रमाणेन विनियोगः कर्तुमारभ्यते तावदेव प्रबलप्रमाणेन विनियोगः क्रियत इति तद्बोधितेनेतरबाधोऽप्राप्तबाधः, दुर्बलप्रमाणस्याऽप्रवृत्तत्वात् । प्राकृतस्य त्वङ्गस्य विकृतौ चोदकप्राप्तस्य प्रत्याम्नानादर्थलोपात्प्रतिषेधाद्वा यो बाधस्स प्राप्तबाधः । यथा—प्राकृतानां कुशानां (२)प्रतिकूलशराम्नानात्, यथा—अवघातस्य द्वारलोपात् । यथा वा—पित्र्येष्टौ होतृवरणस्य (३)'न होतारं वृणीत' इति प्रतिषेधादिति बोध्यम् ।

द्वितीये सङ्क्षेपेणोक्तस्य द्वारलोपस्य बहुभिरुदाहरणैर्विस्तरः । तृतीये बाधकारणं कार्यैकत्वम् । तद्यथा—प्रकृतौ गवाश्वादिदक्षिणाया ऋत्विक्परिक्रयः कार्यम् । तथा विकृतिरूपे भूनाम्न्येकाहे धेनुरूपाया दक्षिणायास्तदेव कार्यम्, ततो धेन्वा गवाश्वादिदक्षिणा विकृतौ चोदकप्राप्ता बाध्यते । चतुर्थे नक्षत्रेष्टिविहिता (४)उपहोमाश्चोदकप्राप्तैः (५)नारिष्ठहोमैस्सह समुच्चीयन्त इत्यादिस्समुच्चयः । पञ्चमे षोडशिग्रहः प्रकृतिगामी, स चाऽऽग्रयणपात्रादेव गृहीतव्य इत्यादिबाधप्रसङ्गागतो ग्रहादिविचारः । षष्ठे 'एकं साम तृचे गेयमि'त्यादिबाधप्रसङ्गागतस्सामविचारः । सप्तमे(६)

१. 'प्राजापत्यं घृते चरुं निर्वपेत् शतकृष्णलमायुष्काम' ( मै. सं. २. २. २ ) इति विहितायुष्कामेष्टयङ्गभूतेष्वित्यर्थः । कृष्णलशब्दस्सुवर्णशकलवाचकः ।

२. 'रौद्रीं रोहिणीमालभेताऽभिचरन्' इति विहितेष्टौ 'शरमयं बर्हि'रित्यनेन प्राकृतबर्हिःकार्ये शराणां विधानादित्यर्थः । शराः काशविशेषाः ।

३. मै. सं. १. १०. १८.

४. नक्षत्रेष्टौ "अग्नये स्वाहा, कृत्तिकाभ्यस्स्वाहा, अम्बायै स्वाहा, दुलायै स्वाहे" त्यादिमन्त्रैः क्रियमाणा होमा उपहोमाः ।

५. प्रकृतौ दर्शपूर्णमासयोः प्रधानहोमादूर्ध्वं नारिष्ठदेवताका होमा विहिताः—'नारिष्ठान्होमाञ्जुहोती'ति (आप. श्रौ. प्र. २. कं. २० सू. ६) । ते च 'दश ते तनुवो यज्ञ यज्ञियास्ताः प्रीणातु यजमानो घृतेने'त्यादिमन्त्रैस्स्रुवेण कार्याः ।

६. अवदीयमानश्च द्रव्यं हविश्शब्देनोच्यते । अवदानं नाम समुदितद्रव्यतो होमा-

पश्वङ्गेषु हविर्भेदः, (१)गृहमेधीयमपूर्वं कर्मेत्यादिबाधप्रसङ्गागतः प्रकीर्णविचारः । अष्टमे (२)'नाऽनुयाजेष्वि'ति पर्युदासः, 'न सोम' इत्यर्थवादः, (३)'नाऽतिरात्र' इति प्रतिषेध इत्यादिर्बाधोपयुक्तो नञर्थविचारः ।

(४)पर्युदासस्स विज्ञेयो यत्रोत्तरपदेन नञ् ।
प्रतिषेधस्स विज्ञेयः क्रियया सह यत्र नञ् ॥

यद्यजतिषु ये यजामहं करोति तदनुयाजव्यतिरिक्तेष्विति पर्युदासे

र्थं पृथक्करणरूपो हविष्ट्वप्रयोजकस्संस्कारः । तच्च पशावेकादशाङ्गानां 'हृदयस्याऽग्रेऽवद्यति अथ जिह्वायाः' इत्यादिवाक्यैर्विहितम् । अतश्च प्रत्येकमवदानस्य विहितत्वात् , अवदीयमानस्यैव च हविष्ट्वात् हविर्भेदसिद्धिः ।

१. चातुर्मास्येषु चत्वारि पर्वाणि—वैश्वदेवः, वरुणप्रघासः, साकमेधः, शुनासीरीयश्चेति । तत्र साकमेधाख्ये तृतीये पर्वणि 'मरुद्भ्यो गृहमेधिभ्यस्सर्वासां दुग्धे सायमोदनमि'ति ( मै. सं. १. १०. १ ) वाक्यविहितं कर्म गृहमेधीयमित्युच्यते ।

२. 'नाऽनूयाजेषु ये यजामहं करोती'ति समग्रं वाक्यम् । अत्राऽयं विषयः—'आश्रावयेति चतुरक्षरम्, अस्तु श्रौषडिति चतुरक्षरम् , यजेति द्व्यक्षरम् , ये यजामह इति पञ्चाक्षरम् , द्व्यक्षरो वषट्कारः, एष वै सप्तदशः प्रजापतिर्यज्ञमन्वायत्तः' इत्यनारभ्याधीतवाक्येन यजतिचोदनाचोदितेषु कर्मसु पठनीयतया सप्तदशाक्षराणि विहितानि । तानि च 'अनूयाजान्यजती'ति यजतिचोदनाचोदिते अनूयाजाख्ये कर्मण्यपि पठनीयत्वेन प्राप्तानि । तत्र नाऽनूयाजवाक्येन ये यजामहकरणे प्रतिषिध्यमाने विकल्पप्रसक्तिस्स्यादिति हेतोः पर्युदास अङ्गीकृतः । तथा चाऽनूयाजव्यतिरिक्तेषु यागेषु ये यजामहः कर्तव्य इति बोधस्सम्पन्नः । विशेषतश्चाऽस्य विवरणं सारविवेचिन्यां न्यायप्रकाशव्याख्यायां (पृ० १६४) अस्मद्गुरुचरणैः कृतम् , तत एव तदवगन्तव्यम् ।

३. 'नाऽतिरात्रे षोडशिनं गृह्णाती'ति समग्रं वाक्यम् । अस्याऽयमर्थः—ज्योतिष्टोमनामके सोमयागे सन्ति चतस्रस्संस्थाः–अग्निष्टोमः, उक्थ्यः, षोडशी, अतिरात्रश्चेति । संस्था नाम क्रतुप्रयोगवृत्तिस्तोत्रोपरमः । येन स्तोत्रेण क्रतुप्रयोगस्समाप्यते तेनैव स्तोत्रेण सा संस्था व्यपदिश्यते । अत्राऽग्निष्टोमादिशब्दाः शक्त्या तत्तत्संस्थास्वेव प्रयुज्यन्ते, निरूढलक्षणया तादृशसंस्थावति ज्योतिष्टोमे, सम्प्रतिकलक्षणया तद्वति क्रत्वन्तरे, गौण्या वृत्त्या ग्रहणे स्तोत्रे च । प्रकृते तु अतिरात्रशब्देन तत्संस्थाको ज्योतिष्टोमो विवक्षितः, षोडशिशब्देन च षोडशिग्रहः । तथा चाऽतिरात्रसंस्थाके ज्योतिष्टोमे षोडशिसंज्ञकं ग्रहं न गृह्णीयादिति प्रकृतवाक्यार्थो बोध्यः । अत्र ग्रहो नाम सोमरसाधारभूत उलूखलाकारः पात्रविशेष इति बोध्यम् ।

४. लक्षणवाक्यद्वयमपीदं हरिकारिकायां श्लोकद्वयस्याऽर्धार्धात्मकम् ।

विधेरेव विशेषितत्वम्। 'न तौ पशौ करोती'त्याज्यभागौ निषिध्य पश्चात् 'न सोमेऽध्वर' इत्याम्नायते। यथा न तौ सोमे करोति तथा न तौ पशौ कुर्यादिति तदर्थः ॥

अथैकादशाध्यायपादार्थसङ्ग्रहः—

उपोद्घातस्तथा (१)तन्त्रावापौ तन्त्रस्य विस्तृतिः।
आवापविस्तृतिश्चैकादशाध्यायस्य पादगाः ॥

एकादशाध्यायस्य प्रथमे पादे तन्त्रस्योपोद्घातो वर्णितः। द्वितीये तन्त्रावापौ सङ्क्षेपेणोक्तौ। तृतीये तन्त्रमुदाहरणबाहुल्येन प्रपञ्चितम्। चतुर्थे तथैवाऽऽवापः प्रपञ्चितः।

अथ द्वादशाध्यायपादार्थसङ्ग्रहः—

(२)प्रसङ्गस्तन्त्रिनिर्णीतिः समुच्चयविकल्पने।
द्वादशाध्यायपादार्था इति पादार्थसङ्ग्रहः ॥

तृतीयपादे समुच्चयस्य प्राधान्येन निर्णयः, चतुर्थे तु विकल्पस्येति बोध्यम्। द्वादशाध्यायस्य प्रथमे पादे(३)पशुधर्माणां (४)पशुपुरोडाशे प्रसङ्गः, सौमिकवेदेरुत्तरकालीनकर्मसु प्रसङ्ग इत्यादिविचारः। द्वितीये सवनीयपशोस्तन्त्रित्वम्, न तु सवनीयपुरोडाशानाम्। विकृतिस्तन्त्रिणी न प्रकृतिः। अन्वारम्भणीया विकृतिष्वपि स्यात्, न तु प्रकृतावेवेत्यादिविचारः। तृतीये त्वग्वाससोस्समुच्चयः, आधारगतानामृजुत्वसन्ततत्वादीनां समुच्चय इत्यादिकं प्राधान्येन, यवव्रीह्योर्विकल्प इत्यादिकं समुच्चयापवादत्वेनेत्युभयं चिन्तितम्। चतुर्थे चैन्द्राबार्हस्पत्ययाज्यानुवाक्यायुगलयोर्विकल्प इत्यादिकं प्राधान्येन, याज्यानुवाक्ययोस्समुच्चय इत्यादिकं विकल्पापवादत्वेनेत्युभयं चिन्तितम्। तदेवं द्वादशाध्यायगतेषु षष्टिसङ्ख्याकेषु

---

१. अनेकोद्देशेन सकृदनुष्ठानं तन्त्रम्। आवृत्तिरावापः।

२. अन्यत्र उपकारलाभप्रयुक्ताङ्गाननुष्ठानं प्रसङ्गः।

३. यद्यपि सर्वत्र पशुधर्मपदेन उपाकरणनियोजनादयः पदार्था गृह्यन्ते, तथाऽप्यत्र प्रकृतितश्चोदकप्राप्तानि यानि प्रयाजानूयाजाद्यङ्गानि तानि पशुधर्मपदेन ग्राह्याणि।

४. पशुयागाङ्गभूतः यस्तद्देवताकः पुरोडाशयागः, सः पशुपुरोडाशशब्देनोच्यते।

पादेषु प्रतिपाद्या अर्थास्सङ्गृहीताः ।

ननु—यथोक्तेभ्यः पादेभ्योऽर्था बहवस्तत्तत्पादेषु विचार्यन्ते तेषां कथं तत्तत्पादान्तर्भाव इत्याशङ्क्याऽऽह—

उपोद्घातापवादाभ्यां प्रसङ्गानुप्रसङ्गतः ।
तत्तत्पादगतत्वेन विचारान्तरमुन्नयेत् ॥

यथोक्तपादप्रतिपाद्यादन्येष्वर्थेषु यथोचितं कश्चिदुपोद्घातः, कश्चिदपवादः, कश्चित्प्रसङ्गपतितः, कश्चिदनुप्रसङ्गपतित इत्येवं पादान्तर्भाव उन्नेयः ।

## ( पादानां क्रमनिरूपणम् )

ननु सन्त्वेवमध्यायानां पादानां च व्यवस्थिता अर्थाः, तदीयस्तु क्रमः कथमवगन्तव्य इत्यत आह—

शास्त्रपूर्वोत्तरीभावोऽध्यायानामभिधास्यते ।
पादानां तु तमत्रैव लेशादुत्पादयामहे ॥

एकस्मिन्नध्याये समाप्ते सति अध्यायान्तरारम्भे तयोरध्याययोः पूर्वोत्तरीभावो वक्ष्यते । प्रथमाध्यायद्वितीयाध्यायगतानां पादानां पूर्वोत्तरीभावे उदाहृते सति तद्व्युत्पत्त्या पादान्तरेष्वपि तस्योत्प्रेक्षितुं शक्यतया तमुदाहरति—

विधिस्साक्षान्मितिर्धर्मे तस्य शेषोऽर्थवादगीः ।
वेदमूला स्मृतिर्नाम वाक्यांशोऽमीष्वतः क्रमः ॥

जिज्ञास्यत्वेन प्रतिज्ञाते धर्मे विधिवाक्यं साक्षात्प्रमाणमिति तद्विचारः प्रथमे पादे युक्तः । अर्थवादवाक्यस्य विधिद्वारा प्रामाण्याद्विध्यनन्तरभावित्वम् । स्मृतिवाक्यस्य सार्थवादविधिरूपवेदमूलतया प्रामाण्यादर्थवादोत्तरभावित्वम् । नामधेयस्य वाक्यैकदेशत्वेन पूर्वोक्तत्रिविधवाक्यविचारोत्तरकालीनत्वम् । तथा द्वितीयादौ—(१)'भावार्थाः कर्मशब्दास्तेभ्यः क्रिया

१. जै. सू. २. १. १.

प्रतीयेतैष ह्यर्थो विधीयते'–(१)'धर्मः प्रतिपदं न तु, भावार्थस्य फलार्थत्व'मित्यधिकरणद्वयेनाऽऽख्यातप्रत्ययान्ताद्धातुपदादपूर्वं गम्यत इति स्थापितम्। तस्य पुनरपूर्वं द्वारमस्ति नेति सद्भावं साधयित्वा, (२)'आख्यातद्वैधमिष्टं नः' इत्येवमाद्यधिकरणैस्तदपवादतत्प्रसक्तानुप्रसक्तचिन्तया सर्वः पादो वक्ष्यमाणकर्मभेदचिन्तोपयुक्ततया उपोद्घातत्वेन वर्णितः। द्वितीयाध्यायद्वितीयपादे तु (३)शब्दान्तराभ्याससङ्ख्यानामधेयगुणैः कर्मभेदः। एवमुपजीव्योपजीवकभाव उभयोर्द्रष्टव्यः। तृतीयपादे तु ज्योतिष्टोम एव रथन्तरादिसामगुणविधानं न ततः कर्मान्तरस्य। एवं (४)राजसूयान्तर्गतावेष्टेर्न कर्मान्तरत्वमित्येवमादिगुणप्रसङ्गागतं निरूप्य पुनः (५)प्रकरणा-

---

१. २. श्रीशङ्करभट्टविरचितमीमांसासारसङ्ग्रहस्थश्लोकैकदेशोऽयम्। ( मीमां. सं. श्लो. १८,१९ )

३. 'सोमेन यजेत' 'दाक्षिणानि जुहोति' 'हिरण्यमात्रेयाय ददाती'त्येकप्रकरणपठितानां यागहोमदानानां अपर्यायधातुरूपात् शब्दान्तरात्, 'समिधो यजति' 'तनूनपातं यजति' 'इडो यजति' इत्यसकृच्छ्रुतानां यागानां विधिपुनःश्रवणरूपादभ्यासात्, 'तिस्र आहुतीर्जुहोती' त्यत्रोत्पत्तिवाक्यगतात्रित्वसङ्ख्यया, 'अथैष ज्योतिरथैष विश्वज्योतिरथैष सर्वज्योति' रित्यत्र ज्योतिरादिनामधेयेन, 'सा वैश्वदेव्यामिक्षा, वाजिभ्यो वाजिनमि' त्यत्र च पूर्वत्राऽसम्भवन्निवेशाद्गुणात्कर्मभेदो बोध्यः।

४. 'आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणा, ऐन्द्रमेकादशकपालमृषभो दक्षिणा, वैश्वदेवं चरुं पिशङ्गी पष्ठौही दक्षिणा, मैत्रावरुणीमामिक्षां वशा दक्षिणा, बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणा' इत्येतैर्वाक्यै राजसूये 'दिशामवेष्टयो भवन्ती' ति प्रकृत्य विहितानि पञ्च कर्माण्यवेष्टिसंज्ञकानि। दिक्सम्बन्धिमामुन्मादयितॄणामवजननहेतुत्वादवेष्टिरिति संज्ञा सम्पन्ना।

५. अनुपादेयगुणयुक्तानुपस्थितिः प्रकरणान्तरम्। पुरुषकृत्या सम्पादयितुं शक्या गुणा उपादेयाः। तद्भिन्ना अनुपादेयाः। ते च—देशः, कालः, निमित्तम्, फलम्, संस्कार्यश्चेति पञ्चप्रकाराः। एतद्विशिष्टा याऽनुपस्थितिः प्रकरणादिना उपस्थित्यभावः, सा प्रकरणान्तरम्। तेन कर्मभेदो यथा—कुण्डपायिनामयने 'उपसद्भिश्चरित्वा सोममुपनह्य मासमग्निहोत्रं जुहुती'ति श्रुतम्। अत्र मासरूपानुपादेयगुणसत्त्वात्, नित्याग्निहोत्रस्य च प्रकरणाभावेनाऽनुपस्थितत्वात, तदुद्देशेन मासादिगुणविधानासम्भवात्, विधेयतायाश्च प्रकृते उपादेयताव्यधिकरणत्वे प्रमाणाभावान्मासादिगुणविशिष्टमग्निहोत्रनामकं नित्याग्निहोत्रादन्यदेव कर्म विधीयते।

न्तरादिभिः कर्मभेदः प्रतिपादितः । चतुर्थे तु 'यावज्जीवमग्निहोत्रं जुहोती'ति जीवनं निमित्तीकृत्याऽग्निहोत्रकर्मविधानम्, शाखाभेदेऽपि न कर्मभेद इति चोक्तम् । तथा चोभयोः पादयोश्शेषशेषिभाव उपपादितो भवतीति । अनेन न्यायेनोत्तराध्यायगतपादानां परस्परं क्रम उन्नेयः ।

इत्थं शास्त्रस्याऽध्यायानां पादानां च क्रमविशेषविशिष्टानामसाधारणप्रतिपाद्यमर्थं निरूप्य तन्निर्णयफलं दर्शयति—

ऊहित्वा सङ्गतीस्तिस्रस्तथाऽवान्तरसङ्गतिम् ।
ऊहेदाक्षेपदृष्टान्तप्रत्युदाहरणादिकाम् ॥

## ( सङ्गतिनिरूपणम् )

शास्त्रादिप्रतिपाद्यार्थसम्बन्धितयाऽधिकरणे योजिते सति तस्याऽधिकरणस्य शास्त्रसङ्गतिरध्यायसङ्गतिः पादसङ्गतिश्चेति तिस्र ऊहिता भवन्ति । तद्यथा—प्रथमाध्यायप्रथमपादस्य द्वितीयाधिकरणे धर्मस्य लक्षणप्रमाणराहित्यं पूर्वपक्षीकृत्य तत्सद्भावः प्रतिपादितः । तस्याऽधिकरणस्य धर्मसम्बन्धितया धर्मविचारशास्त्रे सङ्गतिः । प्रमाणविचाररूपत्वात्प्रथमाध्यायसङ्गतिः । विधिवाक्यस्य प्रमाणत्वेनोपन्यासात्प्रथमपादे सङ्गतिः ।

## ( अधिकरणसङ्गतिः )

यथैतत्सङ्गतित्रयमूहितम्, तथा पूर्वोत्तराधिकरणयोः परस्परमवान्तरसङ्गतिरूहनीया । सा चाऽनेकरूपा—आक्षेपसङ्गतिः, दृष्टान्तसङ्गतिः, प्रत्युदाहरणसङ्गतिः, प्रासङ्गिकसङ्गतिः, उपोद्घातसङ्गतिश्चेति । एवमादिरूपाणामाक्षेपादिसङ्गतीनामूहं व्युत्पादयति—पूर्वन्यायस्य सिद्धान्तयुक्तिं वीक्ष्य परे नये पूर्वपक्षोक्तयुक्तिं च, तत्राऽऽक्षेपादि योजयेत् । तदेतत्सर्वं योजयित्वा प्रदर्श्यते—

## ( आक्षेपसङ्गतिः )

प्रथमेऽध्याये प्रथमपादस्य प्रथमाधिकरणगतो धर्मविचारशास्त्रं वैधमिति सिद्धान्तः । अर्थज्ञानहेतावध्ययने नियमविधेस्सम्भवादिति तद्युक्तिः । द्वितीयाधिकरणे धर्मे लक्षणं प्रमाणं च नाऽस्तीति पूर्वपक्षः, लौकिका-

कारहीनत्वात्प्रत्यक्षाद्यप्रवृत्तेश्चेति तद्युक्तिः । तया युक्त्या धर्मस्य लक्षणप्रमाणरहितत्वे सति नरविषाणसमो धर्म इति तद्विचारशास्त्रस्य विधेयत्वमनुपपन्नमित्याक्षेपसङ्गतिः ।

( दृष्टान्तसङ्गतिः )

यथा प्रथमाधिकरणे नियमविधिसम्भवेन हेतुना विचारशास्त्रस्य विधेयत्वमुक्तम्, तथा द्वितीयाधिकरणे लौकिकाकारहीनत्वप्रत्यक्षाद्यप्रवृत्तिरूपेण हेतुना धर्मप्रमाणे न स्त इति दृष्टान्तसङ्गतिः ।

( प्रत्युदाहरणसङ्गतिः )

यथा प्रथमाधिकरणसिद्धान्ते पूर्वोक्तयुक्तिरवलोक्यते, तथा द्वितीयाधिकरणसिद्धान्ते काञ्चिदपि युक्तिं न पश्याम इति प्रत्युदाहरणसङ्गतिः । एते प्रत्युदाहरणदृष्टान्तसङ्गती मन्दबुद्धिभिरपि सर्वत्रोत्प्रेक्षितुं शक्येते ।

( प्रसङ्गसङ्गतिः )

पञ्चमाधिकरणे विधिवाक्यस्य निरपेक्षत्वात्प्रामाण्यं वर्णितम् । तस्य च वाक्यस्य शब्दार्थयोर्मध्ये शब्दकोटिनिविष्टत्वात्, वाक्यप्रसङ्गेन शब्दनित्यत्वं षष्ठाधिकरणे वर्ण्यत इति प्रासङ्गिकी सङ्गतिः ।

( उपोद्धातसङ्गतिः )

सप्तमाध्यायस्य चतुर्थे पादे द्वितीयाधिकरणेन सौर्यादिविकृतिषु वैदिकमङ्गजातमुपदेष्टुं तदुपयोगित्वेन प्रथमाधिकरणे धर्मसापेक्षत्वं साधितम् । तत्र प्रथमाधिकरणमुपोद्धातः । सेयमुत्तराधिकरणेन सह पूर्वाधिकरणस्योपोद्धातसङ्गतिः ।

( अपवादसङ्गतिः )

(१)प्रथमाध्यायस्य तृतीयपादस्य प्रथमाधिकरणे अष्टकादिस्मृतेः पूर्ववत्प्राप्तं प्रामाण्यमपोद्यते, सेयमपवादसङ्गतिः । अनया दिशा सर्वत्र सङ्गतिरूहनीया ।

---

१. मातृकाद्वयेऽप्येवमेव पाठस्समुपलभ्यते । अत्र 'प्रथमाध्यायस्य तृतीयपादस्य द्वितीयाधिकरणे सर्ववेष्टनस्मृतेः पूर्ववत्प्राप्तं प्रामाण्यमपोद्यत' इति पाठो युक्त इत्युत्पश्यामः ।

( अध्यायक्रमप्रदर्शनम् )

अथाऽध्यायानां प्रमेयकथनेन सङ्गतिं प्रदर्शयिष्यामः—प्रथमेऽध्याये—धर्मस्य प्रमाणम् । तत्र प्रथमे पादे चोदनायाः, त्रिपाद्यान्त्वर्थवादमन्त्रनामधेयस्मृत्याचाराणां वाक्यशेषसामर्थ्ययोश्च सन्दिग्धनिर्णये प्रामाण्यमुक्तम् ।

द्वितीयेऽध्याये तु—धात्वर्थभावनापूर्वाणां त्रयाणामपि भेदः प्रतिपाद्यते—(१)'भावार्थाः कर्मशब्दाः तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते' इत्यादिना ।

तृतीये तु—(२)'अथाऽतश्शेषलक्षणम्' 'शेषः परार्थत्वात्' इत्यादिना शेषशेषिभावः प्रतिपाद्यते प्राधान्येन ।

चतुर्थे तु—क्रत्वर्थपुरुषार्थविचारेण (३)क्वचित्फलविधिवशात्, क्वचित्साक्षात्प्रयोज्यतैव शेषत्वफलभूता प्राधान्येन, शेषत्वं तु तदुपयोगित्वेन । तथा च—

'मानाधीना मेयसिद्धिर्मानसिद्धिस्तु लक्षणात् ।
प्रमाणमुपजीव्यत्वात्प्रथमेऽध्याय ईरितम् ॥
मानाधीनस्य धर्मस्य द्वितीये भेद उच्यते' ॥

ततश्च प्रथमद्वितीययोरध्याययोः पूर्वोत्तरभाव उपपन्नो भवति । द्वितीयेऽध्याये कर्मणां भेदे सिद्धे भिन्नक्रियास्त्वेन शेषशेषिभावो युक्तो बुभुत्सितः, नाऽभिन्नास्विति भेदलक्षणस्य हेतुत्वम् । यद्यपि 'व्रीहीनवहन्ति' 'सोमेन यजेत' इत्येवमादिषु द्रव्यकर्मणां शेषशेषिभावो न कर्मभेदापेक्षः, तथाऽपि कर्मणामपि प्रयाजाग्नेयादीनां शेषशेषित्वमिहैव वक्तव्यमिति तत्सिद्ध्यर्थं भेदलक्षणापेक्षणमिति बोद्धव्यम् । एवं—

---

१. भावार्थाः भावनाप्रयोजनका ये कर्मशब्दाः यजेत जुहुयादित्यादयः, तेभ्यो धातुभ्यः, क्रिया अपूर्वम्, प्रतीयेत । कुतः ? हि यस्मात्कारणात् एषो धात्वर्थ एव पदश्रुत्या भावनाकरणत्वेन विधीयत इति सूत्रार्थः । (जै. सू. अ. २. पा. १. सू. १.)

२. जै. सू. अ. ३. पा १. सू. १, २. ३. क्वचित्फलविधेर्वशादिति क. पु.

तृतीये शेषशेषित्वासिद्धौ किं (१)प्रयोज्यं किं (२)प्रयोजकम् ।
इत्यपेक्षोदयाद्वक्ति चतुर्थे तत्प्रयुक्तये ॥

'अथाऽतः क्रत्वर्थपुरुषार्थयोर्जिज्ञासा' इति । (३)क्रत्वर्थोऽयं (४)पुरुषार्थोऽयमिति विचारेण प्रयुक्तेर्ज्ञातुं शक्यत्वात् साक्षात्परम्परया वा प्रयुक्तिनिर्णयोपयुक्तं सर्वमिह चिन्तनीयम् ।

यद्यपि न सर्वः शेषी शेषस्य प्रयोजकः, (५)'पुरोडाशकपालेन तुषा-

---

१. यदुद्देशप्रवृत्तकृतिव्याप्यत्वं यस्य तत् तत्प्रयोज्यम् । यथा दध्यानयनप्रयाजादि आमिक्षादर्शपूर्णमासादेः ।

२. यन्निष्ठकृतिव्याप्यतानिरूपितोद्देश्यताशालि यत् तत् तस्य प्रयोजकम् । यथा आमिक्षादर्शादि दध्यानयनप्रयाजादेः ।

३. स्वयं प्रार्थितकृत्युद्देश्यतानिरूपितविधेयताकत्वं पुरुषार्थस्य लक्षणम् । स्वयंप्रार्थितः पश्वादिः, तन्निष्ठोद्देश्यतानिरूपितविधेयता 'गोदोहनेन पशुकामस्य प्रणयेत्' इति पशुफलोद्देशेन विहितगोदोहनेऽस्तीति गोदोहनं पुरुषार्थमिति समन्वयः । गावः दुह्यन्ते यस्मिन्पात्रे तद्गोदोहनमित्यभिधीयते ।

४. स्वयंप्रार्थितभिन्नकृत्युद्देश्यतानिरूपितविधेयताकत्वं क्रत्वर्थस्य लक्षणम् । स्वयंप्रार्थितस्स्वर्गादिः, तद्भिन्नो यागादिः, तत्कृत्युद्देश्यतानिरूपितविधेयता 'समिधो यजति' 'आज्यभागौ यजति' इत्यादिवाक्यविहितप्रयाजाज्यभागादिषु वर्तत इति प्रयाजाज्यभागादयः क्रत्वर्थाः ।

५. 'कपालेषु श्रपयती'त्यनेन पुरोडाशश्रपणार्थत्वेन विहितं यत्कपालं मृत्तिकानिर्मितं वह्नौ च पक्वं वर्तुलाकारं कपालाख्यं पात्रम्, तेन तुषानुपवपति व्रीह्यवहननानन्तरं निर्गतान् तुषान् 'रक्षसां भागोऽसी'ति मन्त्रेण नैर्ऋत्यां दिशि अवस्थापयेदिति प्रकृतवाक्यस्यार्थः । अत्र 'पुरोडाशकपालेने'ति तृतीयाश्रुत्या कपालस्य तुषोपवापनिष्ठाङ्गितानिरूपिताङ्गतायामवगतायामपि, तुषोपवापस्य कपालप्रयोजकत्वाभावात्, सत्यप्यङ्गाङ्गिभावे अनुष्ठापनापरपर्यायप्रयोजकत्वाभावात् कथं तृतीयचतुर्थयोरध्याययोर्हेतुहेतुमद्भाव इति 'यद्यपी' ति शङ्कितुराशयः । यत्र प्रयोज्यप्रयोजकभावो दृश्यते 'तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा' इत्यादौ, तत्र शेषिण एवाऽऽमिक्षादयः शेषाणां दध्यानयनादीनां प्रयोजका दृष्टाः । अतश्शेषशेषिभावाभावे प्रयुक्त्यभावात् शेषशेषिभावः प्रयुक्तिहेतुरेव । कपालस्य तुषोपवापप्रयुक्त्यभावस्तु तुषोपवापे विनियोगात्पूर्वमेव कपालस्य 'कपालेषु श्रपयती' त्यादिना प्रयुक्तत्वात्तन्निश्चयकृतोऽन्यथासिद्ध इति न तावताऽङ्गाङ्गिभावस्य प्रयुक्तिहेतुत्वाभाव इति 'तथाऽपी'ति समाधातुराशयः ।

नुपवपती' इत्यत्र तुषोपवपनं प्रति शेषः कपालं, तत्प्रयोज्यं न, तुषोपवापादेः कपालादिप्रयोजकत्वाभावात्, तथाऽपि शेषिण एव शेषाणां प्रयोक्तार इति भवति शेषलक्षणस्य प्रयुक्तिलक्षणं प्रति हेतुतेति युक्त एव तृतीयचतुर्थयोः पूर्वोत्तरभाव इति बोध्यम् ।

द्वितीयादित्रये प्रोक्तं भेदशेषप्रयुक्तिभिः ।
अनुष्ठेयमनुष्ठानक्रमः पञ्चम ईर्यते ॥

अनेन चतुर्थपञ्चमयोरध्याययोः पौर्वापर्यं निरूपितम् । द्वितीयाध्याये कर्मभेदनिरूपणात् पृथगनुष्ठेयत्वमवगतम् । तृतीयाध्याये शेषशेषित्वनिरूपणात् (१)'निवेशनस्सङ्गमन' इति मन्त्रेण वह्न्युपस्थानमनुष्ठेयम्, न त्विन्द्रोपस्थानमित्याद्यनुष्ठेयव्यवस्थाऽवगता । चतुर्थाध्याये प्रयुक्तिनिरूपणादनुष्ठेयमेव निश्चीयते—(२)पलाशशाखाच्छेदनस्य वत्सापाकरणमेव प्रयोजकम्, न तु प्रस्तरेण सह प्रहृतिः प्रयोजिका, तथा सति पौर्णमास्यां वत्सापाकरणाभावे सत्यप्रयोजकप्रहृत्यर्थं शाखाछेदनं न कर्तव्यमिति । एवं त्रिभिरध्यायैरनुष्ठेयस्वरूपे निश्चिते सत्यनुष्ठानक्रमस्याऽऽकाङ्क्षितत्वात्पञ्चमाध्याये सोऽभिधीयते–(३)'श्रुतिलक्षणमानुपूर्व्यं तत्प्रमाणत्वात्' इति ।

---

१. 'निवेशनस्सङ्गमनो वसूनां विश्वारूपाण्यभिचष्टे शचीभिः । देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनाम्' ॥ (मै. सं. २. ७. १२.) इति समग्रो मन्त्रः । अयञ्च 'इत्यैन्द्रया गार्हपत्यमुपतिष्ठते' ( मै. सं. ३. २. ४. ) इत्यनेन गार्हपत्योपस्थानाङ्गत्वेन विहितः । उपस्थानं नाम मन्त्रकरणकाभिधानम् ।

२. दर्शे पलाशशाखाच्छेदनं विहितम्—'इषे त्वोर्जे त्वेति तामाच्छिनत्ति' (आप. श्रौ. प्र. १. कं. १. सू. १०) इति । तां पलाशशाखामित्यर्थः । तस्याश्च विनियोगः—कृतः 'वायवस्थोपायवस्थेति तया वत्सानपाकरोति' ( आप. श्रौ. प्र. १. कं. २. सू. २. ) इति वत्सापाकरणे । वत्सापाकरणं नाम वत्सानां मातृभ्यः पृथक्करणम् । अत्र वत्सापाकरणं शाखाच्छेदनस्य प्रयोजकमित्यत्र न विप्रतिपत्तिः, किन्तु 'सह शाखया प्रस्तरमाहवनीये प्रहरति' ( आप. श्रौ. प्र. ३. कं. ६. सू. ६. ) इति विहितं प्रहरणमपि प्रयोजकं न वेति संशये, तस्य पूर्वमेव वत्सापाकरणप्रयुक्तत्वान्नेदमपि प्रयोजकमिति सिद्धान्तितम् । प्रस्तरो नाम दर्भमुष्टिविशेषः । ३. जै. सू. ५. १. १.

प्रयुक्तिलक्षणे स्थितः प्रयोज्यवर्गनिर्णयः ।
प्रयोज्यगोचरः क्रमस्त्वतः परं निरूप्यते ॥

प्रथमं तावत् श्रुतिलक्षणो वेदविहित एव क्रमः पदार्थानामाश्रयणीयः, अथ वाऽनियम इति संशये प्रयोगप्राशुभावादनियममाशङ्क्य, वेदप्रामाण्यात्तद्विहित एव क्रमस्समाश्रयणीय इति प्रसिद्धं चोदनाप्रामाण्यमेव 'बहुकृत्वोऽपि पथ्यं वदितव्यमि' त्येवं पुनःकथितमनेन सूत्रेणेति बोध्यम्। ततः क्रमस्य नियतत्वात्तन्निरूपकः पञ्चमाध्याय आरम्भणीयः ।

अथ षष्ठारम्भः—(१)'द्रव्याणां कर्मसंयोगे गुणत्वेनाऽभिसम्बन्धः' ।

भेदादिलक्षणैरेवमनुष्ठेये निरूपिते ।
कोऽनेनाऽधिक्रियेतेति साम्प्रतं सम्प्रधार्यते ॥
तदुपोद्घातरूपेण त्वादावेतद्विचार्यते ।
कर्मभिः पुरुषः कर्ता किमधिक्रियते न वा ॥

सत्यधिकारे कस्य कुत्राऽधिकार इति चिन्तयितुं लक्षणमारब्धव्यमिति तत्सिध्यर्थमधिकारसद्भावः प्रथमं प्रतिपाद्यते--

( विषयसंशयौ )

'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' 'चित्रया यजेत पशुकामः' इत्यादिषु किं पुरुषस्याऽधिकारः स्वाम्यं कर्मजन्यफलभोक्तृत्वमस्ति नेति चिन्त्यते । तदर्थमिदं विचार्यते—

(२)'अभिधाभावनामाहुरन्यामेव लिङादयः ।
अर्थात्मभावना त्वन्या सर्वाख्यातेषु गम्यते' ॥

इति येयं प्रत्ययोपात्ता भावना तस्याः किं धात्वर्थ एव भाव्यः प्रधानम्, स्वर्गादि तु साधनतया गुणभूतम्? उत काम्यमानत्वेनोपात्तः स्वर्गादिरेव भाव्यः, तत्साधनं च धात्वर्थः? इति ।

( पूर्वपक्षः )

तत्र 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्र यागक्रियानिष्पादक-

---

१. जै. सू. ६. १. १. २. तं. वा. २. १. १. पृ. ३४४.

त्वं कर्तृत्वम्, फलभोक्तृतया स्वामित्वमधिकारः । तादृशोऽधिकारो यागकर्तुर्नाऽस्ति । कुतः ? फलभोगाभावात् । तथा हि—यजेतेत्यत्राऽऽख्यातेन भावनाऽभिधीयते । तस्यां च धात्वर्थो भाव्यः, एकपदोपात्तत्वात् । स्वर्गस्तु पदान्तरोपात्तत्वाद्वाक्येन भाव्यतयाऽन्वेतव्यः । तच्च वाक्यमेकपदरूपया श्रुत्या बाध्यते । ततस्स्वर्गस्य भाव्यत्वाभावे सति (१)गुणत्वमभ्युपेयम् । किञ्च स्वर्गशब्दो नाऽत्र सुखवाची, किन्तु सुखसाधनं चन्दनादिद्रव्यं ब्रूते, लोके तथा व्यवहारात् । तच्च कामयितुं योग्यम् । तेन द्रव्येण विना यागानिष्पत्तेः । तस्मादस्मिन्वाक्ये फलानभिधानेन तद्भोगाभावात्कर्तुर्यागे कर्तृत्वमेव, न त्वधिकार इत्यधिकारलक्षणं नाऽऽरब्धव्यमिति प्राप्ते—

## ( सिद्धान्तः )

आहुः—(२)'स्वर्गस्साध्यो न साधनमि'ति । स्वर्गस्य कामनाविषयत्वात्स्वर्गस्साध्यो न साधनमिति स्वर्गभोक्तृत्वं कर्तुरस्तीत्यधिकारस्य सिद्धत्वादधिकारलक्षणमारब्धव्यमित्यर्थः । तथा हि—यजेतेत्यत्र प्रत्ययस्य केवलमाख्यातरूपत्वमेवेति न मन्तव्यम्, किन्तु लिङ्प्रत्ययत्वेन विधिरूपत्वमप्यस्ति । तच्चाऽऽख्यातत्वाकारेण भावनामाचष्टे, विधित्वाकारेण पुरुषं प्रेरयति । पुरुषश्च स्वाभिमतफलमन्तरेण न प्रवर्तत इति तदपेक्षितं स्वर्गमेव भाव्यतया विधिरुपादत्ते । स्वर्गशब्दश्चोत्कृष्टे सुखे रूढः, द्रव्ये तु लाक्षणिकः । तस्मात्सुखस्य भाव्यत्वं प्रबलविधिश्रुत्या सिद्धम् । धात्वर्थस्य तु भाव्यत्वमेकेन पदेन प्रतीयमानमपि न प्रत्ययेनाऽवगम्यते, किन्तु प्रकृत्या । तथा सति स्वर्गभाव्यत्वं भावनायां प्रत्यासन्नमेकेनैव वि-

---

१. यथा पुरोडाशादेर्यागसाधनत्वेन गुणत्वम्, तथा चन्दनादिद्रव्यवाचिनस्स्वर्गस्याऽपि यागसाधनत्वेन गुणत्वम् । न चैवं सति प्रकृते उत्पत्तिशिष्टपुरोडाशावरोधाद्द्रव्यान्तरस्य कथं यागसाधनत्वमिति वाच्यम्, पुरोडाशादिष्वेव स्वर्गशब्दवाच्यत्वाय रूपरससौरभादिकमासज्य यष्टव्यमिति पुरोडाशादीनामेव स्वर्गशब्देन विधानान्न साधनत्वानुपपत्तिः । अथवा वाजिनन्यायेन स्वर्गकामवाक्ये चन्दनादिद्रव्यविशिष्टकर्मान्तरविधानान्न कश्चिद्दोष इति भावः ।

२. मीमां. सं. श्लो. १०४.

धिरूपेणाऽऽख्यातेनाऽवगमात् , कर्मियोगादपि स्वर्गस्यैव भाव्यत्वम् । तस्मात्फलभोगसम्भवेन कर्तुरधिकारोऽस्तीत्यधिकारलक्षणमारब्धव्यम् ।

( आत्मवादः )

ननु कोऽसौ कर्ता ? किं लक्षणस्सः ? कथं वा तस्य स्वर्गलोकगमनम् ? कथं तस्य दुःखरूपसंसारस्य प्राप्तिः ? कथं वा तस्य निवृत्तिरिति ।

( आत्मस्वरूपम् )

अत्रोच्यते — देहेन्द्रियमनोबुद्धिविलक्षणस्तत्प्रवृत्त्यनुकूलप्रयत्नवान् कर्ता । स च ज्ञानशक्तिः सुखदुःखाद्याश्रयो(१)मानसाहंप्रत्ययगम्यो नित्यानुमेयो विभुर्नित्यः, प्रतिशरीरं भिन्नश्चाऽऽत्मा । तं च त्रेधा सत्यः प्रपञ्चो बध्नाति—भोगायतनं शरीरम् , भोगसाधनानीन्द्रियाणि, भोग्याश्शब्दादयो विषयाः । भोगस्तु सुखदुःखान्यतरसाक्षात्कारः ।

( मोक्षस्वरूपम् )

त्रिविधस्याऽपि बन्धस्याऽऽत्यन्तिको विलयो मोक्षः । स्वर्गगमनन्तु तस्यौपाधिकम् । न च शक्यते तस्य (२)कापिलवदकर्तृत्वं वक्तुम् , श्रुत्यादिविरोधात । तथा हि—सर्वत्र हि कर्तृभोक्तृशब्दयोस्सामानाधिकरण्यं दृश्यते । यथा अत्रैव 'यजमानः स्वर्गं लोकं याती'ति । तथा 'य एवं विद्वानग्निं चिनुते ऋध्नोत्येव, य एवं विद्वान् द्विरात्रेण यजते स्वर्गमेव लोकमेती'ति । तथोपनिषत्स्वपि (३)'सङ्कल्पादेवाऽस्य पितरस्समुत्तिष्ठन्ती'ति कर्त्रभिधायिन्या षष्ठ्या आत्मनस्सङ्कल्पं प्रति कर्तृत्वमुक्तम् । सम्भवति च सर्वगतस्याऽऽत्मनो यागज्ञानप्रयत्नसङ्कल्पादिषु साक्षादेव क·

---

१ 'स मानसीन आत्मा जनानाम्' 'अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा । तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप' ॥ इति श्रुतिभगवद्गीतादिप्रमाणजातेनाऽऽत्मनो मानसाहम्प्रत्ययगम्यत्वमिति भावः । मानसीनः मनोगम्य इत्यर्थः ।

२. साङ्ख्यैर्हि 'कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्चे'त्यादिनाऽऽत्मनोऽकर्तृत्वमभिहितम् । ( सां. का. १९. )

३. छान्दो. उ. ८. २. १.

तृत्वम् । न हि वयं स्पन्दमेव क्रियामभ्युपगच्छामो वैशेषिकवत्, येन आत्मनः कर्तृत्वं न स्यात्, धात्वर्थमात्रक्रियात्वात् । स्पन्देष्वपि प्रयोजकत्वेनाऽस्यैव प्रयोक्तृत्वं सम्भवति । प्रयत्नेन ह्यसौ शरीरं स्पन्दे प्रयोजयति, साक्षात्तु न सम्भवति सर्वगते स्पन्दस्याऽभावात् इत्यनेनाऽभिप्रायेणोपनिषत्सु पुराणेषु चाऽकर्तृत्ववादाः । ज्ञातृविषयस्तावदहंप्रत्यय इति सर्वाविवादम् । सर्वोऽपि आत्मनोऽहमिति परामृशति, परांस्त्विदमिति । मामहं जानामि सर्वञ्चेदं भूतं भवद्भविष्यद्विशेषतो न जानामि, अहमस्मि, नाऽहमस्मीति सर्वदाहंत्वेनैवाऽऽत्मनः प्रतीतिः । तेन निस्संशयस्य नित्यस्य स्वतन्त्रज्ञानशक्तेरेव ज्ञातृत्वम् । बुध्यादीनान्तु तत्संसृष्टानामेकत्वभ्रान्त्या सामानाधिकरण्यप्रतीतिरुष्णतोयप्रतीतिवत् भास्वरायःपिण्डप्रतीतिवच्च । (१)तथा चाऽऽहुः—

'साक्षाद्यद्यपि सम्बन्धो नाऽऽत्मनो यज्ञसाधनैः ।
तथाऽपि लक्षणावृत्त्या शरीरद्वारको भवेत् ॥
प्रत्यक्षत्वं च देहस्थं भाक्तमात्मनि कल्पितम् ।
आत्मनस्स्वर्गयानं वा शरीरस्योपचर्यते ॥
न च विज्ञानमात्रत्वे कर्तृभोक्तृत्वसम्भवः ।
शरीरविनिपाताच्च परं नाऽन्यद्यदेष्यते ॥
अदत्तफल इष्ट्यादौ तदा तद्वचनं मृषा ।
तस्माद्वेदप्रमाणार्थमात्माऽत्र प्रतिपाद्यते ॥
यद्यपि प्रकृतं वाक्यं व्याख्यायेताऽर्थवादतः ।
शरीरेन्द्रियबुद्धिभ्यो व्यतिरिक्तत्वमात्मनः ॥
नित्यत्वं शिष्यते शेषं शरीरादि विनाशि चे'ति ॥

तत्सिद्धं यथाप्रतिज्ञात एवाऽऽत्मेति । स च पुनस्संसारे दुःखबहुलेऽभिनिवेशान्नानाविधानि शरीराणि स्थावरजङ्गमात्मकानि धर्माधर्मनिमित्तकानि पुनः पुनरनाद्यज्ञानवशात् प्राप्नोति, न कदाचिद्विमुच्यते कर्म-

१. कुमारिलभट्टश्लोकवार्तिके आत्मवादप्रसङ्ग इति शेषः ।

बन्धात् । विनश्वरोऽप्ययं संसारः प्रवाहरूपेण सदा तिष्ठति, न कदाचिदनीदृशं जगत् । स कदाचित्पुण्ययोगाद्दिव्यं शरीरादि संप्राप्य दिव्यविषयजन्यमनित्यं सुखमनुभवन् कृतार्थमिवाऽऽत्मानं मन्यते, तथाऽपि तद्दुःखमेव विवेकिनाम् । (१)तथा चोक्तम्—

## ( सांसारिकसुखस्य हेयता )

'संसारे स्वर्गसंज्ञं यत्सुखं तदपि सूरयः ।
बहुप्रयाससाध्यत्वात् दुःखमेवाऽनुजानते ॥
जन्ममृत्युजराव्याधिदुःखान्यनुदिनं नृणाम् ।
स्वयमेव विना यत्नान्निपतन्ति सहस्रशः ॥
बहुदुःखपरिष्वक्तं यन्नाम स्वल्पकं सुखम् ।
सुरापानादिसुखवद्वर्जनीयं विवेकिनाम् ॥
एवं भूतेऽपि संसारे ये रक्तास्सुखतृष्णया ।
न तेषामधिकारोऽस्ति मुक्तिशास्त्रे कथञ्चन ॥
संसारादुद्विजन्ते ये(२) मत्वा दुःखमिदं सदा ।
त एव खलु मुच्यन्ते न तु यः प्राकृतो जनः ॥
तेषामेवाऽपवर्गाख्यः पुरुषार्थो महात्मनाम् ।
सुखदुःखोपभोगो हि संसार इति शब्द्यते ॥
तयोरनुपभोगन्तु मोक्षं मोक्षविदो विदुः ।
श्रुतिरप्येतमेवाऽऽह भेदं संसारमोक्षयोः ॥
(३)न ह वै सशरीरस्य प्रियाप्रियविहीनता ।
अशरीरं वा व सन्तं स्पृशतो न प्रियाप्रिये ॥

---

१. शास्त्रदीपिकायास्तर्कपादे पार्थसारथिमिश्रैः । ( शास्त्र. दी. अ. १. पा. १. अ. ५ पृ. १२९. )

२. दृष्टलोकपरावराः इति. ख. पु. ।

३. 'न ह वै सशरीरस्य प्रियाप्रिययोरपहतिरस्ति, अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः' इति श्रुतिवचनमत्र बोध्यम् । ( छान्दो. उ. ८. १२. १. )

आनन्दात्मकमात्मानं ये वदन्ति स्वयंप्रभम् ।
तन्मतेऽपि च संसारान्मुक्तेर्(?)तावती भिदा ॥
आत्मा ह्यानन्दरूपोऽसौ संसारेऽपि प्रकाशते ।
तावानेव स मोक्षेऽपि नाऽऽधिक्यं तस्य किञ्चन ॥
तेन शब्दादिविषयजन्ययोस्सुखदुःखयोः ।
निवृत्तिरेव संसारादपवर्ग इति स्थितिः ॥
केचिन्नित्यसुखव्यक्तिं ब्रह्मोपास्त्यैव सर्वदा ।
मन्यन्ते परमां मुक्तिं मनसा विभुना सह ॥
तत्त्वज्ञानाद्भवेन्मोक्षो नित्योऽसौ सर्वसम्मतः ।
सुखदुःखविहीनस्तु मुक्तस्स्वस्थोऽवतिष्ठते" इति ॥

किमिदं स्वस्थ इति ? शृणु ; ये ह्यागमापायिनो धर्मा बुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारास्तानपहाय यदस्य स्वं नैजं रूपं ज्ञानशक्तिसत्ताद्रव्यविभुत्वादि तस्मिन्नेव सदाऽवतिष्ठत इत्यर्थः । तत्त्वज्ञानस्त्वौपनिषदात्मज्ञानमेव । ततोऽज्ञाननाशात्सुखदुःखादिसमस्तवैशेषिकात्मगुणोच्छेदो मोक्षः । सुखदुःखयोरुच्छेदस्तु धर्माधर्मयोरुच्छेदात्, तदुच्छेदस्तु प्राप्तानां धर्माधर्माणां भोगेन नैमित्तिककर्मानुष्ठानेन आत्मज्ञानेन च विरोधात्, उत्पाद्यानान्तु काम्यकर्माकरणादेवाऽसम्भवात् । विहिताकरणप्रतिषिद्धाचरणनिमित्तकानां तु तत्करणाकरणपरिहारादसति शरीरारम्भके पूर्वशरीरनिपाते चाऽशरीरो मुक्तोऽवस्थितो भवतीति सर्वं शिवम् ।

अत्रेदं तत्त्वं बोध्यम्—द्विविधं ह्यात्मज्ञानं क्रत्वर्थं पुरुषार्थं चेति । कुतः ? संयोगभेदात् । तथा हि—यत्तावत् 'दविनाशी वा अरेऽयमात्मे' त्यादिना शरीराद्यतिरिक्तनित्यात्मस्वरूपसद्भावज्ञानम्, तत्पारलौकिकफलककर्मानुष्ठानौपयिकत्वात्कर्मज्ञानवदेव सामर्थ्यतः क्रतुसंयोगात् क्रत्वर्थम् । यानि पुनरितिकर्तव्यताविशेषयुक्तान्युपासनात्मकानि ज्ञानानि वि-

५. संसारे सुखदुःखयोस्संस्पर्शः, मोक्षे तु तदभाव इति भेदो बोध्यः ।

धीयन्ते, यच्च पुनरात्मसद्भावोपक्रमे विधिस्वरूपवाक्येन (१)'आत्मा वा अरे द्रष्टव्य' इत्यादिनाऽऽत्मदर्शनमुद्दिश्य श्रवणादि विधीयते, तेषां क्रतौ दृष्टोपयोगाभावात्प्रवृत्तिविरुद्धत्वाच्चाऽदृष्टमेव फलं युक्तम्। तच्च वाक्यशेषाद्द्विविधम्—अभ्युदयरूपं निःश्रेयसरूपं च। तत्र 'सर्वान् कामानवाप्नोती'त्याद्यभ्युदयफलम्, 'तरति शोकमात्मवित् न स पुनरावर्तत' इति निःश्रेयसफलमिति।

अथ सप्तमारम्भः—(२)'श्रुतिप्रमाणत्वाच्छेषाणां मुख्यभेदे यथाधिकारं भावस्स्यात्'।

प्रमाणाद्यधिकारान्तैः षड्विचारैर्निरूपिते।
उपदेशेऽतिदेशोऽथ तत्सापेक्षो निरूप्यते॥

अनेन षष्ठसप्तमयोः पूर्वोत्तरभाव उपपादितः। तथा हि—यत्राऽपेक्षितस्य ग्रन्थजातस्य प्रतिपादको ग्रन्थसन्दर्भः पठ्यते, स उपदेशः। अतिदेशश्च पूर्वाचार्यैः प्रदर्शितः—

'अन्यत्रैव प्रतीतायाः कृत्स्नाया धर्मसन्ततेः।
अन्यत्र कार्यतः प्राप्तिरतिदेशोऽभिधीयत' इति॥
प्राकृतात्कर्मणो यस्मात्तत्समानेषु कर्मसु।
धर्मोपदेशो येन स्यात्सोऽतिदेश इति स्मृत'॥ इति च।

तत्रोपदेशष्षड्भिरध्यायैर्निरूपितः। ततष्षष्ठाध्यायस्योपदेशविचारत्वात्पूर्वभावित्वम्।

अथाऽष्टमारम्भः— (३)'अथ विशेषलक्षणम्'।

सामान्येनाऽतिदेशो योऽनुमानात्स निरूपितः।
विशेषेणाऽतिदेशो यः सोऽष्टमेऽथ निरूप्यते॥

---

१. बृ. उ. २. ४. ५.

२. मुख्यभेदे मुख्यानामपूर्वाणां भेदे, यथाधिकारं यथाप्रकरणम्, शेषाणां धर्माणाम्, भावः अवस्थानं स्यात्, कुतः ? श्रुतिप्रमाणत्वात् श्रुत्येकगम्यत्वाच्छेषशेषिभावस्येति सूत्रार्थः। (जै. सू. ७. १. १.)

३. जै. सू. ८. १. १.

अनेन सप्तमाष्टमयोरध्याययोः पूर्वोत्तरभाव उपपादितः । (१)विध्यन्ताधिकरणे सौर्यादिष्वानुमानिकेन वचनेन वैदिकीतिकर्तव्यताऽस्तीत्युक्तम् । तस्यैवेदानीं विशेष उच्यते——कस्य विध्यन्तः क्व प्रवर्तत इति ।

( संशयः )

प्रथमं तावदिदं चिन्त्यते—किं कस्माच्चित्कर्मणो धर्मा अतिदिश्यन्ते, नियतात्कर्मणोऽथवेति ।

( पूर्वपक्षः )

विहितेतिकर्तव्यतारहिते सौर्यादौ कर्मणि तद्युक्तायतःकुतश्चित्कर्मणो धर्मा अतिदिश्यन्ते । कुतः ? नियामकस्य विशेषस्याऽभावात् । अतो विशेषचिन्ता न कार्येति प्राप्ते——

( सिद्धान्तः )

आहुः—(२)'अष्टमार्थस्य प्रतिश्रुतिरि'ति । अष्टमार्थस्य विशेषातिदेशस्य प्रतिश्रुतिः प्रतिज्ञा, विशेषातिदेशः कर्तव्य इत्यर्थः । तथा हि शास्त्रार्थस्य व्यवस्थाया नियामकत्वात् । तस्मान्नियतादेकस्मात्कर्मणो धर्मातिदेशः । तेन विशेषचिन्ता कर्तव्या ।

अत्रैव विचारान्तरम्-सर्वविध्यन्तानामेकत्र विकल्पेन प्राप्तिरस्ति न वेति सन्दिह्य नियामकप्रमाणाभावादस्तीति प्राप्ते—

आहुः——(३)'एकस्मिन्नेकविध्यन्त' इति । अविकल्पित इति शेषः । अन्यथा ह्यनवस्थितः शास्त्रार्थस्स्यात् । तस्मान्नियमेनैकस्यैव दर्शपूर्णमासादेर्विध्यन्त एकस्मिन्सौर्यादौ प्रवर्तते । (४)'यस्य लिङ्गमर्थसंयोगादभिधानवत्' । यस्य कर्मणो यल्लिङ्गं चिह्नं उपस्थापकं शब्दगतमर्थगतं वा यस्यां विकृतौ दृश्यते, तस्य विध्यन्तस्तस्यां प्रवर्तते, यथा आग्नेयस्य सौर्ये । तथा हि——निर्वपतिः, तद्धितेन देवतानिर्देशः, एकदेवतात्वम्, औषधद्रव्यकत्वमित्यादीन्याग्नेयचोदनया दृष्टसम्बन्धानि सार्यवाक्ये विध्यन्तापेक्षे

१. पू. मी. ७. ४ १.   २. ३. मीमां, सं. श्लो. ११९.   ४. जै. सू. ८. १. २.

दृश्यमानानि तामुपस्थापयन्ति । सा च स्वार्था । इयंशा च भावना तस्याः स्वार्थः । ततस्साध्यसाधनांशाविहानपेक्षितत्वादनादृत्य तृतीयोंऽश इत्थं-भावरूपोऽपेक्षासन्निधियोग्यत्वैर्वाक्यशेषत्वेनाऽत्र सम्बध्यते ।

तदयमर्थः--यथा आग्नेयेन स्वर्गः कृतः तथा सौर्येण ब्रह्मवर्चस-मिति । एवमनेकदेवतेष्वग्नीषोमीयैन्द्राग्नविध्यन्तः । आज्यद्रव्यकेषूपांशु-याजस्य । पयोदध्यामिक्षादिषु(१) दैक्षपशौ च सान्नाय्यस्य । पश्वन्तरेषु दैक्षस्य । ऐकादशिनेषु सवनीयस्य । पशुगणान्तरेषु ऐकादशिनस्य । (२)अव्यक्तेषु सोमस्य । अहर्गणेषु सत्रेष्वहीनेषु च द्वादशाहस्य । संवत्स-रादिषु गवामयनस्येति द्रष्टव्यम् । एवमिह विशेषातिदेशः । उत्तरस्त्वस्यैव प्रपञ्चः।

तथा हि--दर्शपूर्णमासयोः 'आग्नेयमष्टाकपालं निर्वपति' इत्यत्र त-द्धितोक्त्या देवतानिर्देशः, एकदेवतायोगित्वमौषधद्रव्यकत्वं, निर्वाप इत्ये-तान्याग्नेययागसम्बन्धितया श्रूयमाणत्वादाग्नेयलिङ्गानि । 'सौर्यं चरुं निर्व-पेद्ब्रह्मवर्चसकाम' इत्यत्राऽपि तान्युपलभ्यन्ते । न तेषामाग्नेयधर्मातिदेशं नियन्तुं सामर्थ्यमस्ति । कुतः ? तेषामशब्दरूपत्वेन शब्दैकसमधिगम्येऽर्थे प्रामाण्यायोगादिति प्राप्ते--

आहुः--(३)'यस्य लिङ्गं च तस्य सः' इति । यो येन तुल्यलिङ्गकः स तस्य धर्मातिदेशक इत्यर्थः । तथा हि--लिङ्गस्मारितोपकारसहितमेव सौर्ययागं तच्छब्दो विदधाति । तथा सति प्रणाड्या लिङ्गस्य शब्दे प्रवेशादाग्नेयवत्सौर्योऽनुष्ठेय इत्येतादृशं चोदकवाक्यमनुमापयता लिङ्गेन धर्मविशेषा नियम्यन्त इत्यलं विस्तरेण ।

अथ नवमारम्भः—(४)'यज्ञकर्म प्रधानं तद्धि चोदनाभूतं तस्य द्रव्येषु संस्कारस्तत्प्रयुक्तस्तदर्थत्वात्' । सिद्धेऽतिदेशेऽधुना अतिदिष्टानां

१. दैक्षपशुर्नाम ज्योतिष्टोमाङ्गभूताग्नीषोमीयपशुः ।

२. अव्यक्तत्वञ्च स्वार्थचोदितदेवतारहितत्वम् । ३. मीमां. सं. श्लो. १३९.

४. यज्ञकर्म यजतिकार्यमपूर्वमित्यर्थः । तत् प्रधानम् । हि यस्मात्कारणात्तदेव चोद्यते । तस्य अपूर्वस्य, द्रव्येषु संस्कारः अवघातादिः, तत्प्रयुक्तः अपूर्वप्रयुक्तः । कुतः ? तदर्थत्वात् अपूर्वार्थत्वादिति सूत्रार्थः । (जै. सू. ९. १. १ )

पदार्थानां मन्त्रसामसंस्काराणां द्वारान्तरसम्बन्धनिमित्तान्यथाभावात्मक ऊहश्चिन्त्यते । तस्य चाऽतिदिष्टविषयकत्वादतिदेशोत्तरकालमारम्भः । अष्टमनवमयोः पूर्वोत्तरभाव उपजीव्योपजीवकभावेन द्रष्टव्यः । मन्त्रसामसंस्कारेष्वतिदिष्टपदार्थेषु यत्राऽस्त्यूहो यत्र च नाऽस्ति, तदुभयमत्र विचार्यम् । ऊहस्य लक्षणमेवमाहुः—

'प्राकृतस्थानपतितपदार्थान्तरकार्यतः ।
ऊहः प्रयोगो विकृत ऊह्यमानतयोदितः' ॥ इति ॥

सप्तमस्याऽऽद्याधिकरणेऽवघातादीनां धर्माणां यज्यन्वयं निराकृत्याऽपूर्वान्वयो निर्णीतः । स एवाऽत्रोहारम्भोपयोगित्वेन स्मार्यते । यदि यज्यर्थास्स्युः, तदा सर्वे सर्वत्रोपादिश्यन्ते, न त्वतिदेशः क्वाऽप्यस्ति । ततोऽतिदिष्टपदार्थविषय ऊहो नाऽऽरभ्येत । अपूर्वार्थत्वे तु प्रकरणनियमितत्वादश्रुतधर्मकेष्वतिदेशादूह आरम्भणीयः ॥

अथ दशमारम्भः—(१)'विधेः प्रकरणान्तरेऽतिदेशात्सर्वकर्म स्यात्'

(२)ऊहे सिद्धेऽतिदिष्टानां बाधाभ्युच्चयचिन्तया ।
इयत्ता दशमेऽङ्गानां विकृतिष्वभिधास्यते ॥
रूपान्तरत्वादासन्नं नवमे स्थितमूहनम् ।
निवृत्तित्वाद्विप्रकृष्टो दशमे बाध उच्यते ॥

अतिदिष्टपदार्थस्य रूपान्तरमूहनम्, ततस्सन्निकृष्यते । बाधस्तु पदार्थनिवृत्तिः, ततो विप्रकृष्यते । तस्मान्नवमदशमयोरध्याययोः पूर्वोत्तरभाव उपपन्नः । तत्र द्वितीयवर्णकं बाधोपपादकमारचयति—

अवघातः कृष्णलानामस्ति नो वाऽस्ति पाकवत् ।
प्रत्यक्षोक्त्याऽऽचरेत्पाकमवघाते तु नाऽस्ति सा ॥

विकृतिरूपाणां काम्येष्टीनां काण्डे पठ्यते—'प्राजापत्यं चरुं निर्व-

१. प्रकरणान्तरे विकृतिलक्षणे, विधेः विधीयमानपदार्थानां विधायकशास्त्रस्य च, अतिदेशात् सर्वकर्म सर्वेषामनुष्ठानं स्यादिति सूत्रार्थः । जै. सू. १०. १. १.

२. विकृतिष्वतिदिष्टानामङ्गानामियत्ता अभिधास्यत इत्यन्वयः । अभ्युच्चयो नाम वैकृतैः प्राकृतीनां समुच्चयः ।

पेच्छतकृष्णलमायुष्काम' इति । कृष्णलशब्दस्सुवर्णशकलवाची । प्रकृतौ 'व्रीहीनवहन्ती'ति पुरोडाशहेतूनां व्रीहीणामवघातो विहितः । सोऽत्र चरुहेतूनां कृष्णलानां चोदकवशादस्ति, नो वेति सन्देहः । अस्तीति पूर्वपक्षप्रतिज्ञा । वितुषीकरणं प्राकृत उपकारः । लुप्तेऽप्युपकारे तत्सत्तायां पाकादिवदिति निदर्शनम् । लुप्तेऽपि विक्लेदनोपकारे पाकः प्रतिवादिनोऽभिमतः, तद्वदवघातोऽप्यस्तु । 'घृते श्रपयती'ति प्रत्यक्षोक्त्या पाकोऽभ्युपगतः, अवघाते तु सोक्तिर्नाऽस्तीति वैषम्यादवघातो नाऽस्ति । सोऽयं चोदकप्रापितस्याऽवघातानुष्ठेयत्वप्रत्ययस्य भ्रान्तित्वेन निश्चयो बाध इत्युच्यते ।

अथैकादशारम्भः—(१)'प्रयोजनाभिसम्बन्धात्पृथक्सतां ततस्स्यादैककर्म्यमेकशब्दाभिसंयोगात्' ।

अयमर्थः-पृथक्सतां पृथगुत्पन्नानामपि आग्नेयादीनां, ततः पश्चात्, प्रयोजनानि स्वर्गाद्युद्देशान् प्रति तेषां विधेयत्वेन सम्बन्धात्, ऐककर्म्यं एकफलत्वं स्यात् । कुतः ? अनेककर्मार्थैकशब्दावगतसाहित्यस्य विधेयविशेषणस्वरूपाभिसम्बन्धादिति । दशमेऽध्याये बाधाभ्युच्चयचिन्तया विकृतिष्वङ्गपरिमाणं चिन्तितम् । अतिदेशविचारश्च सप्तमादिभिर्दशमपर्यन्तैस्समाप्तः । सम्प्रत्युपदेशसाधारण्येन प्रयोगपरिमाणं परिमाणप्रसङ्गादेकादशे तन्त्रावापचिन्तया चिन्त्यते । उपदिष्टातिदिष्टपदार्थेयत्तावधारणाधीनं हि प्रयोगेयत्तावधारणमिति तदुत्तरकालमारम्भः ।

बाधाबाधविचारेण प्रयोज्ये निश्चिते सति ।
प्रयोगस्य विचारोऽथ तन्त्ररूपो विचार्यते ॥

अनेन दशमैकादशयोरध्याययोः पूर्वोत्तरभाव उपपादितः । तत्र प्रथमाधिकरणं तन्त्रोपपादकम् । 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेते'ति श्रुतं फलमाग्नेयादिभिष्षड्भिर्यागैः प्रत्येकं सम्बध्यते । कुतः ? पृथगुत्पन्नतया परस्परनिरपेक्षाणां पृथगेव फलाकाङ्क्षित्वादिति चेन्न; तत्समूह-

१. जै. सू. ११. १. १.

वाचिना दर्शपूर्णमासशब्देन व्यवहृतस्य सङ्घस्यैव फलसम्बन्धात् । तस्मात्स्वर्गस्तेषां फलं तन्त्रेण । तन्यते विस्तार्यते बहूनामुपकारो येन सकृत्प्रवर्तितेन तदिदं तन्त्रम् । तद्यथा बहूनां ब्राह्मणानां मध्ये कृतः प्रदीपस्तेषामुपकरोति, न त्वनुलेपनभोजनादिवत् प्रतिपुरुषमावृत्तिलक्षणमावापमपेक्षेत । एवं स्वर्गस्तन्त्रेण फलम् ।

अथ द्वादशारम्भः—(१)'तन्त्रिसमवाये चोदनातस्समानानामैकतन्त्र्यमतुल्येषु तु भेदस्स्याद्विधिप्रक्रमात्तादर्थ्यं श्रुतिकालनिर्देशात्' ।

सकृदनुष्ठितमप्यङ्गं बहूनां प्रधानानामेकदेशकालकर्तृकाणां शक्नोत्युपकर्तुमित्येतत्तन्त्रलक्षणोक्तमुपजीव्य किमगृह्यमाणविशेषत्वादेवैवं भवति, उत अस्मा इदमनुष्ठानं नाऽस्मा इत्येवं गृह्यमाणेऽपि विशेषे अन्यार्थेऽप्यनुष्ठितमङ्गमन्यस्याऽपि देशाद्यभेदे शक्नोत्युपकर्तुमिति न तादर्थ्येन पुनरनुष्ठातव्यमिति चिन्त्यत इति तन्त्रप्रसङ्गयोर्हेतुहेतुमत्ता । अन्यर्थानुष्ठिताङ्गस्याऽन्येनोपजीवनं प्रसङ्गः ।

अन्ये त्वेवमाहुः—'तन्त्रं द्वयोर्देश्यकत्वादेकादश उदीरितम् । प्रसङ्गोऽन्योद्देशकत्वाज्जघन्यस्सन्नथोच्यते' ॥ 'अभ्यर्हितं पूर्वमि'ति न्यायमाश्रित्य तन्त्रप्रसङ्गप्रतिपादकयोरेकादशद्वादशाध्याययोः पूर्वोत्तरभाव उपपादितः । तन्त्रप्रसङ्गयोर्लक्षणभेदोऽप्यनेन सूचितो भवति । उभयोद्देशेन सकृदनुष्ठानं तन्त्रम्, अन्योद्देशेनाऽन्यदीयस्याऽपि सहाऽनुष्ठानं प्रसङ्ग इति तद्भेदः ।

तत्र प्रसङ्गप्रतिपादकं प्रथमाधिकरणम् । अग्नीषोमीये पशावैष्टिको विध्यन्तः प्रवर्तते । प्रधानमारभ्याऽङ्गपर्यन्तो विधिर्विध्यादिः ।

---

१. तन्त्रं नाम साधारणो धर्मग्रामः, स येषां प्रधानानां तानि तन्त्रीणि, तेषां समवाये एकदेशकालकर्तृत्वे सति, चोदनातस्समानानां एकवाक्यचोदितानां आग्नेयादीनामेव, ऐकतन्त्र्यं भवति । अतुल्येषु तु भिन्नचोदनाचोदितेषु पशुपुरोडाशादिषु, भेदस्स्यात् पश्वर्थत्वेन पुरोडाशार्थत्वेन चाऽऽङ्गानुष्ठानस्य भेदस्स्यादित्यर्थः । कुतः ? अङ्गानुष्ठानस्य श्रुत्याऽग्नीषोमप्रणयनानन्तरलक्षणकालनिर्देशेन पश्वर्थत्वात् इति सूत्रार्थः । जै. सू. १२. १. १.

प्रयाजाद्यङ्गकलापो विध्यन्तः । तत्र पशुपुरोडाशः 'अग्नीषोमीयस्य वपया प्रचर्याग्नीषोमीयं पशुपुरोडाशं निर्वपती'ति । तत्राऽप्यैष्टिको विध्यन्तः ।

( संशयः )

तत्र चिन्त्यते—किं पश्वर्थमनुष्ठितान्यङ्गानि पुरोडाशस्य नोपकुर्वन्ति तेन तदर्थं पृथगनुष्ठेयानि, उत तैरेवोपकारसिद्धेर्नेतीति ।

( पूर्वपक्षः )

तत्र पश्वर्थमनुष्ठितैः पुरोडाशे उपकारो नाऽस्तीति युक्तम् । कुतः ? उपकारबोधकविधेरभावात् । चोदकस्तु दर्शपूर्णमासवत् पशुरनुष्ठेय इत्येवंरूपत्वात, पशावेव तदुपकारं बोधयति । ननु पशुपुरोडाशस्याऽपीष्टिविकृतित्वात् तत्राऽपि चोदकोऽस्तीति चेद्बाढम् ; अत एव भिन्नचोदकबलात्पुरोडाशोपकाराय प्रयाजाद्यङ्गानि पृथगनुष्ठेयानीति प्राप्ते—

( सिद्धान्तः )

ब्रूमः—यद्यपि पश्वर्थैः पुरोडाशस्योपकार इत्येतादृशं शास्त्रं नाऽस्ति, तथाऽप्ययमुपकारोऽर्थप्राप्तो न निवारयितुं शक्यते । यथा प्रदीपस्य वेदिकार्थं निर्मितस्याऽर्थसिद्धं मार्गप्रकाशकत्वमनिवार्यम्, तथा पशुतन्त्रमध्ये अनुष्ठीयमानस्य पुरोडाशस्य पश्वर्थैरङ्गैरुपकारः केन वार्येत । तस्मादन्यार्थैरप्यस्त्युपकारः ।

अथ(१) द्वितीये 'न तौ पशौ करोती' ति निषेधादाज्यभागयोः पशावभावे पुरोडाशे प्रसङ्गसिद्धिर्नाऽस्ति । ततस्तौ विचार्येते ।

( पूर्वपक्षः)

तत्र पुरोडाशे आज्यभागौ न स्तः इति तावत्प्राप्तम् । कुतः ? पुरोडाशविषयस्य चोदकस्य लुप्तत्वात् । अन्यथा प्रयाजादीनामपि पुनरनुष्ठानापत्तेरिति प्राप्ते—

१. द्वादशप्रथमद्वितीयाधिकरणे इत्यर्थः ।

## ( सिद्धान्तः )

ब्रूमः——न तावत्पुरोडाशे चोदको लुप्यते, बाधकाभावात् । पूर्वोक्तप्रसङ्गसिद्धिस्तु प्रयोगवचनमेव बाधते न चोदकम् । अन्यथा प्रयाजादीनां पुरोडाशाङ्गत्वाभावेन प्रसङ्गसिद्धेरप्यवक्तव्यत्वात् । ननु प्रयोगबाधेऽप्याज्यभागौ न स्त इति चेत, न; आज्यभागौ प्रति बाधिकायाः प्रसङ्गसिद्धेरभावात्ततः प्रसङ्गसिद्धाङ्गविषयप्रयोगांशस्यैव बाधादबाधितेन प्रयोगवचनांशेनाऽऽज्यभागावनुष्ठाप्येते । यथा देवदत्ते यज्ञदत्तयानमारूढे देवदत्तयानं निवर्तते, न तु वस्त्रालङ्करणादिबाधनमिति दिक् ।

तत्सिद्धं प्रमाणभेदशेषत्वप्रयुक्तिक्रमनियमाधिकाराद्विविधातिदेशोहबाधतन्त्रप्रसङ्गसर्वविशेषणविशिष्टो धर्मः स्वरूपप्रमाणसाधनफलैश्चतुर्विधो जिज्ञास्यः श्रेयोर्थिभिरिति ।(१) तथा चाऽऽहुः——

मध्ये तन्त्रं यस्य येषां विधानं तेषु प्रोक्तो मुख्यतन्त्रप्रसङ्गः ।
जिज्ञास्यो यो धर्म उक्तश्चतुर्धा स प्रज्ञातो लक्षणैर्द्वादशान्तैः ॥

अथ प्रसङ्गादध्यायपादानामधिकरणानि विविच्यन्ते । आद्ये (अध्याये) ६९, द्वितीये ५१, तृतीये १६५, चतुर्थे ७०, पञ्चमे ५८, षष्ठे ११७, सप्तमे २३, अष्टमे ३७, नवमे ८८, दशमे १८९, एकादशे ६४, द्वादशे ६९ । एवं पूर्वषट्के ५३०, उत्तरषट्के ४७० ॥

अथ चरणाधिकरणानि——प्रथमाध्याये——(२)अधीतिरत्र दृष्टार्था

---

१. पार्थसारथिमिश्रशास्त्रदीपिकाया अन्त इति शेषः।

२. अत्रेत्थमधिकरणसंख्या योजनीया—प्रथमाध्यायस्य प्रथमपादे ८, द्वितीयपादे ४, तृतीयपादे १०, चतुर्थपादे २० । द्वितीयाध्यायस्य प्रथमपादे १८, द्वितीयपादे १३, तृतीयपादे १४, चतुर्थपादे २ । तृतीयाध्यायस्य प्रथमपादे १५, द्वितीयपादे २०, तृतीयपादे १५, चतुर्थपादे २१, पञ्चमपादे १९, षष्ठपादे १६, सप्तमपादे २३, अष्टमपादे २२ । चतुर्थाध्यायस्य प्रथमपादे १७, द्वितीयपादे १३, तृतीयपादे १८, चतुर्थपादे १२ । पञ्चमाध्यायस्य प्रथमपादे १८, द्वितीयपादे ११, तृतीयपादे १५, चतुर्थपादे ८ । षष्ठाध्यायस्य प्रथमपादे १३, द्वितीयपादे ११, तृतीयपादे २१, चतुर्थपादे १४, पञ्चमपादे २१, षष्ठपादे ७, सप्तमपादे १३, अष्टमपादे १० ।

सप्तमाध्यायस्य प्रथमपादे ५, द्वितीयपादे १, तृतीयपादे १४, चतुर्थपादे २ । अष्ट·

२५, अर्थवादादिमानता ५, स्मृतीनाञ्च प्रमाणत्वम् १९, नामधेयप्रमाणता २० ।

द्वितीये—धर्मः प्रतिपदं न तु २१, भिन्नं शाखान्तरात्कर्म १४, गृहत्सामाद्यभिन्नत्वम् १४, यावज्जीवे कर्मविधिः २ ॥

तृतीये–तृतीयार्थप्रतिज्ञार्थः १५, गौण्या वृत्तेस्तथाऽस्थिता १९, वेदधर्मस्तूच्चतादिः २०, निवीतं न विधेयं स्यात् २३, शेषं कार्यं न चाऽऽज्यतः २०, प्रकृतौ पर्णतादि च १७, अङ्गाङ्गिनोर्बर्हिरादिः २४, परिक्रियस्स्वामिकर्म २७ ।

चतुर्थे—तुर्याध्यायप्रतिश्रवः२०, स्ववार्थं खदिरादि न १८, द्रव्यादौ न फलार्थता २०, राजसूये यजेः फलम् १२ ।

पञ्चमे—क्रमः श्रुत्या नियम्यते २२, पदार्थोऽनुसमीयते १२, प्रयाजैकादशैः पशोः १५, श्रुत्यर्थाभ्यां पाठबाधः ९ ।

षष्ठे—स्वर्गस्साध्यो न साधनम् १४, सत्रे प्रत्येकमेव च ११, अशक्त्या त्वङ्गहानं स्यात् २१, नाशेऽवत्तस्य चाऽऽज्यतः १४, अभ्युदये च न कर्मभित् २३, सत्रं कुर्युस्तुल्यकल्पाः ७, सर्वस्वे जनकादि न १६, चतुर्होत्रा तु लौकिके ११ ।

सप्तमे—पारिप्लवा न धर्मास्स्युः ५, गीतिस्साम तु नर्च्चता १, नामातिदेशकश्चाऽथ १४, लिङ्गातिदेशस्सौर्यादौ ३ ।

---

माध्यायस्य प्रथमपादे १९, द्वितीयपादे ६, तृतीयपादे ६, चतुर्थपादे २. नवमाध्यायस्य प्रथमपादे १७, द्वितीयपादे २०, तृतीयपादे १४, चतुर्थपादे १५ । दशमाध्यायस्य प्रथमपादे १२, द्वितीयपादे १४, तृतीयपादे २१, चतुर्थपादे २६, पञ्चमपादे २६, षष्ठपादे २२, सप्तमपादे २० अष्टमपादे १९ । एकादशाध्यायस्य प्रथमपादे ९, द्वितीयपादे १५, तृतीयपादे १५, चतुर्थपादे २०, द्वादशाध्यायस्य प्रथमपादे २१, द्वितीयपादे १५, तृतीयपादे १६, चतुर्थपादे १६॥ एवमेव भाष्यवार्तिकादौ तत्तत्पादेष्वधिकरणसंख्योद्धृता । एवंव च रीतिः पार्थसारथिमिश्रैरप्यवलम्बिता । मीमांसासारसङ्ग्रहकाराः श्री शङ्करभट्टास्तु भाष्यकारैस्तत्तत्पादेषु विचारितान् विषयभेदान्, वर्णकभेदांश्चाऽऽश्रित्य संख्यां योजितवन्तः । सैव च रीतिरनेन ग्रन्थकारेणाऽप्यनुसृता । विशेषश्चाऽत्र मीमांसासारसङ्ग्रहत एवाऽवगन्तव्यः, विस्तरभयान्नेह लिख्यते ।

अष्टमे—अष्टमार्थस्य प्रतिश्रुतिः २०, पयसो वाजिने च सः ६, स्थानसाम्यान्न चोदकः ६, दर्विहोमे च नामता ५ ।

नवमे--सप्तमाद्यार्थस्मरणम् २७, गीतिस्सामादिरूपता ३१, व्रीह्यादिमन्त्र ऊहस्स्यात् १५, समासोहश्च वङ्क्रिषु १५ ।

दशमे--लुप्तार्थबाधो विकृतौ १४, पाकस्स्यात्कृष्णलचरौ ३५, पश्वादौ चोदकोऽस्ति च २१, उपहोमैर्न नारिष्ठाः २८, लोपोऽन्त्यस्यैव विकृतौ २८, तृचे स्तोत्राङ्गसामनि २३, हृदयादिपशौ हविः २०, नार्षेये पर्युदासता २० ।

एकादशे--प्रकृतीष्टौ फलं सह ११, कालाद्यैक्यं प्राकृतेष्टेः १६, अङ्गाङ्गिनोः कालभेदः १६, कर्तुर्दक्षिणया भेदः २१ ।

द्वादशे--पश्वङ्गानि प्रसज्यन्ते २१, त्रेतापाकाद्यसाधनम् १५, वत्सत्वचाहताबाधः १६, जयाशीरादिषु च सः १६ ।

एवं हि द्वादशाध्यायैः प्रमाणैर्धर्मतत्परैः ।
श्रेयस्करस्सुनिर्णीतो धर्मः कृत्स्नस्सनातनः ॥
उपादेयस्स विज्ञेयः श्रेयस्कामैरतोऽन्यथा ।
अधर्मो हेय एव स्याद्वावदूकैः प्रकल्पितः ॥
सूरयो यत्र मुह्यन्ति वेदगुह्ये सनातने ।
सर्वज्ञेन विना वक्तुं तं धर्मं कः क्षमः पुमान् ॥
धर्मादेवाऽर्थमाप्नोति सर्वान् कामान् सुदुर्लभान् ।
नश्यन्ति सर्वपापानि धर्मादेव न संशयः ॥
मृतं शरीरमुत्सृज्य काष्ठलोष्ठसमं क्षितौ ।
विमुखा बान्धवा यान्ति धर्मस्तमनुगच्छति ॥
यावद्वेदं न जानाति सधर्मं ब्राह्मणो न हि ।
तावत्ततोऽहं वक्ष्यामि सधर्मं वेदमुत्तमम् ॥
वेदनं वेदं इत्याहुः मुनयस्सूक्ष्मदर्शिनः ।
सत्यं ज्ञानमनन्तं तद्ब्रह्मात्मानं परं विदुः ॥

आहुस्तदेव धर्मं च सर्वस्याऽस्य विधारणात् ।
औत्पत्तिकाधिकरणे मुनिं व्यासं प्रशंसता ॥
जैमिन्याचार्यमुनिनाऽप्ययमर्थस्सुसूचितः ।
वदन्ति नित्यं वेदं हि स्वप्रकाशं सुनिर्मलम् ॥
निरपेक्षप्रमाणं च वैदिकास्सर्व एव ते ।
निरपेक्षो नित्य आत्मा स्वप्रकाशस्सतां मतः ॥
अतोऽहं वेदमात्मानं धर्मं मन्ये सुनिश्चितम् ।
इत्याचारदयाहिंसादानस्वाध्यायकर्मणाम् ॥
अयं तु परमो धर्मो यद्योगेनाऽऽत्मदर्शनम् ।
सर्वेभ्यो द्रव्ययज्ञेभ्यो ज्ञानयज्ञं प्रशंसता ॥
जगतो गुरुणा चाऽयमर्थस्सम्यक् प्रकाशितः ।
मानानधिगतार्थावबोधकत्वेन निश्चितम् ॥
प्रामाण्यं वेदवाक्यानां सफलं वैदिकैरिह ।
पुंसः प्रयत्नसाध्यश्चेच्चोदनागम्य एव सः ॥
सिद्धार्थो ज्ञानगम्यश्चेद्विधिना किं प्रयोजनम् ।
अस्तु वोपास्तिविषयः सिद्धोऽप्यात्मा सुदुर्लभः ॥
उपासनां विना ज्ञानं न स्थिरं विदुषामपि ।
क्रियापरत्वं वेदस्य पूर्वकाण्डे सुनिश्चितम् ॥
आचार्यैर्मन्दबुद्धीनां पथ्यं तद्धि कृतं महत् ।
उपायाः शिक्षमाणानां बालानामुपलालनाः ॥
असत्ये वर्त्मनि स्थित्वा ततस्सत्यं समीहते ।
विभुं वदन्ति चाऽऽत्मानं नित्यं सर्वेऽपि वैदिकाः ॥
तत्र केचिच्च कर्तारं भोक्तारं नेति केचन ।
जगत्सत्यं केचिदाहुः शून्यं मिथ्येति चाऽपरे ॥
स्वस्वपक्षस्थापनार्थं विवदन्ति परस्परम् ।
सर्वेऽपि मोक्षं मन्यन्ते व्यवहारविवर्जितम् ॥

नित्यं च दुःखरहितमिष्टं पुण्यफलं परम् ॥
धर्मस्य फलमिच्छन्ति धर्मं नेच्छन्ति मानवाः ।
न पापफलमिच्छन्ति पापं कुर्वन्ति यत्नतः ॥
जानन्तोऽपि विमुह्यन्ति यस्य मायाविमोहिताः ।
दुःखं पश्यन्ति सुखवत्तं वन्दे मायिनं परम् ॥
शास्त्रस्य हृदयं भक्त्या मया चाऽत्र प्रकाशितम् ।
तद्विद्वांसोऽनुगृह्णन्तु क्षमन्तां साहसं मम ॥
अवजानन्ति ये केचिद्धर्मं वेदं महेश्वरम् ।
तानास्तिकपथे कर्तुं कृतो यत्नः शुभो मया ॥
वेदस्सस्मृतिकोऽस्य मूलममलं धर्मैकसारं विदुः
स्कन्धैर्द्वादशभिस्ततश्च सकलाः षष्टिस्सुशाखाच्छदैः ।
सूत्रैर्गुच्छसहस्रयुक्तिकुसुमः श्रेयोर्थिपक्ष्याश्रितो
जैमिन्यालय उत्तमः सुरतरुस्सोऽयं जयत्यध्वगः ॥
अधीत्य वेदं विधिवत्प्रभक्त्या यथोक्तवृक्षं सफलं भजन्ति ।
द्विजातयस्ते सुखिनो भवन्ति विधूतपापाः परमं व्रजन्ति ॥
स्मृतिकृतपरिखातं वेदशालोपगूढं मुनिजनपरिरक्षं युक्तिमार्गं विशालम् ।
अनभिभवसमर्थं धर्मदुर्गं प्रविश्य स्थित इति भयशून्यस्सर्वदैवाऽहमस्मि ॥
धर्मस्तुतिपरो वाचोव्यापारोऽयं सुशोभनः ।
श्रद्धालोर्वेदनिष्ठस्य नाऽपवाद्यः कदाचन ॥
निर्दोषत्वैकवाक्यत्वं लोकेऽस्मिन्नैव दृश्यते ।
सापवादा यतः केचिन्मोक्षस्वर्गावपि प्रति ॥
तस्मान्नाऽत्र प्रतिकर्तव्यं दोषदृष्टिपरं मनः ।
दोषो ह्यविद्यमानोऽपि तच्चित्तानां प्रकाशते ॥
यदत्र लिखितं किञ्चिन्मया चाऽज्ञानभाक्तितः ।
तेन प्रीणातु भगवान् धर्मो नारायणः प्रभुः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामकृष्णानन्दतीर्थपादाकिङ्करशिष्य-
श्रीसत्यज्ञानानन्दतीर्थयतिविरचिते वेदप्रकाशे सर्वशास्त्रार्थस-
ङ्ग्रहाख्यं प्रथमं प्रकरणं समाप्तम् ॥

# अथ विधिभेदो नाम द्वितीयं प्रकरणम् ॥

जैमिनिं मुनिमानम्य शबरस्वामिनं तथा ।
कुमारिलस्वामिनं च विधिं वक्ष्ये यथामति ॥ १ ॥
अप्राप्तं फलवन्तं च विधत्तेऽर्थं स्वशक्तितः ।
चतुर्धा स विधिर्ज्ञेय उत्पत्त्यादिभिरन्वितः ॥ २ ॥

## ( विधिस्वरूपम् )

यो यथोक्तमर्थं स्वसामर्थ्येन प्रकाशयति स विधिरुत्पत्त्यादिभिर्धर्मैर्युक्तस्सन्नुत्पत्तिविधिर्विनियोगविधिः प्रयोगविधिरधिकारविधिश्चेति चतुर्विधो ज्ञेय इत्यर्थः ।

## ( उत्पत्तिविधिः )

तत्र कर्मस्वरूपमात्रबोधको विधिः प्रथमः । यथा 'अग्निहोत्रं जुहोती'ति । उत्पत्तिविधौ च कर्मणः करणत्वेनैवाऽन्वयो—होमेनेष्टं भावयेदिति, न तु होमं कुर्यादिति साध्यत्वेन । न चोत्पत्तिविधाविष्टवाचकपदाभावेन कर्मणा इष्टं भावयेदिति कथं वाक्यार्थ इति वाच्यम् । विधिश्रुतेरेवेष्टबोधकत्वात् । एतत्सर्वं भावनाप्रकरणे स्पष्टं भविष्यति । तस्माद्युक्तं कर्म करणत्वेनाऽन्वेतीति ।

## ( विनियोगविधिस्वरूपम् )

(१)अङ्गप्रधानसम्बन्धबोधको विधिर्विनियोगविधिः । यथा—'दध्ना जुहोती'ति । स हि तृतीयाप्रतिपन्नाङ्गभावस्य दध्नो होमसम्बन्धं विधत्ते—दध्ना होमं भावयेदिति । दध्यादीनामङ्गत्वं नाम (२)परोद्देशप्रवृत्तकृतिव्याप्यत्वं पारार्थ्यम् । तच्चाऽनेन विधिना ज्ञाप्यते । एतस्य विधेस्सहकारिभूतानि षट् प्रमाणानि श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपाणि ।

---

१. अङ्गस्य प्रधानेन साकं यस्सम्बन्धः निरूप्यनिरूपकभावः, तद्बोधक इत्यर्थः ।

२. अन्योद्देशेन प्रवृत्तस्य पुरुषस्य या कृतिः, तद्व्याप्यत्वं कारकत्वेन तत्सम्बन्धित्वमित्यर्थः ।

## ( श्रुतिनिरूपणम् , तद्विभागश्च )

तत्र निरपेक्षो रवः श्रुतिः । सा च त्रिविधा —(१)विधात्री अभिधात्री विनियोक्त्री चेति । तत्र विधात्री लिङाद्यात्मिका । अभिधात्री व्रीह्यादिश्रुतिः । यस्य च शब्दस्य श्रवणादेव सम्बन्धः प्रतीयते सा विनियोक्त्री । सा च त्रिविधा—विभक्तिरूपा, एकाभिधानरूपा, एकपदरूपा चेति ।

## ( विभक्तिश्रुतेरुदाहरणानि )

तत्र विभक्तिश्रुत्याऽङ्गत्वं यथा—'व्रीहिभिर्यजेते'ति । तथा आरुण्यस्याऽपि (२)क्रयाङ्गत्वं तृतीयाश्रुत्या । न चाऽमूर्तस्य तस्य कथं क्रयाङ्गत्वमिति वाच्यम् । एकहायनीरूपद्रव्यपरिच्छेदद्वारा तदुपपत्तेः । 'व्रीहीन् प्रोक्षती'ति प्रोक्षणस्य व्रीह्यङ्गत्वं द्वितीयाश्रुत्या । तत्प्रोक्षणं (३)न व्रीहिस्वरूपार्थम् , किन्तु अपूर्वसाधनत्वप्रयुक्तं यदि व्रीहिषु प्रोक्षणं क्रियते तदा तैर्यागेऽनुष्ठितेऽपूर्वं भवति नाऽन्यथेति । अतः प्रकरणसहकृतया द्वितीयाश्रुत्या (४)तण्डुलनिर्वृत्तिपणाड्या यदपूर्वसाधनं तदङ्गत्वं प्रोक्षणस्योच्यत इति । एवं सर्वत्राप्यङ्गत्वपूर्वप्रयुक्तत्वं द्रष्टव्यम् । (५)एवमन्योऽपि विभक्तिश्रुत्या विनियोगो ज्ञेयः ।

---

१. विधात्री प्रवर्तनाबोधिका, अभिधात्री शक्त्याऽर्थबोधिका, विनियोक्त्री अङ्गत्वबोधिकेत्यर्थः ।

२. 'अरुणया एकहायन्या पिङ्गाक्ष्या सोमं क्रीणाती'ति वाक्यविहितक्रयाङ्गत्वमिति बोध्यम्।

३. न व्रीहिस्वरूपार्थं न व्रीहित्वावच्छिन्ननिष्पत्त्यर्थं प्रोक्षणम् , व्रीहित्वावच्छिन्नोद्देशेन न विधीयत इत्यर्थः । व्रीहित्वावच्छिन्नद्रव्यं हि प्रोक्षणाभावेऽपि प्रागेव स्वयं सिद्धमिति न तस्य उद्देश्यत्वं भवितुमर्हतीति व्रीहीनिति शब्दोपात्तमपि व्रीहित्वं नोद्देश्यतावच्छेदकं किन्तु अपूर्वसाधनत्वमेवोद्देश्यतावच्छेदक माह्यमिति भावः ।

४. घृतादेरप्यपूर्वसाधनत्वाविशेषात्तत्र प्रोक्षणप्राप्तौ तद्व्यावृत्त्यर्थमिदं विशेषणम् ।

५. 'क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छती'त्यत्र चतुर्थीश्रुत्या दण्डप्रदानस्य मैत्रावरुणाङ्गत्वम्, 'चात्वालान्मृदमाहरती'त्यत्र पञ्चमीश्रुत्या चात्वालस्य मृदाहरणक्रियाङ्गत्वम्, 'दध्नेन्द्रियकामस्य जुहुयादि'त्यत्र षष्ठीश्रुत्या दध्न इन्द्रियाङ्गत्वमित्येवं चतुर्थ्यादिविभक्तिकृतोऽपि विनियोगो ज्ञेय इत्यर्थः ।

## ( समानाभिधानपदश्रुत्योरुदाहरणानि )

'पशुना यजेते'त्यत्रैकत्वपुंस्त्वयोः समानाभिधानश्रुत्या कारकाङ्गत्वम् । यजेतेत्याख्याताभिहितसंख्याया भावनाङ्गत्वं समानाभिधानश्रुतेरेव । पदश्रुत्या च (१)यागाङ्गत्वम् । न चाऽमूर्तस्य तस्य कथं यागाङ्गत्वमिति वाच्यम् । कर्तृपरिच्छेदद्वारा तदुपपत्तेः । कर्ता चाऽऽक्षेपलभ्यः । आख्यातेन हि भावनोच्यते । सा च कर्तारं विनाऽनुपपन्ना तमाक्षिपतीति स्थितम् । एवं त्रिविधः श्रुतिविनियोगः ।

## ( लिङ्गनिरूपणम्, तद्विभागश्च )

सामर्थ्यं लिङ्गम्, 'सामर्थ्यं सर्वभावानां लिङ्गमित्यभिधीयते' इति । तेनाऽङ्गत्वं यथा—(२)'बर्हिर्देवसदनं दामी'त्यस्य लवनाङ्गत्वम् । स हि लवनं प्रकाशयितुं समर्थः । तच्च लिङ्गं द्विविधम्—सामान्यसम्बन्धबोधकप्रमाणान्तरापेक्षम्, तदनपेक्षं च ।

तत्र यदन्तरेण यन्न सम्भवत्येव तस्य तदङ्गत्वं तदनपेक्षं केवललिङ्गादेव । यथा—अर्थज्ञानस्य कर्मानुष्ठानाङ्गत्वम् । द्वितीयं यथा—उक्तस्य मन्त्रस्य लवनाङ्गत्वम्, लवनं हि मन्त्रं विनाऽप्युपायान्तरेण स्मृत्वा कर्तुं शक्यते । अतो मन्त्रो न लवनस्वरूपार्थस्सम्भवति, किन्त्वपूर्वसाधनीभूतलवनप्रकाशनार्थः । तत्वं च न सामर्थ्यमात्रादवगम्यते, लवनप्रकाशनमात्रे सामर्थ्यात् । अतोऽवश्यं प्रकरणादि सामान्यसम्बन्धबोधकं स्वीकार्यम् । दर्शपूर्णमासप्रकरणे हि मन्त्रस्य पाठादेवमवगम्यते—अनेन मन्त्रेण दर्शपूर्णमासापूर्वसम्बन्धि किञ्चित्प्रकाश्यत इति । अन्यथा प्रकरणपाठवैयर्थ्यप्रसङ्गात् । किं तदपूर्वसम्बन्धि प्रकाश्यमित्यपेक्षायां सामर्थ्याद्बर्हिर्लवनमित्यवगम्यते । तद्बर्हिस्संस्कारद्वाराऽपूर्वसम्बन्धीति मन्त्रस्य सामर्थ्यात्तदर्थत्वे सति नाऽऽनर्थक्यं प्रसज्येत । तस्मात् 'बर्हिर्देवसदनं दामी'त्यस्य प्रकरणाद्दर्शपूर्णमाससम्बन्धितयाऽवगतस्य सामर्थ्याल्लवनाङ्गत्वमिति सिद्धम् ।

---

१. आख्याताभिहितसंख्याया इति शेषः ।  २. मै. सं. १. १. २.

## ( वाक्यस्वरूपम् )

समभिव्याहारो वाक्यम् । समभिव्याहारो नाम साध्यत्वादिवाचकद्वितीयाद्यभावे वस्तुतः शेषशेषिणोस्सहोच्चारणम् । यथा–(१)'यस्य पर्णमयी जुहूर्भवती'ति । अत्र हि न द्वितीयादिविभक्तिः श्रूयते । केवलं पर्णताजुह्वोः समभिव्याहारमात्रम् । तस्मादेव च पर्णतायाः जुह्वङ्गत्वं प्रतीयते । न चाऽऽनर्थक्यम्, जुहूशब्देनाऽपूर्वलक्षणात् । तदयं वाक्यार्थः–पर्णतया(२)अवत्तहविर्धारणद्वारा यदपूर्वसाधनं तद्भावयेदिति । एवञ्च पर्णतया यदि जुहूः क्रियते तदैव तत्साध्यमपूर्वं भवति, नाऽन्यथेति गम्यत इति न पर्णताया वैयर्थ्यम् । अवत्तहविर्धारणद्वारेति चाऽवश्यं वक्तव्यम्, अन्यथा (३)स्रुवादावपि पर्णतापत्तेः । सा चेयं पर्णताऽनारभ्याधीता न सर्वक्रतुषु गच्छति, किन्तु प्रकृतिष्विति स्थितम् । एवं वाक्यादङ्गत्वम् ।

## ( प्रकरणस्वरूपं तद्विभागश्च )

उभयाकाङ्क्षा प्रकरणम् । यथा प्रयाजादिषु 'समिधो यजती'ति । अत्र हीष्टविशेषस्याऽनिर्देशात् समिद्यागेन भावयेत्, किमित्यस्त्युपकार्याकाङ्क्षा । दर्शपूर्णमासवाक्येऽपि दर्शपूर्णमासाभ्यां स्वर्गं भावयेत्, कथमित्यस्त्युपकारकाकाङ्क्षा । अत उभयाकाङ्क्षायां प्रयाजादीनां दर्शपूर्णमासाङ्गत्वं सिध्यति । इदं द्विविधम्—महाप्रकरणमवान्तरप्रकरणञ्चेति । तत्र फलभावनायाः प्रकरणं महाप्रकरणम् । तच्च प्रयाजादीनां ग्राहकम्, तत्पुनः प्रकृतावेव । यत्र समग्राङ्गोपदेशः सा प्रकृतिः । यथा–दर्शपूर्णमासादिः । तत्र चोभयाकाङ्क्षारूपं प्रकरणं सम्भवति, आकाङ्क्षानुपर-

---

१. ( तै. सं का. ३. प्र. ५. अ. ७ ) पर्णमयी पलाशवृक्षनिर्मिता । पलाशवृक्षस्य पर्णशब्दवाच्यत्वं 'तृतीयस्यामितो दिवि सोम आसीत्, तं गायत्र्याहरत् । तस्य पर्णमच्छिद्यत । तत् पर्णोऽभवत् । तत्पर्णस्य पर्णत्वम्' इत्यर्थवादतोऽवगन्तव्यम् ।

२. अवत्तं 'द्विर्हविषोऽवद्यती'ति वाक्यविहितमवदानेन संस्कृतं यद्धविः तद्धारणद्वारेत्यर्थः ।

३. जुहूः उपभृत् ध्रुवा एषां त्रयाणां पात्राणां स्रुगिति संज्ञा । येन उपभृतः ध्रुवायाश्च होमायाऽऽज्यमुद्ध्रियते तस्य पात्रान्तरस्य स्रुव इति संज्ञा ।

मात्। विकृतौ तु न प्रकरणम्। यत्र समग्राङ्गोपदेशो नाऽस्ति सा विकृतिः। (१)उभयविधं प्रकरणं क्रियाया एव विनियोजकम्, न द्रव्यगुणयोरिति स्थितम्।

## ( स्थाननिरूपणम् )

(२)देशसामान्यं स्थानम्। तच्च द्विविधम्—पाठसादेश्यं अनुष्ठानसादेश्यञ्चेति। यथाहुः—

(३)'तत्र क्रमो द्विधैवेष्टो देशसामान्यलक्षणः।
पाठानुष्ठानसादेश्याद्विनियोगस्य कारणमि'ति॥

स्थानं क्रमश्चेत्यनर्थान्तरम्। पाठसादेश्यमपि द्विविधम्—यथासङ्ख्यपाठः, सन्निधिपाठश्चेति। तत्र(४) 'ऐन्द्राग्नमेकादशकपालं निर्वपेत्' (५)वैश्वानरं द्वादशकपालं निर्वपेदि' त्येवं क्रमविहितेष्टिषु (६)'इन्द्राग्नी रोचना दिव' इत्यादीनां याज्यानुवाक्यामन्त्राणां यथासङ्ख्यं प्रथमस्य प्रथमम्, द्वितीयस्य द्वितीयमित्येवं विनियोगः स यथासङ्ख्यपाठात्। प्रथमपाठितस्य मन्त्रस्य हि कैमर्थ्याकाङ्क्षायां प्रथमतो विहितं कर्मैव प्रथममुपतिष्ठते, समानदेशत्वात्। यानि तु वैकृतान्यङ्गानि प्राकृताङ्गाननुवादेन विहितानि तेषां विकृत्यर्थत्वं सान्निधिपाठात्। पशुधर्माणामग्नीषोमीयार्थत्वमनुष्ठानसादेश्यादिति स्थानसङ्क्षेपः।

## ( समाख्यानिरूपणम् )

समाख्या यौगिकः शब्दः। सा द्विविधा—वैदिकी लौकिकी चेति।

---

१. महाप्रकरणस्यैव ग्रन्थकारेण लक्षणोदाहरणे प्रदर्शिते। अवान्तरप्रकरणस्य तु—अङ्गभावनासम्बन्धीतिकर्तव्यताकाङ्क्षाघटितोभयाकाङ्क्षा अवान्तरप्रकरणमिति लक्षणं ज्ञेयम्। तच्च सन्दंशपतितानां 'अभिक्रामन् जुहोती'ति वाक्यविहिताभिक्रमणादीनां विनियोजकम्। सन्दंशो नाम एकाङ्गानुवादेन विधीयमानयोरङ्गयोरन्तराले विहितत्वम्। अभिक्रमणन्तु प्रतिप्रयाजं किञ्चिदन्तरमाहवनीयसमीपदेशं प्रति पदप्रक्षेपणम्।

२. एकदेशविहितत्वमित्यर्थः। ३. तं. वा. ३. ३. ५. पृ. ८३२.

४. मै. सं. २. १. १. ५. मै. सं. २. १. २.

६. मै. सं. ४. ११. १.

तत्र होतुश्चमसभक्षणाङ्गत्वं होतृचमस इति वैदिक्या । अध्वर्योस्तत्-त्पदार्थाङ्गत्वं लौकिक्या आध्वर्यवमिति सङ्क्षेपः ।

## ( अङ्गत्वबोधकप्रमाणानां पारदौर्बल्यम् )

तदेवं निरूपितानां श्रुत्यादिषट्प्रमाणानामुत्तरोत्तरं प्रति पूर्वपूर्वस्य प्राबल्यं द्रष्टव्यम्। तथा चोक्तम्-(१)'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादि'ति । समवाये समानविषयत्वेन द्वयो-र्विरोधे परस्य दौर्बल्यम् । कुतः ? अर्थविप्रकर्षात्—स्वार्थबोधने परस्य पूर्वव्यवधानेनाऽप्रवृत्तेरित्यर्थः । अयमाशयः--एकत्र विनियुक्तस्य नि-राकांक्षत्वादन्यत्र विनियोगो विरुद्ध एव, परन्तु विनियोजकप्रमाणयोरस-मबलत्वेऽन्यतरविनियोगस्यायोगादगत्याऽऽकांक्षोत्पादनेन विनियुक्तविनि-योगः स्वीक्रियते । यथा 'खादिरो यूपो भवति, खादिरं वीर्यकामस्य यूपं कुर्यादि'ति वाक्याभ्यां विनियुक्तस्य खादिरत्वस्य वीर्यफले विनियोगः ।

## ( श्रुतिलिङ्गयोः पारदौर्बल्यम् )

यत्र तु प्रमाणयोरतुल्यत्वम्, तत्र न स्वीक्रियते, प्रबलप्रमाणेन दुर्बलविनियोगबाधात् । यथा(२)'कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुष' इत्यस्याः ऋचः 'ऐन्द्र्या गार्हपत्यमुपतिष्ठत' इति तृतीयाविभक्ति-श्रुत्या अन्यनिरपेक्षया गार्हपत्योपस्थानशेषत्वबोधिकयेन्द्रप्रकाशनसाम-र्थ्यरूपलिङ्गप्राप्तमिन्द्रशेषत्वं बाध्यते । लिङ्गं हि न साक्षाच्छेषत्वं बोध-यति, किन्त्विन्द्रप्रकाशनमात्रं करोति । तेन च लिङ्गेनाऽनेन मन्त्रेणेन्द्र उपस्थापयितव्य इति श्रुतिः कल्पनीया, तया शेषत्वबोध इति श्रुतिव्य-वधानेन शेषत्वबोधकं लिङ्गं झटिति स्वार्थबोधकश्रुत्या बाध्यम् ।

## ( लिङ्गवाक्ययोः पारदौर्बल्यम् )

तथा लिङ्गेन वाक्यं बाध्यम् । यथा(३)'स्योनं ते सदनं कृणोमि ।

---

१. जै. सू. ३. ३. १४.

२. 'कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे । उपोपेन्नु मघवन् भूय इन्नु ते दानं देवस्य पृच्यते' इति सामग्रा ऋक् ।

३. ( तै. ब्रा. ३. ७. ५.) मन्त्रस्याऽयमर्थः-हे पुरोडाश ते तव स्योनं समीचीनं,

घृतस्य धारया सुशेवं कल्पयामि । तस्मिन्सीदाऽमृते प्रतितिष्ठ, व्रीहीणां मेध सुमनस्यमानः' इति मन्त्रभागयोःप्रत्येकं सदनकरणे पुरोडाशासादने च तत्प्रकाशनसामर्थ्यलिङ्गेन श्रुतिद्वारा विनियोगे सति प्रतीतमेकवाक्यत्वं बाध्यते । तस्य कृत्स्नेऽपि मन्त्रे सदनकरणप्रकाशनसामर्थ्यं पुरोडाशासादनप्रकाशनसामर्थ्यं च लिङ्गं कल्पयित्वा श्रुतिकल्पनयोभयकृत्स्नमन्त्रविनियोगबोधने द्वाभ्यां लिङ्गश्रुतिभ्यां व्यवधानेन श्रुत्यैकव्यवहितक्लृप्तलिङ्गाद्दुर्बलत्वात् । न च सामर्थ्यं न कल्प्यमिति वाच्यम् । असमर्थस्य विनियोगायोगात् । अत एव गङ्गापदस्य तीरे बोधविनियोगे लक्षणारूपसामर्थ्यं कल्प्यते ।

## ( वाक्यप्रकरणयोः पारदौर्बल्यम् )

तथा वाक्येन प्रकरणं बाध्यम् । यथा(१)साह्नप्रकरणाम्नातद्वादशोपसदां 'द्वादश (२)अहीनस्ये'ति वाक्येनाऽहीनाङ्गत्वबोधकेन प्रकरणप्राप्तसाह्नाङ्गत्वबाधादुत्कर्षः, प्रधानस्याऽङ्गाकांक्षारूपं प्रकरणं, तस्याऽङ्गप्रधानवत्यैकवाक्यतासामर्थ्यश्रुतिभिः कल्प्यमानाभिः स्वार्थविनियोगप्रमितौ व्यवधानेनाऽङ्गसामर्थ्यश्रुत्योर्द्वयोः कल्पकवाक्याद्दुर्बलत्वात् ।

## ( प्रकरणसान्निध्योः पारदौर्बल्यम् )

तथा प्रकरणेन सन्निधिर्बाध्यः । यथा——राजसूयप्रकरणेन तदन्तर्गताभिषेचनीयाख्यसोमयागविशेषसन्निधिपाठप्राप्तं शुनश्शेपोपाख्यानादेः अभिषेचनीयशेषत्वं बाधित्वा कृत्स्नराजसूयशेषत्वमापादितम् । सान्निधेः प्रकरणादिकल्पकत्वेन क्लृप्तप्रकरणाद्दुर्बलत्वात् ।

---

सदनं स्थानं, कृणोमि करोमि । घृतस्य धारया सुशेवं सुखसेवनीयं कल्पयामि, तस्मिन् सदने सीद उपविश हे व्रीहीणां मेध सारभूत, सुमनस्यमानः शोभनमनस्कस्सन् अमृते मरणरहिते स्थाने प्रतितिष्ठ प्रतिष्ठितो भवेति ।

१. साह्नशब्देन सहाऽह्ना समाप्यमानत्वात् ज्योतिष्टोमोऽभिधीयते । तत्प्रकरणे आम्नाताः याः द्वादशोपसदः आहुतिविशेषाः तासामित्यर्थः ।

२. अहीनशब्दः अहर्गणविशेषद्विरात्रादौ यजतिचोदनाचोदिते यागरूढः ।

## ( सन्निधिसमाख्ययोः पारदौर्बल्यम् )

तथा सन्निधिना समाख्या बाध्यते । तथा हि—पौरोडाशिकसमाख्याके काण्डे आग्नेयपुरोडाशादिकर्मणां क्रमेण मन्त्रा आम्नाताः । तत्र दधिपयोरूपसान्नाय्यसन्निधौ 'शुन्धध्वं दैव्याय कर्मण' इति मन्त्र आम्नातः । तत्र समाख्याबलेनाऽस्य मन्त्रस्य (१)पुरोडाशपात्रशुन्धनशेषत्वं प्राप्तं सान्निधिना बाधित्वा (२)सान्नाय्यपात्रशुन्धनशेषत्वमापाद्यते, पुरोडाशसम्बन्धिकाण्डं पौरोडाशिकमिति पौरुषसमाख्यायाः काण्डान्तर्गतमन्त्रस्य पुरोडाशसम्बन्धसामान्यबोधकत्वेऽपि, शेषशेषिभावरूपविनियोगबोधकत्वे सन्निध्याद्यपेक्षत्वेन दुर्बलत्वादिति । एवं विरोधे सति श्रुतिर्बाधिकैव, समाख्या बाध्यैव । मध्यस्थानां चतुर्णां पूर्वबाध्यत्वं परबाधकत्वं चेति श्रुतिलिङ्गसूत्रार्थः । तदेवं निरूपितानि सङ्क्षेपतः श्रुत्यादिषट्प्रमाणानि ।

## ( अङ्गस्वरूपम्, तद्विभागश्च )

एतत्सहकृतेन विनियोगविधिना समिदादिभिरुपकृत्य दर्शपूर्णमासाभ्यां यजेतेत्येवंरूपेण यानि विनियुज्यन्ते तान्यङ्गानि । तानि द्विविधानि सिद्धरूपाणि क्रियारूपाणि चेति । तत्र सिद्धानि जातिद्रव्यसङ्ख्यादीनि । तानि च दृष्टार्थान्येव । क्रियारूपाणि च द्विविधानि—गुणकर्माणि प्रधानकर्माणि चेति । एतान्येव सान्निपत्योपकारकाणि आरादुपकारकाणीति चोच्यन्ते ।

## ( सन्निपत्योपकारकलक्षणम् )

तत्र कर्माङ्गद्रव्याद्युद्देशेन विधीयमानं कर्म सान्निपत्योपकारकम् । यथाऽवघातप्रोक्षणादि । तच्च दृष्टार्थमदृष्टार्थं दृष्टादृष्टार्थञ्च । दृष्टार्थमवघातादि । अदृष्टार्थं प्रोक्षणादि । दृष्टादृष्टार्थं (३)पशुपुरोडाशयागादि ।

---

१. उलूखलम्, मुसलम्, कृष्णाजिनम्, दृषदुपले, इत्यादीनि पुरोडाशपात्राणि ।

२. कुम्भी, शाखापवित्रम्, अभिधानी, दोहनपात्रमित्यादीनि सान्नाय्यपात्राणि ।

३. सन्ति यागादौ त्रयोंऽशाः—उद्देशांशः, त्यागांशः, प्रक्षेपांशश्चेति । उद्दिश्य काञ्चिद्देवतां त्यज्यते हविः । त्यक्तस्य च हविषः आहवनीयादिविहितदेशे प्रक्षेपः क्रियते ।

तद्धि द्रव्यत्यागांशेनाऽदृष्टं, देवतोद्देशेन च देवतास्मरणं दृष्टं करोति। इदमेव चाऽऽश्रयिकर्मेत्युच्यते। तच्च सन्निपत्योपकारकं द्विविधम्—उपयोक्ष्यमाणार्थं उपयुक्तार्थञ्चेति। तत्राऽऽद्यमवघातप्रोक्षणादि, व्रीहीणां यागे उपयोक्ष्यमाणत्वात्। द्वितीयं प्रतिपत्तिकर्म इडाभक्षणादि उपयुक्तपुरोडाशसंस्कारकम्। उपयुक्तसंस्कारार्थं चोपयोक्ष्यमाणसंस्कारार्थाद्दुर्बलम्, उपयुक्तापेक्षया उपयोक्ष्यमाणेऽत्यादरात्।

## ( आरादुपकारकलक्षणम् )

द्रव्याद्यनुद्दिश्य केवलं विधीयमानं कर्म आरादुपकारकम्। यथा (१)प्रयाजादि। तच्च यद्यपि साक्षात्प्रधानाङ्गम्, तथाऽपि सन्निपत्योपकारकाद्दुर्बलम्। तदेवं निरूपितं द्विविधमप्यङ्गजातं न यागादिस्वरूपप्रयुक्तम्, (२)आनर्थक्यात्। किन्त्वपूर्वप्रयुक्तमेव। तत्रोत्पत्त्यपूर्वस्य यागस्वरूपानुष्ठानानन्तरमेवोत्पद्यमानत्वात्सान्निपत्योपकारकाणां पूर्वाङ्गानां तदुत्पत्तावुपयोगः, उत्तराङ्गानान्तु तेषां तत्स्थितावुपयोगः। परमापूर्वस्य तु साङ्गप्रयोगानुष्ठानानन्तरमेवोत्पद्यमानत्वात् सर्वेषामारादुपकारकाणां तदुत्पत्तौ, (३)प्रयोगबहिर्भूतस्य तु तस्य तत्स्थितावुपयोग इति सङ्क्षेपः। तत्सिद्धं सर्वाङ्गानामपूर्वार्थत्वम्। तदेवं निरूपितस्सङ्क्षेपतो विनियोगविधिः।

तत्र पशुपुरोडाशयागे त्यागांशेन न किञ्चिद्दृष्टं प्रयोजनमिति अदृष्टमुत्पाद्यते। उद्देशांशेन तु वपायागे पूर्वमुपयुक्तायाः हृदयाद्यङ्गयागे चोपयोक्ष्यमाणायाः देवतायाः स्मरणरूपं दृष्टं प्रयोजनमुत्पाद्यते। पुरोडाशयागसमये स्मृतायाः वपायागाङ्गभूतदेवतायाः हृदयाद्यङ्गयागकाले झटित्युपस्थितिसम्भवादिति पशुपुरोडाशयागः उभयविधप्रयोजनकत्वात् दृष्टादृष्टार्थ इत्युच्यते।

१. समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति' इति विहिताः पञ्च यागाः प्रयाजपदेनाऽभिधीयन्ते। आदिपदेनाऽनूयाजादयो ग्राह्याः।

२. देवतोद्देशेन द्रव्यत्यागरूपस्य यागस्वरूपस्य विना अङ्गानुष्ठानेनाऽपि सम्पादयितुं शक्यत्वात् तत्स्वरूपनिष्पत्त्यर्थं तदनुष्ठानं व्यर्थमिति अपूर्वप्रयुक्तत्वमेवाऽङ्गानामिति भावः।

३. 'वाजपेयेनेष्ट्वा बृहस्पतिसवेन यजेते'ति वाक्यविहितं बृहस्पतिसवाख्यं कर्म प्रकरणान्तरन्यायेन प्रसिद्धबृहस्पतिसवापेक्षया कर्मान्तरं सद्वाजपेयाङ्गमिति स्थितिः। तथाऽपि क्त्वाप्रत्ययेनाऽऽनन्तर्याभिधानात् 'समानकर्तृकयोः पूर्वकाले' इति पूर्व-

## ( प्रयोगविधिस्वरूपम् )

प्रयोगप्राशुभावबोधको विधिः प्रयोगविधिः । स चाऽङ्गवाक्यैकवाक्यतामापन्नः प्रधानविधिरेव । स हि साङ्गं प्रधानमनुष्ठापयन्विलम्बे प्रमाणाभावात् अविलम्बापरपर्यायं प्रयोगप्राशुभावं विधत्ते । न च विलम्बवदविलम्बेऽपि प्रमाणाभाव इति वाच्यम् । विलम्बे हि अङ्गप्रधानविध्येकवाक्यतावगततत्साहित्यानुपपत्तिः । न हि विलम्बेन क्रियमाणयोः पदार्थयोः सहकृतमिति साहित्यं व्यवहरन्ति । स चाऽविलम्बो नियते क्रमे आश्रीयमाणे भवति । अन्यथा हि किमेतदनन्तरमेतत्कर्तव्यमेतदनन्तरं वेति प्रयोगविक्षेपापत्तेः । अतः प्रयोगविधिरेव स्वविधेयप्रयोगप्राशुभावसिध्यर्थं नियतं क्रममपि पदार्थविशेषणतया विधत्ते ।

## ( क्रमबोधकप्रमाणानि )

तत्र क्रमो नाम(१)विततिविशेषः, पौर्वापर्यरूपो वा । तत्र षट्प्रमाणानि — श्रुत्यर्थपाठस्थानमुख्यप्रवृत्त्याख्यानि ।

## ( श्रुतिनिरूपणम्, तद्विभागश्च )

तत्र क्रमपरवचनं श्रुतिः । तच्च द्विविधम् —केवलक्रमपरं तद्विशिष्टपदार्थपरञ्चेति । तत्र (२)'वेदं कृत्वा वेदिं करोती'ति केवलक्रमपरम् । वेदिकरणादेर्वचनान्तरेण विहितत्वात् । (३)'वषट्कर्तुः प्रथमभक्षः' इति

---

कालमात्र एव तस्य स्मरणात्, बृहस्पतिसवातिरिक्ताङ्गविशिष्टवाजपेयप्रयोगं परिसमाप्य अतिदेशप्राप्तवसन्तकाल एव वाजपेयप्रयोगबहिर्भावेण बृहस्पतिसवानुष्ठानमिति चतुर्थतृतीयान्तिमाधिकरणे सिद्धान्तितम् । तत्र वाजपेयप्रयोगेन निष्पन्नेऽपि फलापूर्वे प्रयोगबहिर्भूतस्य बृहस्पतिसवस्य तत्स्थितावुपयोग इत्यर्थः ।

१. प्रथममेकमङ्गं अनन्तरमन्यत् अनन्तरमन्यत् अनन्तरमन्यदिति चरमाङ्गपर्यन्तं यदानुपूर्व्यं तद्विततिपदवाच्यम् ।

२. शयानवत्सजान्वाद्याकृतिविशिष्टो दर्भमुष्टिविशेषो वेदः । वेदिश्च सम्मार्जनखननोद्धननादिभिस्संस्कारैस्संस्कृता भूमिः ।

३. 'याज्याया अधि वषट्करोती'ति वाक्येन याज्यानन्तरं पठनीयत्वेन विहितो यो वषट्कारः तत्पठितुः होत्रादेरित्यर्थः ।

तु क्रमविशिष्टपदार्थपरम् । (१)एकप्रसरताभङ्गभयेन भक्षानुवादेन क्रम-मात्रस्य विधातुमशक्यत्वात् ।

### ( पाठाद्यपेक्षया श्रुतिक्रमस्य बलवत्त्वम् )

सेयं श्रुतिरितरप्रमाणापेक्षया बलवती, तेषां वचनकल्पनाद्वारा क्रम-प्रमाणत्वात् । अत एव आश्विनस्य पाठक्रमात् तृतीयस्थाने ग्रहणप्रसक्तौ 'आश्विनो दशमो गृह्यत' इति वचनाद्दशमस्थाने ग्रहणमित्युक्तम् ।

### ( अर्थक्रमः )

यत्र प्रयोजनवशेन निर्णयस्स आर्थक्रमः । यथा—अग्निहोत्रहोमयवागूपाकयोः । अत्र यवाग्वाः होमार्थत्वेन तत्पाकः प्रयोजनवशेन पूर्वमनुष्ठीयते । स चाऽयं पाठक्रमाद्बलवान् । यथापाठं ह्यनुष्ठाने क्लृप्तप्रयोजनबाधः, अदृष्टार्थत्वञ्च स्यात् । न हि होमानन्तरं क्रियमाणस्य पाकस्य किञ्चिद्दृष्टं प्रयोजनमस्ति ।

### ( पाठक्रमः तद्विभागश्च )

पदार्थबोधकवाक्यानां यः क्रमः स पाठक्रमः । तस्माच्च पदार्थानां क्रम आश्रीयते । स च पाठो द्विविधः—मन्त्रपाठो ब्राह्मणपाठश्च । तत्र आग्नेयाग्नीषोमयागयोस्तत्तद्याज्यानुवाक्याक्रमाद्यः क्रम आश्रीयते स मन्त्र-पाठात् । स चाऽयं मन्त्रपाठो ब्राह्मणपाठाद्बलवान् । अनुष्ठाने ब्राह्मण-वाक्यापेक्षया मन्त्रवाक्यस्याऽन्तरङ्गत्वात् । ब्राह्मणवाक्यं हि प्रयोगाद्बहिरेवेदमेवं कर्तव्यमित्येवमवबोध्य कृतार्थमिति न पुनः प्रयोगकाले व्याप्रियते । मन्त्राः पुनरनन्यप्रयोजनाः प्रयोगसमवेतार्थस्मारका इति वक्ष्यामः । तेनाऽनुष्ठानक्रमस्य स्मरणक्रमाधीनत्वात् , तत्क्रमस्य च मन्त्रक्रमाधीनत्वात् अन्तरङ्गो मन्त्रपाठ इतरस्मादिति बलवान् ।

---

१. एकस्मिन्नर्थे प्रसरः वृत्तिः यस्य तत् पदं एकप्रसरम् , तस्य भावः एकप्रसरता । एकः प्रसरः ययोस्तयोर्भाव इति वा । सम्भूयविशिष्टार्थप्रतिपादकत्वमित्यर्थः । तस्या भङ्ग-भयेनेत्यस्याऽयमर्थः—समासस्थले वृत्तिघटकीभूतानां पदानामेकार्थप्रतिपादकत्वं नियतम् । तदत्र भक्षस्योद्देश्यत्वेन प्राथम्यस्य विधेयत्वेन च भावनायामन्वये सति प्रथमभक्ष-पदस्य समासावगतं यदेकार्थप्रतिपादकत्वरूपं सामर्थ्यं तस्य भङ्गो भवेदिति ।

## ( स्थानक्रमः )

(१)प्रकृतौ नानादेशानां पदार्थानां विकृतौ वचनादेकस्मिन्देशेऽनुष्ठाने कर्तव्ये यस्य देशेऽनुष्ठीयन्ते तस्य प्रथममनुष्ठानम्, इतरयोस्तु पश्चात् अयं यः क्रमः स स्थानक्रमः। स्थानं नाम उपस्थितिः। यस्य हि देशे अनुष्ठीयन्ते तत्पूर्वतने पदार्थे कृते स एव प्रथममुपस्थितो भवतीति युक्तं तस्य प्रथममनुष्ठानम्।

## ( मुख्यक्रमः )

(२)प्रधानक्रमेण योऽङ्गानां क्रम आश्रीयते स मुख्यक्रमः। येन क्रमेण प्रधानानि क्रियन्ते तेनैव चेत्क्रमेण तेषामङ्गान्यनुष्ठीयन्ते, तदा सर्वेषामङ्गानां स्वैः स्वैः प्रधानैस्तुल्यं व्यवधानं भवति। व्युत्क्रमेण त्वनुष्ठाने केषाञ्चिदङ्गानां स्वैः प्रधानैरत्यन्तमव्यवधानम्, अन्येषामत्यन्तं व्यवधानञ्च

---

१. अत्राऽयं विषयः—सन्ति ज्योतिष्टोमे त्रयः पशुयागाः—अग्नीषोमीयः सवनीयः आनुबन्ध्यश्चेति। तत्राऽग्नीषोमीयः पशुः औपवसथ्ये दिवसे ( दीक्षादिनाच्चतुर्थदिने ) अनुष्ठीयते 'स एष औपवसथ्येऽहन् द्विदेवत्यः पशुरालभ्यत' इति वचनात्। सवनीयः पशुः सुत्यादिवसे ( दीक्षादिनात्पञ्चमदिने ) अनुष्ठीयते 'आश्विनं ग्रहं गृहीत्वा त्रिवृता यूपं परिवीयाग्नेयं सवनीयं पशुमुपाकरोती'ति वचनात्। आनुबन्ध्यस्तु पशुरवभृथानन्तरमनुष्ठीयते। एते त्रयोऽपि पशुयागाः एकदिनसाध्यसोमयागविशेषे साद्यस्कनामके चोदकेन प्राप्ताः। अत्र चैतेषां 'सह पशूनालभेते'ति श्रुतं साहित्यं सवनीयदेशे सम्पाद्यं प्रधानेनात्यन्तप्रत्यासत्तिलाभात् स्थानातिक्रमसाम्याच्चेति स्थितं तृतीयेपान्त्याधिकरणे। तथा च तत्र प्रथमतः कः पशुरनुष्ठेय इति सन्देहे क्लृप्तक्रमकपूर्वपदार्थोपस्थितिरूपस्थानप्रमाणेन सवनीयपशुरेव, तस्यैवाऽऽश्विनग्रहग्रहणोत्तरमुपस्थितत्वादिति।

२. प्रधानानि येन क्रमेण अनुष्ठीयन्ते, तेनैव क्रमेण तदङ्गान्यप्यनुष्ठेयानि। अयं यः क्रमः स मुख्यक्रम इत्यर्थः। तथा हि—दर्शपूर्णमासप्रकरणे प्रयाजहोमानन्तरं 'प्रयाजशेषेण हवींष्यभिघारयती'ति श्रुतम्। प्रयाजानिष्ट्वा तच्छेषं वेयामासादितेषु प्रधानहविष्षु अभिघारणं कुर्यादिति तदर्थः। तत्र दर्शे तावत् आग्नेयः पुरोडाशः, ऐन्द्रं दधि, ऐन्द्रं पयश्चेति त्रीणि हवींषि सन्ति। एतेषां मध्ये कस्य हविषः प्रथममभिघारणं अनन्तरञ्च कस्येत्यपेक्षायामाग्नेयस्यैव प्रथममनुष्ठेयत्वेन तदङ्गहविरभिघारणस्यैव प्रथममनुष्ठानम्, अनन्तरमेव सान्नाय्यस्य, तस्य पश्चादनुष्ठीयमानत्वात्। तथा च सति प्रयोगविध्यवगतसाहित्यस्याऽनुग्रहो भवेत्।

स्यात् । तच्चाऽयुक्तम्, प्रयोगविध्यवगतसाहित्यबाधापत्तेः । अतः प्रधानक्रमोऽप्यङ्गक्रमे हेतुः ।

## ( पाठमुख्यक्रमयोः पारदौर्बल्यम् )

(१)स चाऽयं मुख्यक्रमः पाठक्रमाद्दुर्बलः । मुख्यक्रमो हि प्रमाणान्तरसापेक्षप्रधानक्रमप्रतिपत्तिसापेक्षतया विलम्बितप्रतिपत्तिकः । पाठक्रमस्तु निरपेक्षस्वाध्यायपाठक्रममात्रसापेक्षतया न तथेति बलवान् ।

## ( मुख्यप्रवृत्तिक्रमयोः पारदौर्बल्यम् )

स चाऽयं मुख्यक्रमः प्रवृत्तिक्रमाद्बलवान् । प्रवृत्तिक्रमे ह्याश्रीयमाणे बहूनामङ्गानां प्रधानविप्रकर्षो भवति, अस्मिंस्त्वाश्रयिमाणे सन्निकर्षः ।

## ( प्रवृत्तिक्रमः )

(२)सहप्रयुज्यमानेषु सन्निपातिनामङ्गानामवृत्त्याऽनुष्ठाने कर्तव्ये द्वितीयादिपदार्थानां प्रथमानुष्ठितपदार्थक्रमाद्यः क्रमः, स प्रवृत्तिक्रमः ।

---

१. इदमत्रोदाहरणम्—पौर्णमास्यां त्रीणि प्रधानानि—आग्नेयः पुरोडाशः, उपांशुयाजः आज्यहविष्कः, अग्नीषोमीयः पुरोडाश इति । तत्रेमानि क्रमेणाऽनुष्ठीयन्ते । तदङ्गभूतहविर्निर्वापानुष्ठाने सन्देहः किं मुख्यक्रमानुरोधेन आग्नेयानन्तरमग्नीषोमीयात्पूर्वमाज्यनिर्वापः कर्तव्यः ? अथवा पाठक्रमानुसारेण अन्त एवेति । पाठक्रमस्य मुख्यक्रमापेक्षया प्राबल्यात्तदनुसारेणाऽऽज्यहविर्निर्वापोऽन्त एवाऽनुष्ठेय इति निर्णयः ।

२. अस्याऽर्थः—यत्र बहूनां प्रधानानामेककालकर्तव्यता प्राप्ता तत्र तदङ्गानामपि सन्निपत्योपकारकाणां युगपदनुष्ठानं प्राप्तम्, तच्चाऽशक्यमित्येकैकस्मिन्प्रधानेऽङ्गावृत्त्यामवश्यं भाविन्यां तत्र यत्प्रधानमारभ्य येन क्रमेण प्राथमिकाङ्गानुष्ठानं कृतं तेनैव क्रमेण तदेव प्रधानमारभ्य द्वितीयाङ्गानुष्ठानमिति यः क्रमः स प्रवृत्तिक्रम इति । यथा—'सप्तदश प्राजापत्यान् पशूनालभते' ( तै. ब्रा. १. ३. ४. ) इति वाक्येन वाजपेये प्रजापतिदेवताकाः सप्तदश पशवो विहिताः । तेषां तदङ्गानां चोपाकरणनियोजनपर्यग्निकरणादीनां साहित्यं सम्पादनीयम् । तत्सिध्यर्थं प्रथममङ्गमुपाकरणरूपं यस्मिन् कस्मिंश्चित् पशावारभ्य केनचित्क्रमेणाऽनुष्ठेयम् । द्वितीयं त्वङ्गं नियोजनं यस्मिन् पशावुपाकरणमारभ्य येन क्रमेण कृतं तस्मिन्नेव पशावारभ्य तेनैव क्रमेण कर्तव्यम् । तथा च सति तत्तत्पशूपाकरणानां स्वस्वनियोजनैस्तुल्यं व्यवधानं सिद्धं भवति । अतश्च प्रथमानुष्ठितपदार्थक्रमात् यो द्वितीयपदार्थक्रमः स प्रवृत्तिक्रम इति सिद्धम् ।

तदेवं सङ्क्षेपतो निरूपितः षड्विधकर्मनिरूपणेन प्रयोगविधिः ।

## ( अधिकारविधिस्वरूपम् )

फलस्वाम्यबोधको विधिरधिकारविधिः । फलस्वाम्यञ्च कर्मजन्यफलभोक्तृत्वम् । स च 'यजेत स्वर्गकाम' इत्येवंरूपः । अनेन हि स्वर्गमुद्दिश्य यागं विदधता स्वर्गकामस्य यागजन्यफलभोक्तृत्वं प्रतिपाद्यते । 'यस्याऽहिताग्नेरग्निर्गृहान् दहेत्सोऽग्नये क्षामवतेऽष्टाकपालं पुरोडाशं निर्वपेदि'त्यादिभिस्तु गृहदाहादौ निमित्ते कर्म विदधद्भिः निमित्तवतः कर्मजन्यपापक्षयरूपफलस्वाम्यं प्रतिपाद्यते । तच्च फलस्वाम्यं तस्यैव, योऽधिकारिविशेषणविशिष्टः । अधिकारिविशेषणञ्च तदेव यत्पुरुषविशेषणत्वेन श्रुतम् । अत एव 'राजा राजसूयेन स्वाराज्यकामो यजेते'त्यनेन स्वाराज्यमुद्दिश्य राजसूयं विदधताऽपि न स्वाराज्यकाममात्रस्य तत्फलभोक्तृत्वं प्रतिपाद्यते, किन्तु राज्ञस्सतस्तत्कामस्य ।

किञ्चित्तु पुरुषविशेषणत्वेनाऽश्रुतमप्यधिकारिविशेषणं भवति । यथा—अध्ययनविधिसिद्धा विद्या, अग्निसाध्येषु च कर्मसु आधानसिद्धाग्निमत्ता, सामर्थ्यञ्च । एतेषां पुरुषविशेषणत्वेनाऽश्रवणेऽप्यधिकारिविशेषणत्वमस्त्येव । उत्तरक्रतुविधीनां ज्ञानाक्षेपशक्तेरभावेनाऽध्ययनविधिसिद्धज्ञानवन्तं प्रत्येव प्रवृत्तेः । अग्निसाध्यकर्मणाञ्चाऽन्यपेक्षत्वेन तद्विधीनामाधानसिद्धाग्निवन्तं प्रत्येव प्रवृत्तेः । अत एव च शूद्रस्य न यागादावधिकारः, तस्याऽध्ययनविधिसिद्धज्ञानाभावात् , आधानसिद्धाग्न्यभावाच्च । रथकारस्य तु 'वर्षासु रथकारोऽग्नीनादधीते'ति तावन्मात्राधिकारत्वान्नाऽन्यत्राऽधिकारः । एवं स्त्रीणामपि । सोऽपि भर्त्रा सहैव, न स्वातन्त्र्येणेति स्थितम् ।

एवं सामर्थ्यस्याऽपि अधिकारिविशेषणत्वम् , तथाऽर्थितायाश्चेति बोध्यम् । 'अर्थी समर्थो विद्वान् अधिकारी'ति हि प्रसिद्धम् । असमर्थं प्रति विध्यप्रवृत्तेश्च । तच्च सामर्थ्यं काम्ये कर्मणि अङ्गप्रधानविषयम् । नित्ये तु प्रधानविषयम् , अङ्गेषु यथाशक्ति । नित्यानि हि या-

वज्जीवश्रुत्या यावज्जीवं कर्तव्यत्वेन चोदितानि । न च यावज्जीवं केनाऽपि साङ्गः प्रयोगः कर्तुं शक्यते । अतो नित्येषु प्रधानमात्रसमर्थोऽधिकारीति दिक् । तत्सिद्धं फलस्वाम्यबोधको विधिरधिकारविधिरिति । तदेवं निरूपितं चतुर्विधभेदनिरूपणेन विधेः प्रयोजनवदर्थपर्यवसानम् ।

स च पुनस्त्रिविधः । तथा हि-भगवतो जैमिनेः सूत्रेषु (१)'विधिर्वा स्यादपूर्वत्वात्' (२)'उदक्त्वाच्चाऽपूर्वत्वात' (३)'विधिस्तु धारणेऽपूर्वत्वात्' (४)'नियमार्था गुणश्रुतिः' (५)'परिसङ्ख्या' इत्येवमादिषु त्रयो विधिप्रकाराः प्रसिद्धाः । ते च भट्टपादैः परस्परासङ्कीर्णतया विस्पष्टमुपपादिताः--

(६)"विधिरत्यन्तमप्राप्ते नियमः पाक्षिके सति ।
तत्र चाऽन्यत्र च प्राप्ते परिसंख्येति गीयते" ॥ इति ॥

तिस्रः खलु विधेर्विधाः—अपूर्वविधिः, नियमविधिः परिसङ्ख्याविधिश्चेति ।

## ( अपूर्वविधिस्वरूपम् )

तत्र कालत्रयेऽपि कथमप्यप्राप्तस्य प्राप्तिफलको विधिराद्यः । यथा 'व्रीहीन् प्रोक्षति' 'यजेत स्वर्गकामः' इत्यादि । नाऽत्र व्रीहीणां प्रोक्षणस्य संस्कारकर्मणः, यागस्य च स्वर्गार्थत्वस्य विना नियोगं मानान्तरेण कथमपि प्राप्तिरस्ति । अतोऽयमपूर्व एव विधिः ।

## ( नियमविधेस्स्वरूपम् )

पक्षप्राप्तस्याऽप्राप्तांशपरिपूरणफलो विधिर्द्वितीयः । यथा—'व्रीहीनवहन्ती'ति । अत्र एतद्विध्यभावेऽपि पुरोडाशप्रकृतिद्रव्याणां तण्डुलनिष्पत्त्याक्षेपादेवाऽवहननप्राप्तिर्भविष्यतीति न तत्प्राप्त्यर्थोऽयं विधिः, किन्त्वाक्षेपादवहननप्राप्तौ तद्वदेव लोकावगतकारणत्वाविशेषान्नखविदलनादिरपि पक्षे प्राप्नुयादिति अवहननाप्राप्तांशसम्भवात्तदंशपूरणफलः ।

---

१. जै. सू. ३. ३. १२. २. जै, सू. ३. ३. १ ३.३. जै. सू. ३. ३. १५.
४. जै. सू. ३ ६. ४०. ५ जै. सू. १. २. ४२. ६. तं. वा. १. २. ४. पृ.६१.

## ( परिसंख्याविधिस्वरूपम् )

द्वयोश्शेषिणोरेकस्य शेषस्य वा, एकस्मिन् शेषिणि द्वयोश्शेषयोर्वा नित्यप्राप्तौ शेष्यन्तरस्य शेषान्तरस्य वा निवृत्तिफलको विधिस्तृतीयः । यथा–अग्निचयने 'इमामगृभ्णन् रशनामृतस्येत्यश्वाभिधानीमादत्त' इति । यथा वा–चातुर्मास्यान्तर्गतेष्टिविशेषे गृहमेधीये 'आज्यभागौ यजती'ति ।

अग्निचयनेऽश्वरशनाग्रहणं गर्दभरशनाग्रहणञ्चेति द्वयमनुष्ठेयम् । तत्राऽश्वरशनाग्रहणे 'इमामगृभ्णन्' इति मन्त्रो लिङ्गादेव रशनाग्रहणप्रकाशनसामर्थ्यरूपान्नित्यं प्राप्नोतीति न तत्प्राप्त्यर्थः, तदप्राप्तांशपरिपूरणार्थो वा विधिः, किन्तु लिङ्गाविशेषाद्गर्दभरशनाग्रहणेऽपि मन्त्रः प्राप्नुयादिति तन्निवृत्त्यर्थः ।

तथा गृहमेधीयस्य दर्शपूर्णमासप्रकृतिकत्वात् अतिदेशादेवाऽऽज्यभागौ नित्यं प्राप्नुत इति न तत्र विधिः तत्प्राप्त्यर्थः, तन्नियमार्थो वा, किन्त्वतिदेशात्प्रयाजादिकमपि प्राप्नुयादिति तन्निवृत्त्यर्थः ।(१)गृहमे-

१. चातुर्मास्यान्तर्गतसाकमेधाख्ये तृतीये पर्वणि 'मरुद्भ्यो गृहमेधिभ्यस्सर्वासां दुग्धे सायमोदनमि'ति गृहमेधीयेष्टिं विधायाऽऽम्नातं 'आज्यभागौ यजति यज्ञताया' इति वाक्यमुदाहृत्य यत्र विचारितं तदधिकरणं गृहमेधीयाधिकरणमित्युच्यते । तत्राऽष्टौ पक्षा विचारिताः । तेषु पञ्चमपक्षरीत्या इदमुदाहरणम् । तथा हि—प्रकृतितश्चोदकेन प्राप्तयोराज्यभागयोरनुवादमात्रमित्याद्यः पक्षः । अनुवादमात्रत्वे 'वादमात्रं ह्यनर्थकमि'ति न्यायेनाऽऽनर्थक्यापत्तेः तत्परिहारार्थं सौर्यादौ निर्वपत्यादेः प्रकृतिसादृश्यबोधनद्वारा प्रकृतितानियामकत्ववदत्राऽपि आज्यभागयोः पुनर्विधानं आज्यभागवत्त्वसादृश्येन प्रकृतिनियमार्थमिति **द्वितीयः पक्षः** । उत्पत्तिवाक्यश्रुतौदनशब्दावगतौषधद्रव्यकत्वादैष्टिकातिदेशसिद्धौ पुनः 'आज्यभागौ यजती' त्यस्य वैयर्थ्यापत्तेः, चोदकप्राप्तैष्टिकविध्यन्तप्रशंसाद्वारा प्रकृतगृहमेधीयस्तुत्यर्थं सार्थवादकं वचनमिति **तृतीयः पक्षः** । असन्निधवाचनिकगुणव्यवहितेन प्रकृतगृहमेधीयवाक्येनैकवाक्यत्वाभावात् अर्थवादत्वानुपपत्तेः, अभ्यासादाज्यभागधर्मककर्मान्तरविधानार्थमिदमिति **चतुर्थः पक्षः** । एवं सत्याज्यभागशब्दस्य धर्मलक्षणार्थत्वे जघन्यवृत्त्याश्रयणापत्तेः कर्मान्तरविध्ययोगात् चोदकेन सर्वेष्वङ्गेषु प्राप्तेष्वाज्यभागयागपुनःश्रवणं प्रयाजानूयाजादीनां परिसंख्यार्थम्—आज्यभागावेव यजति न प्रयाजानूयाजादीन् इति **पञ्चमः पक्षः** । अस्मिन् पक्षे प्राप्तपरिसंख्यात्वाङ्गीकारे त्रैदोष्यापत्तेः उपदिष्टाज्यभागवर्जं प्रयाजादीनामतिदेश इति **षष्ठः**

धीयाधिकरणपूर्वपक्षरीत्या इदमुदाहरणम् । यत्किञ्चिदुदाहर्तव्यमित्युदाहृतम् ।

न च नियमविधावपि पक्षप्राप्तावहननस्याऽप्राप्तांशपरिपूरणे कृते तदवरोधात्पाक्षिकसाधनान्तरस्य नखविदलनादेर्निवृत्तिरपि लभ्यत इति इतरनिवृत्तिफलकत्वाविशेषान्नियमपरिसंख्ययोः फलतो विवेको न युक्त इति शङ्क्यम् । विधितोऽवहनननियमं विनाऽऽक्षेपलभ्यस्य नखविदलनादेर्निवर्तयितुमशक्यतयाऽप्राप्तांशपरिपूरणरूपस्य नियमस्य प्राथम्याद्विधेयावहननगतत्वेन प्रत्यासन्नत्वाच्च । तस्यैव नियमविधिफलत्वोपगमात् । तदनुनिष्पादिन्या अविधेयगतत्वेन विप्रकृष्टाया इतरनिवृत्तेः सन्निकृष्टफलसम्भवे फलत्वानौचित्यात् ।

एवं (१)'पञ्च पञ्चनखा भक्ष्याः' इत्यपि परिसंख्याविधिः । इदं हि वाक्यं न भक्षणपरम्, तस्य रागतः प्राप्तत्वात् । नाऽपि नियमपरम्, पञ्चनखापञ्चनखभक्षणस्य युगपत्प्राप्तेः पक्षे प्राप्त्यभावात् । अत इदं अपञ्चनखभक्षणनिवृत्तिपरमिति भवति परिसंख्याविधिः ।

---

पक्षः । प्रकारापेक्षिण्या विकृतिभावनायाः पदार्थस्वरूपानपेक्षतया उपकारापेक्षायां प्रकारद्वारा सर्वपदार्थप्रापकेण चोदकेनाऽऽज्यभागयोरपि प्राप्तत्वात् तद्वर्जं प्रयाजादिमात्रप्रापणे प्रमाणाभावात् प्रत्यक्षवचनमनुवादकं सम्पद्यमानमनर्थकं स्यात् । अतः प्राकृतसर्वाङ्गविषयकस्याऽतिदेशस्याऽनेन विशेषविषयकेणोपसंहार इति सप्तमः पक्षः । 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यत्रोपकारापेक्षिण्यां भावनायां प्रकरणाम्नातप्रयाजादीनां यथायथं दृष्टादृष्टोपकारसम्पादनद्वारा यथाऽन्वयः, तथाऽऽज्यभागयोरप्यन्वयो वक्तव्यः । तथा सति प्रकृतावाज्यभागयोरपि तादृशव्यापारात्मकं रूपं क्लृप्तमिति विकृतावपि प्रकाराकाङ्क्षिण्यां भावनायां यावत्सादृश्येन चोदकः कल्प्यते ततः प्रागेवाऽऽज्यभागश्रवणेन लक्षणया झटिति तद्रूपव्यापाररूपोपस्थित्या तदन्वयेन विकृतिभावनाया निराकाङ्क्षत्वात् आकाङ्क्षां विना चोदककल्पनैव नाऽवतरतीति चोदकाभावेनाऽपूर्वत्वावगतेः आज्यभागव्यतिरिक्ताङ्गानां प्रमाणाभावेनैवाऽप्राप्तेः फलतश्शेषान्तरपरिसंख्येति सिद्धान्तः । एवञ्च सिद्धान्तेऽप्राप्तपरिसंख्यात्वान्न त्रैदोष्यम्, पञ्चमपक्षे प्राप्तपरिसंख्यात्वात् त्रैदोष्यमिति विवेको बोध्यः ।

१. इदं हि वाक्यं रामायणे भगवन्तं श्रीरामभद्रं प्रति वालिनोक्तम् । 'पञ्च पञ्चनखा भक्ष्याः ब्रह्मक्षत्रेण राघव । शल्यकः श्वाविधो गोधा शशः कूर्मश्च पञ्चमः' ( वाल्मी. रा. कि. १७. ३९. ) इति समग्रश्लोकः ।

सा च परिसङ्ख्या द्विविधा-श्रौती लाक्षणिकी चेति । तत्र(१) 'अत्र ह्येवाऽवपन्ती'त्यत्र श्रौती परिसंख्या, एवकारेण पवमानातिरिक्तस्तोत्रव्यावृत्तेरभिधानात् । पञ्च पञ्चनखा भक्ष्या इत्यत्र लाक्षणिकी, इतरनिवृत्तिवाचकपदस्याऽभावात् । अत एवैषा त्रिदोषग्रस्ता । दोषत्रयञ्च-श्रुतहानिरश्रुतकल्पना प्राप्तबाधश्चेति । श्रुतस्य पञ्चनखभक्षणस्य हानात्, अश्रुतापञ्चनखभक्षणनिवृत्तिकल्पनात्, प्राप्तस्य चाऽपञ्चनखभक्षणस्य बाधादिति । अस्मिंश्च दोषत्रये दोषद्वयं शब्दनिष्ठम् । प्राप्तबाधस्तु दोषोऽर्थनिष्ठ इति दिक् ।

अत्रेदं तत्त्वं बोध्यम्-यद्यपि नियमपरिसंख्योदाहरणयोः पाक्षिकी नियता च प्राप्तिर्वस्तुतो नाऽस्त्येव, तुषविमोककार्येणाऽऽक्षिप्ततया ह्यवघातस्य पाक्षिकी प्राप्तिर्वक्तव्या, आक्षेपात्प्रागेव 'व्रीहीनवहन्ती'ति प्रत्यक्षशास्त्रं झटिति प्रवर्तते । तदनन्तरं प्रत्यक्षशास्त्रसिद्धेनैकोपायेन नैराकाङ्क्ष्यादनियतोपायाक्षेप एव न प्रवर्तते । (२)एवं 'अश्वाभिधानीमादत्त' इति

१. अत्राऽयं विषयः—ज्योतिष्टोमे सन्ति द्वादश स्तोत्राणि—प्रातस्सवने बहिष्पवमानस्तोत्रमेकं त्रिवृत्स्तोमकम्, चत्वार्याज्यस्तोत्राणि पञ्चदशस्तोमकानि, माध्यन्दिनसवने माध्यन्दिनपवमानस्तोत्रमेकं पञ्चदशस्तोमकम्, चत्वारि पृष्ठस्तोत्राणि सप्तदशस्तोमकानि, तृतीयसवने आर्भवपवमानस्तोत्रमेकं सप्तदशस्तोमकम्, यज्ञायज्ञीयस्तोत्रमेकं एकविंशस्तोमकमिति । स्तोत्रं नाम प्रगीतमन्त्रसाध्यगुणिनिष्ठगुणाभिधानम् । तद्गता संख्या स्तोमशब्देनाऽभिधीयते । ज्योतिष्टोमविकृतिभूताः केचन 'एकविंशेनाऽतिरात्रेण प्रजाकामं याजयेत्' 'त्रिणवेनौजस्कामममि'त्यादयस्सोमयागाः प्रकृतितो विवृद्धस्तोमकाः, केचन 'त्रिवृदग्निष्टुदग्निष्टोम' इत्यादयोऽविवृद्धस्तोमकाः । तत्र यस्मिन् यागे स्तोमविवृद्धिः तस्मिन् संख्यासम्पत्त्यर्थं स्थानान्तरात्सामान्यानेयानि । आनीतानां तेषां प्रकृतितः प्राप्तेषु निरुक्तद्वादशस्वपि स्तोत्रेष्वविशेषादावापः प्राप्तः । तत्रेदमाम्नायते—'त्रीणि ह वै यज्ञस्योदराणि, गायत्री बृहत्यनुष्टुप्, अत्र ह्येवाऽऽवपन्ति' इति। अस्याऽर्थः—गायत्री बृहत्यनुष्टुब्रूपाणि छन्दांसि त्रीणि यज्ञस्योदरस्थानापन्नानि । अत एतत्त्रितयातिरिक्तेषु पवमानस्तोत्रसम्बन्धिषु छन्दस्सु, पवमानातिरिक्तेषु वा स्तोत्रेषु न समावापः कार्य इति । एवञ्च 'अत्र ह्येवाऽऽवपन्ती' त्यत्र एवकारेण पवमानातिरिक्तस्तोत्रव्यावृत्तेरभिधानात् श्रौतीपरिसंख्येति सिद्धम् ।

२. चयने इष्टकार्थं मृदाहरणाय नीतयोरश्वगर्धभयोर्मध्येऽश्वकण्ठगतरशनाग्रहणे 'इ-

प्रत्यक्षशास्त्रेणाऽश्वरशनाग्रहणे झटिति विनियुक्तस्य मन्त्रस्य तेनैव नैराकाङ्क्ष्याद्रशनाद्वयसाधारण्येन लैङ्गिकविनियोगकल्पनं न प्रवर्तते। तथा च नियमपरिसंख्ययोरप्यपूर्वविधिवद्वस्तुतोऽत्यन्तप्राप्त एव विषयः, तथाऽपि नियमपरिसंख्याशास्त्रयोरप्रवृत्तौ अर्थाक्षेपेण नखविदलनस्याऽपि कादाचित्कप्राप्त्याऽवघातस्य पाक्षिक्येव प्रवृत्तिस्स्यात् , मन्त्रस्य च लिङ्गविशेषेण गर्दभरशनाग्रहणेऽपि विनियोगः स्यात् । तयोः प्रवृत्तौ तु आक्षेपमन्त्रलिङ्गावतारप्रतिबन्धादवघातस्य नियतता, मन्त्रस्य गर्दभरशनातो निवृत्तिश्च लभ्यत इति नियमपरिसंख्याविध्योः प्रवृत्तावपूर्वविध्यविशेषेऽपि आक्षेपमन्त्रलिङ्गावतारप्रतिबन्धद्वारा अवघातनियमेन गर्दभरशनायां मन्त्रवर्जनेन च फलवत्त्वात्फलतो नियमपरिसंख्याव्यपदेश इत्यपूर्वविधितस्तयोर्भेदः । यद्यपि नियमे नखविदलनादिनिवृत्तिः, परिसंख्यायां गर्दभरशनादिनिवृत्तिरितीतरनिवृत्तिलाभ उभयत्राऽप्यविशिष्टः, तथा अवघातेनैव तुषविमोकः कार्यः, अश्वरशनायामेव मन्त्रः कार्य इत्येवकारेण फलविवरणमप्यविशिष्टम्, तथाऽप्यवघातशास्त्रेणाऽवघातनियमस्याऽऽक्षेपतोऽवघाताप्राप्त्यव्रीह्यंशेऽवघातप्रापणरूपस्याकरणे उपायान्तरसाधारणेनाऽऽक्षेपेणापातत उपायान्तरस्य निराकर्तुमशक्यतया तन्निवृत्त्यसम्भवेन नियमस्य प्रथमोपस्थितत्वाद्विधेयगतत्वेन प्रत्यासन्नत्वाच्च प्राप्तांशपूरणरूपो नियम एव फलम् , उपायान्तरनिवृत्तिस्तु चरमोपस्थितत्वादविधेयगतत्वेन विप्रकृष्टत्वाच्च तदनुनिष्पादिनी न फलम् । परिसंख्योदाहरणे तु द्वयोरपि नित्यप्राप्तिसम्भवेन स्वरूपप्राप्तेर्नियमस्य वा फलत्वायोगादितरनिवृत्तिरेव फलम् । एवं नियमपरिसंख्याविध्योः फलभेदे स्थिते एवकारेण फलविवरणं एकत्राऽयोगव्यवच्छेदार्थम् , अन्यत्राऽन्ययोगव्यवच्छेदार्थमिति ।

नानाविधानि कर्माणि कारकाणि फलानि च ।
विधौ तिष्ठन्ति सततं सोऽपि तद्व्याप्य तिष्ठति ॥
क्रियाद्वारमृते द्रव्यं फलेन न हि युज्यते ।

---

मामगृभ्णन् रशनामृतस्य' त्ययं मन्त्रः अनेन वाक्येन विनियुज्यते ।

अतः क्रियैव मुख्यं स्यात् साधनं फलजन्मने ॥
भावनावाचिनोऽपूर्वमाख्यातादवगम्यते ।
यागजन्यं स्वर्गसूक्ष्मरूपं तद्विदुरात्मनि ॥
धात्वर्थव्यतिरेकेण भावना नेति चेन्न तत् ।
सर्वधात्वर्थसम्बद्धः करोत्यर्थो हि भावना ॥
धात्वर्थः करणं तस्यां समानपदवर्णितः ।
द्रव्याद्युपकृतिर्दृष्टा धात्वर्थोत्पादनात्मिका ॥
सिद्धसाध्यस्वभावाभ्यां धात्वर्थो द्विविधस्तयोः ।
अन्योत्पादानुकूलात्मा भावना साध्यरूपिणी ॥
धात्वर्थव्यतिरेकेण यद्यप्येषा न लभ्यते ।
तथाऽपि सर्वसामान्यरूपेणैवाऽवगम्यते ॥
यागो यजिर्यजनमित्येवैया नृभिरुच्यते ।
धात्वर्थस्स तु विज्ञेयः सिद्धो लिङ्गादिसंयुतः ॥
लिङ्गाद्यपेतस्साध्यस्तु करोतीत्यभिधीयते ।
घञाद्यभिहितस्सिद्धस्साध्यस्त्वाख्यातकाशितः ॥
स्वर्गस्य भवितुर्जन्मानुकूलो विधिगोचरः ।
आख्यातप्रत्ययार्थः सा भावनार्था च सम्मता ॥
अंशत्रयवती साऽपि यस्यां भाव्यत्वमागता ।
लिङाद्यर्थः शब्दनिष्ठः शाब्दी सा भावनोच्यते ॥
यस्यां प्रतिष्ठितं सर्वं जगदेतच्चराचरम् ।
तां भावनां प्रवक्ष्यामि द्विविधां समनन्तरम् ॥
वेदो नारायणो नित्यः स्वप्रकाशो निरञ्जनः ।
सर्वान्तर्यामिणः शक्तिं परां शुद्धां विधिं विदुः ॥
विधिना यत्कृतं कर्म स्वल्पमप्यमृतायते ।
भूरि वाऽपि कृतं कर्म विधिहीनं श्रमावहम् ॥
स्मर्तव्यस्सततं विष्णुर्विस्मर्तव्यो न जातुचित् ।

सर्वे विधिनिषेधास्स्युरेतयोरेव किङ्कराः ॥
विधिनिष्ठं च पुरुषं धर्मात्मानं प्रचक्षते ।
विपरीतन्तु पाप्मानं तस्माद्धर्मो विधिर्मतः ॥
वेददृष्टेन विधिना श्रद्धया परया पुनः ।
स्वधर्ममाचरेद्यस्तु स नेच्छन्नपि मुच्यते ॥
विधिं निवृत्तिगर्भं च श्रेयसो हेतुमुत्तमम् ।
सम्प्राप्य शुद्धमनसस्सत्वनिष्ठाः परङ्गताः ॥
धर्मस्य ह्यापवर्ग्यस्य नाऽर्थोऽर्थायोपकल्पते ।
नाऽर्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः ॥
कामस्य नेन्द्रियप्रीतिर्लाभो जीवेन यावता ।
जीवस्य तत्वजिज्ञासा नाऽर्थो यश्चेह कर्मभिः ॥
वदन्ति तत्तत्वविदस्तत्वं यज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥
अविनाशी स्वरूपेण पुरुषो यस्तु नाशिता ।
मन्त्राणां साधिकाराणां भूतादीनामसंज्ञिता ॥
इत्याह नास्तिक्यनिराकरिष्णुरात्मास्तितां भाष्यकृदत्र युक्त्या ।
दृढत्वमेतद्विषयश्च बोधः प्रयाति वेदान्तनिषेवणेन ॥
मयाऽत्र लिखितं यत्तु विधिना प्रेरितेन च ।
तेन प्रीणातु भगवान् विधिर्नारायणो विभुः ॥

इति श्रीपरमहंसपरिव्राजकाचार्यश्रीरामकृष्णानन्दतीर्थपादकिङ्करशिष्य-
श्रीसत्यज्ञानानन्दतीर्थमुनिविरचिते वेदप्रकाशे विधिभेदनिरूपणं
नाम द्वितीयं प्रकरणं समाप्तम् ॥

# अथ भावनानिरूपणं नाम तृतीयं प्रकरणम् ॥

नमस्कृत्य शिवं देवं देवीं वाणीं गजाननम् ।
भावनां सम्प्रवक्ष्यामि भट्टाचार्यमते स्थितः ॥

'ज्योतिष्टोमेन स्वर्गकामो यजेते'ति श्रुतम्। तत्र यजेतेत्यत्राऽस्त्यंशद्वयम्—यजिधातुः प्रत्ययश्च। तत्र प्रत्ययेऽप्यस्त्यंशद्वयं—आख्यातत्वं लिङ्त्वञ्चेति। तत्राऽऽख्यातत्वं दशसु लकारेषु वर्तते । लिङ्त्वं तु केवलं लिङ्येव। तत्राऽऽख्यातलिङ्त्वाभ्यां भावनैवोच्यते । भावना नाम भवितुर्भवनानुकूलो भावकव्यापारविशेषः। सा च द्विविधा—शाब्दीभावना आर्थीभावना चेति ।

तत्र पुरुषप्रवृत्त्यनुकूलव्यापारविशेषः शाब्दी भवाना। सा च लिङ्त्वांशेनोच्यते । लिङ्श्रवणेन चाऽयं मां प्रवर्तयति मत्प्रवृत्त्यनुकूलव्यापारवानयमिति नियमेन प्रतीयमानत्वात् । यश्च यस्मात्प्रतीयते तत्तस्य वाच्यम । यथा गोशब्दस्य गोत्वम् । स च प्रवृत्त्यनुकूलव्यापारविशेषो लोके पुरुषनिष्ठोऽभिप्रायविशेषः । वेदे तु पुरुषाभावाल्लिङादिशब्दनिष्ठ एव। न हि वेदः पुरुषनिर्मितः—

(१)वेदस्याऽध्ययनं सर्वं गुर्वध्ययनपूर्वकम् ।
वेदाध्ययनसामान्यादधुनाऽध्ययनं यथा ॥

इत्यादिना वेदापौरुषेयत्वस्य साधितत्वात। 'यः कल्पस्स कल्पपूर्वः' इति न्यायेन संसारस्याऽनादित्वादीश्वरस्य च सर्वज्ञत्वादीश्वरो गतकल्पीयं वेदमस्मिन् कल्पे स्मृत्वोपदिशतीत्येतावतैवोपपत्तौ प्रमाणान्तरेणाऽर्थमुपलभ्य रचितत्वकल्पनानुपपत्तेश्च । ततश्च पुरुषाभावाच्छब्दनिष्ठैव सा । अत एव शाब्दीभावनेति व्यवहरन्ति । सा च शाब्दीभावनाऽशत्रयमपेक्षते—साध्यं साधनं इतिकर्तव्यताश्चेति ।

---

१ श्लो. वा. १. १. श्लो. ३६६. ।

तत्र साध्याकाङ्क्षायां वक्ष्यमाणांशत्रयोपेता आर्थीभावना साध्यत्वेन सम्बध्यते । एकप्रत्ययगम्यत्वेन समानाभिधानश्रुतेः । यद्यपि संख्यादीनामपि एकप्रत्ययगम्यत्वमविशिष्टम् , तथाऽप्ययोग्यत्वान्न तेषां भाव्यत्वेनाऽन्वयः ।

करणाकांक्षायां लिङादिज्ञानं करणत्वेन सम्बध्यते । तस्य च करणत्वं न भावनोत्पादकत्वेन, सन्निकर्षस्येव रूपादिज्ञाने, सन्निकर्षात्प्राकु रूपज्ञानस्येव लिङादिज्ञानात्प्राक् शब्दधर्मभावनाया अभावप्रसङ्गात् । किन्तु भावनाभाव्यनिर्वर्तकत्वेन । लिङादिज्ञानं हि शब्दभावनाभाव्यार्थीभावनां निर्वर्तयति, कुठार इव छेदनम् । अतो लिङादिज्ञानस्य करणत्वेनाऽन्वयः ।

इतिकर्तव्यताकाङ्क्षायां प्राशस्त्यज्ञानं इतिकर्तव्यतात्वेन सम्बध्यते । तच्च प्राशस्त्यज्ञानं 'वायुर्वै क्षेपिष्ठे' त्याद्यर्थवादजन्यते । ते ह्यर्थवादाः स्वार्थप्रतिपादने प्रयोजनमलभमाना लक्षणया क्रतोः प्राशस्त्यं प्रतिपादयन्ति, स्वार्थमात्रपरत्वे आनर्थक्यप्रसङ्गात् । न चेष्टापत्तिः, अध्ययनविध्युपात्तत्वेनाऽनर्थक्यानुपपत्तेः । तथा हि–'स्वाध्यायोऽध्येतव्यः' इत्यध्ययनविधिः सकलस्य वेदस्याऽध्ययनकर्तव्यतां बोधयन्सर्वो वेदः प्रयोजनवदर्थपर्यवसायीति सूचयति, निरर्थकस्याऽध्ययनानुपपत्तेः । तत्सिद्धं वक्ष्यमाणार्थभावनाभाव्यका लिङादिज्ञानकरणिका प्राशस्त्यज्ञानेतिकर्तव्यताका शाब्दीभावना लिङत्वांशेनोच्यत इति ।

ननु केयं शाब्दीभावना ? उच्यते–पुरुषप्रवृत्त्यनुकूलव्यापारविशेषश्शाब्दी भावना स एव विध्यर्थः । लिङादिश्रवणेऽयं मां प्रवर्तयतीति तस्य नियमेन प्रतीतेः । यत्तु इष्टसाधनत्वं विध्यर्थ इति, तन्न, तथा सति इष्टसाधनमिति शब्दस्य विधिशब्दः पर्यायस्स्यात् । न च पर्यायत्वं युज्यते, सन्ध्योपासनं इष्टसाधनं तस्मात्त्वं कुर्विति सह प्रयोगात् । पर्यायाणां सह प्रयोगाभावात् । अतश्च व्यापारविशेष एव विध्यर्थः । स च लोके पुरुषनिष्ठोऽभिप्रायविशेषः । वेदे तु पुरुषाभावाच्छब्दनिष्ठ एव प्रेरणापरपर्याय इत्युक्तम् ।

ननु लोके शब्दनिष्ठे प्रेरणापरपर्याये व्यापारे शब्दप्रयोगाभावेन शक्तिग्रहाभावात्कथं तस्य विधिशब्दात्प्रतीतिरिति चेत्—सत्यमेतत् ; बालस्तावत्स्तनादौ स्वकृतरोदनादिजनितमातृप्रवृत्तेः स्वाभिप्रायरूपप्रवर्तनाज्ञानलभ्यत्वावधारणात् सविधिकप्रयोजकवाक्यश्रवणसमनन्तरभाविनीं प्रयोज्यप्रवृत्तिमुपलभ्य तत्कारणत्वेन तस्य प्रवर्तनाज्ञानमनुमिमीते ।

यद्यपि भोजनादौ स्वप्रवृत्तेस्समीहितसाधनताज्ञानपूर्वकत्वावधारणात्प्रयोज्यप्रवृत्तिरपि तत्पूर्वकत्वाध्यवसानं युक्तम्, तथाऽप्यन्यप्रेरितप्रवृत्तौ प्रवर्तनाज्ञानजन्यत्वस्योक्तमातृप्रवृत्तौ दर्शनेन प्रयोज्यवृद्धप्रवृत्तेरप्यन्यप्रेरितप्रवृत्तित्वात्तत्कारणत्वेन प्रवर्तनाज्ञानस्यैवाऽध्यवसानम् । तच्च प्रवर्तनाज्ञानमन्वयव्यतिरेकाभ्यां प्रयोजकवाक्यजन्यमित्यवधारयति । तत्र चाऽऽवापोद्वापाभ्यां प्रवर्तनायां विधिशक्तिमवधारयति । प्रवृत्त्यनुकूलो व्यापारः प्रवर्तना । स च व्यापारः प्रैषादिरूपो विविध इति प्रत्येकं व्यभिचारित्वाद्विधिशब्दवाच्यत्वानुपपत्तेः प्रवर्तनासामान्यमेव विधिशब्दवाच्यमिति कल्पयति । एवञ्च विधिश्रवणे प्रैषादिरूपस्य वक्त्रभिप्रायस्य प्रवर्तनात्वेनैव रूपेण प्रतीतिर्न विशेषरूपेण, तथैव शक्तिग्रहात् । विशेषरूपेण प्रतीतिस्तु लक्षणयैव । एवञ्च वैदिकलिङादिश्रवणेऽपि प्रवर्तनासामान्यमेव प्रतीयते । तत्र कोऽसौ व्यापार इत्यपेक्षायां प्रैषादिरूपस्य वक्त्रभिप्रायस्याऽपौरुषेये वेदेऽनुपपत्तेः शब्दनिष्ठ एव प्रेरणापरपर्यायः कश्चिद्व्यापार इति कल्प्यते । स चाऽग्रे व्यापारप्रश्ननिर्णयावसरे स्फुटीभविष्यति । अतश्च शब्दनिष्ठः प्रेरणापरपर्यायो व्यापारः शाब्दी भावना, सैव च प्रवर्तनात्वेन रूपेण विध्यर्थ इति । अयमेव चाऽर्थः—

'अभिधा भावनामाहुरन्यामेव लिङादयः'

इति वार्तिकस्य । अभिधीयतेऽनेनेति व्युत्पत्त्या अभिधाशब्देन शब्द उच्यते । तद्व्यापारात्मिका भावना लिङादिवाच्येति (१)केचिदाचार्याः।

१. न्यायसुधाकारप्रभृतय इत्यर्थः ।

## ( पार्थसारथिमिश्रमतम् )

अन्ये त्वाहुः—सत्यं प्रवर्तनासामान्यं विध्यर्थः, तथैव शक्तिग्रहात्। प्रवृत्त्यनुकूलव्यापारः प्रवर्तना। अपौरुषेये च वेदे प्रैषादेरभावात्कश्चित्पुरुषप्रवृत्त्यनुकूलो व्यापारविशेषः कल्पनीयः। विधिशब्दाभिधेयप्रवर्तनासामान्यस्य विशेषमन्तरेणाऽपर्यवसानात्। तत्र कोऽसो व्यापार इत्यपेक्षायां धात्वर्थगतं समीहितसाधनत्वमेवेति कल्प्यते, तस्याऽपि प्रवृत्त्यनुकूलत्वात्। सर्वो हि समीहितसाधनतां ज्ञात्वा प्रवर्तते। अन्यप्रेरितोऽपि यदीष्टसाधनतां न जानाति, तदा न प्रवर्तते।

स्वतन्त्रप्रेरणावादेऽपि तदाक्षिप्तसमीहितसाधनताज्ञानं स्वीक्रियत एव, अन्यथा विधेः प्रवर्तकत्वानुपपत्तेः। अतश्चाऽवश्यकत्वात्समीहितसाधनतैव प्रवर्तनात्वेन रूपेण विध्यर्थः। एवञ्च विधिशब्दस्याऽन्यनिष्ठव्यापारबोधकत्वं लोकसिद्धं भवति।

किञ्च शब्दे एको व्यापारः स्पन्दातिरिक्तः कल्पनीयः। तस्य च स्वप्रवृत्तौ पराधीनप्रवृत्तौ वा कारणत्वेनाऽक्लृप्तस्य प्रवर्तनात्वेन रूपेण ज्ञातस्य प्रवृत्त्यनुकूलत्वम्, शब्दस्य च परनिष्ठव्यारज्ञापकत्वेन क्लृप्तस्य स्वनिष्ठव्यापारबोधकत्वम, विधेश्च प्रवर्तकत्वनिर्वाहार्थं धात्वर्थस्य समीहितसाधनत्वमिति कल्पनाद्वरमावश्यकस्यैव समीहितसाधनत्वस्य प्रवृत्तिहेतुत्वेन क्लृप्तस्य प्रवर्तनात्वेन रूपेण विध्यर्थत्वकल्पनम्, लाघवात् अन्यनिष्ठत्वाच्च।

न च विधेः प्रवर्तकत्वनिर्वाहार्थं समीहितसाधनत्वकल्पनात् प्रेरणानभिधाने च विधेः प्रवर्तकत्वाभावाद्धात्वर्थस्य समीहितसाधनत्वमेव नाऽस्तीति वाच्यम्। प्रवर्तनाभिधानेनैव तन्मते विधेः प्रवर्तकत्वात् विध्यभिहितस्य च प्रवर्तनासामान्यस्य विशेषमन्तरेणाऽपर्यवसानात्समीहितसाधनत्वाक्षेपकत्वात।

न चेष्टसाधनत्वस्य विध्यर्थत्वे सन्ध्योपासनं ते इष्टसाधनं तस्वं कु-

र्विति सहप्रयोगानुपपत्तिरिति वाच्यम् । इष्टसाधनत्वस्य विशेषरूपेण विधिनाऽनभिधानात् । सामान्यशब्दस्य च विशेषशब्देन दृष्टस्सहप्रयोगः—पाञ्चालराजेत्यादौ । तस्मात्समीहितसाधनतैव प्रवर्तनात्वेन रूपेण विध्यर्थः । सैव च तेन रूपेण शब्देनैवाऽभिधीयत इति शाब्दी भावना ।

उक्तवार्तिकस्याऽप्ययमेवाऽभिप्रायः–अभिधीयते सा अभिधा, समीहितसाधनता । सैव च प्रवर्तनात्वेनाऽभिहिता पुरुषप्रवृत्तिं भावयतीति भावना, तां लिङादय आहुरिति । यथाऽऽहुः—

(१)'पुंसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्तकः ।
प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनाम्' ॥ इति ।

अयमेव च पक्षो बह्वाचार्यसम्मतः । स चाऽग्रे स्फुटीभविष्यति । तत्सिद्धं यजेतेत्यत्र लिङ्त्वांशेन शाब्दी भावनोच्यते इति ।

ननु कोऽयं लिङ्व्यापारः शाब्दीभावनापरपर्यायः, यत्राऽऽख्यातप्रोक्ता पुरुषप्रवृत्तिरूपाऽर्थीभावना भाव्यत्वेनाऽन्वेतीति ।

उच्यते—विधिशब्दस्य यजेतेत्यत्र य आख्यातांश आख्यातत्वरूपो दशलकारसाधारणोपाधिः सखण्डो वाऽखण्डो वा, स चाऽर्थीभावनावाचकः, सा तु वाच्या । अत एवाऽभिधेत्युच्यते । वाचकत्वं नाम तज्ज्ञानहेतुत्वम् । सा तु ज्ञातैवाऽनुष्ठातुं शक्यत इति तद्धीहेतोरपि शब्दस्य तद्धेतुत्वं परम्परया भवत्येव । तथा च पुरुषप्रवृत्तिरूपार्थीभावनाज्ञानहेतुविधिशब्दव्यापारो विधिशब्दज्ञानमेव पुरुषप्रवृत्तिवाचकशक्तिमत्त्वेन शब्दस्य प्रमाणरूपत्वाज्ज्ञानद्वारेणैव प्रवृत्तिजनकत्वं युक्तम् , ज्ञानजनकव्यापारातिरिक्तव्यापारकल्पने मानाभावात्क्लृप्तत्वाच्च । स च त्रिविधः, तज्ज्ञानं तच्छक्तिज्ञानं शक्तिविशिष्टतज्ज्ञानं चेति । तत्राऽऽद्ययोरन्यतरस्य शब्दभावनात्वम् , तृतीयस्य तु तत्र करणत्वमिति विवेकः ।

१. इष्टाभ्युपायत्वादिति ल्यब्लोपे पञ्चमी । इष्टसाधनत्वं विहायेत्यर्थः । क्रियासु यागादिषु प्रवर्तकोऽन्यो नैवाऽस्ति । इष्टसाधनतैव प्रवर्तिकेत्यर्थः । अस्तु इष्टसाधनत्वं लिङ्प्रतिपाद्यम् , प्रवर्तनात्वं तस्य कथमित्यपेक्षायामाह–प्रवृत्तिहेतुमिति । यः प्रवृत्तिकारणभूतो धर्मः तमेव प्रवर्तनां प्रवदन्ति प्रवर्तनाविद इति कारिकार्थः । विधिवि. पृ. २४२.

एवं स्थिते निष्कर्षः—विधिना स्वज्ञानं जन्यते प्रवर्तनात्वेनाऽभिधीयत इति विधिज्ञानमेव शब्दभावना । अभिधा च तस्य विधिशब्दस्य रूपं चोदकप्रवर्तकप्रेरकोत्पादकभावकशब्दापरपर्यायं विषयो भवतीति शब्दनिष्ठव्यापारः शाब्दी भावना चोदना प्रवर्तना प्रेरणोत्पादना चेत्युच्यते । तत्साध्यो यो विषयः स एवाऽऽख्यातार्थो यजिधात्वर्थविषयः स्वर्गेच्छाजनितः पुरुषप्रयत्नः शाब्दीभावनाभाव्यः । स एव च पुरुषार्थविषयत्वादार्थीभावनेत्युच्यते । तस्या भाव्यं स्वर्गादिरूपं फलम् । करणं तु सेतिकर्तव्यताकं साधनं धात्वर्थः ।

ननु पुंप्रयत्नसाध्यो यागः कथं तत्र करणं भवेत् ? उच्यते—यद्यपि केवलं तस्मिन् करणं नैव भवेत्, तथाऽपि तद्भाव्यनिर्वर्तकत्वेन फलावच्छिन्ने तं प्रति भवेत् । तथा च भवितुः उत्पत्तिमतः भविष्यमाणस्येति यावत् । तस्य भवनं जन्म अभिव्यक्तिरिति यावत् । तदनुकूलः तदुत्पादने समर्थः, भावयतीति भावकः पुरुषः तन्निष्ठो व्यापारविशेषो भावनेत्युच्यते । सैव च वक्ष्यमाणांशत्रयवती यथोक्तायां शाब्दीभावनायां साध्यत्वेनाऽन्वेति । करणतया च पुम्प्रयत्नवाचकशक्तिमद्विधिज्ञानमेव शाब्दीभावनासाध्यस्याऽपि तस्य यागवदार्थीभावनारूपफलावच्छिन्नां तां प्रति फलकरणत्वादेव करणत्वमुपपद्यते । तथा च पुरुषः स्वप्रवृत्तिं भावयेत्, केनेत्यपेक्षायां पुरुषप्रवृत्तिवाचकशक्तिमत्तया ज्ञातेन विधिशब्देनेति करणांशपूरणम् ।

कथमित्याकाङ्क्षायां अर्थवादैः स्तुत्वेतीतिकर्तव्यतांशपूरणम् । इयं गौः क्रय्येति लौकिके विधौ बहुक्षीरा जीवत्स्वपत्या समांसमीना इत्यादिलौकिकार्थवादवत् । समांसमीना सा यैव प्रतिवर्षं प्रसूयते ।

नन्वाख्यातत्वेन विधिशब्दादुपस्थिता पुरुषप्रवृत्तिर्भाव्यतयाऽन्वेति, करणन्तु कथमनुपस्थितमन्वेति ?

उच्यते—विधिशब्दस्तावच्छ्रवणेनोपस्थापितः, तस्य पुरुषप्रवृत्तिवाचकशक्तिरपि स्मरणेनोपस्थापिता, तदुभयवैशिष्ट्यं तन्निष्ठा ज्ञातता च ।

मनसा ज्ञातो मया शक्तिविशिष्टो विधिशब्द इति वाचकशक्तिमत्तया ज्ञातो विधिशब्द उपस्थित एव । न च शब्दातिरिक्तेन प्रमाणेनोपस्थितं कथं शाब्दबोधे भासत इति वाच्यम् । 'स्वाध्यायोऽध्येतव्यः' इत्यधीतेन स्वाध्यायेन यच्छक्नुयात्तद्भावयेत् इति प्रतिशब्दं स्वाध्यायविधितात्पर्यात् शब्दातिरिक्तेनोपस्थितमपि शाब्दबोधे भासत एव । यथा ज्योतिष्टोमादि नामधेयम्, यथा वा लिङ्गविनियोज्यो मन्त्रो 'बर्हिर्देवसदनं दामी'त्यादिः । तदुक्तमाचार्यैरब्धिदधिकरणे—(१)'अगृहीतविशेषणा विशिष्टबुद्धिर्न भवति, न त्वनभिहितविशेषणे'ति । एवमर्थवादानामुपस्थितिः श्रोत्रेण । प्राशस्त्यस्य तु तैरेव लक्षणया, तदुभयनिष्ठज्ञाततायास्तु मनसेत्यर्थवादैः प्रशस्तत्वेन ज्ञात्वेतीतिकर्तव्यतांशान्वयोऽप्युपपन्न एव ।

## ( प्राशस्त्यस्वरूपम् )

ननु किं प्राशस्त्यम् ? न तावत्फलसाधनत्वम् । तस्य यागेन भावयेत्स्वर्गमित्यर्थभावनान्वयवशेन विधिवाक्यादेव लब्धत्वात् । नाऽन्यत, प्रवृत्तावनुपयोगात् ।

उच्यते—बलवदनिष्टाननुबन्धित्वं प्राशस्त्यम् । तच्च नेष्टहेतुत्वज्ञानाल्लभ्यते । इष्टहेतावपि कलञ्जभक्षणादावनिष्टहेतुत्वस्याऽपि दर्शनात, विहितश्येनफलस्य च शत्रुवधस्याऽनिष्टानुबन्धित्वं दृष्टम् । अतो यावत्साधनस्य फलस्य चाऽनिष्टाहेतुत्वं नोच्यते, तावदिष्टहेतुत्वेन ज्ञातेऽपि तत्र पुरुषो न प्रवर्तते । अत एवोक्तम्—

(२)फलतोऽपि च यत्कर्म नाऽनर्थेनाऽनुबध्यते ।
केवलप्रीतिहेतुत्वात्तद्धर्मत्वेन दृश्यते' ॥ इति ।

अतस्स्वतः फलतो वाऽनर्थाननुबन्धित्वरूपप्राशस्त्यबोधनेनाऽर्थवादाः विधिशक्तिमुत्तम्भयन्ति । क उत्तम्भः ? स्वतः फलतो वाऽनर्थाननुबन्धित्वशङ्कायाः प्रवृत्तिप्रतिबन्धिकायाः विगमः । इदमेव च विधेः प्रवृ-

१ तं. वा. १. ४. १. पृ. २८७. पं. ५.
२. श्लो. वा. १. १. २. श्लो. २६८. पृ. १२६.

त्तिजनने साहाय्यमर्थवादैः क्रियत इति विधिरर्थवादसाकाङ्क्षः। एवमर्थवादा अप्यभिधया गौण्या वा वृत्त्या भूतमर्थं वदन्तोऽपि स्वाध्यायविध्यापादितप्रयोजनवत्त्वलाभाय विधिसाकाङ्क्षाः। सोऽयं नष्टाश्वदग्धरथवत्सम्प्रयोगः। यथा–एकस्य दग्धस्य रथस्य जीवद्भिरश्वैः अन्यस्य विद्यमानस्य रथस्याऽविद्यमानाश्वस्य सम्प्रयोगः परस्परस्याऽर्थवत्त्वाय, तथाऽर्थवादानां प्रयोजनांशो विधिना पूर्यते, विधेश्च शब्दभावनाया इतिकर्तव्यतांशोऽर्थवादैरिति। तदिदमुभयोः श्रवणे पूर्णमेव वाक्यम्, एकस्य श्रवणे त्वन्यस्य कल्पनया पूरणीयम्। यथा(१) 'वसन्ताय कपिञ्जलानालभते' इति विधावर्थवादांशोऽश्रुतोऽपि कल्प्यते। 'प्रतितिष्ठन्ति ह वै य एता रात्रीरुपयन्ती' त्याद्यर्थवादे विध्यंशः। तथा च सूत्रम्—(२)'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते' इति। वेदस्य विशिष्टभावनाबोधकत्वाच्चोदनासूत्रे उपक्रमात्, (३)'तस्य ज्ञानमुपदेश' इति मध्ये परामर्शात्, (४)'तद्भूतानां क्रियार्थेन समाम्नाय' इत्यत्रोपसंहाराच्च, भावनातदंशत्रयातिरिक्तार्थानां आनर्थक्यं धर्माधर्मार्थशून्यत्वम्। तस्मादनित्यं अप्रामाण्यमुच्यत इति पूर्वपक्षसूत्रार्थः।

अथ सिद्धान्तसूत्रम्—(५)'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युरि'ति। विधिना स्तुतिसाकाङ्क्षेण, प्रयोजनाकाङ्क्षाणामर्थवादानामेकवाक्यत्वात्, विधीनां विधेयानाम्, स्तुत्यर्थेन स्तुतिप्रयोजनेन स्तुतिरूपेण लाक्षणिकेनाऽर्थेन वाऽऽनर्थक्याभावादर्थवादा धर्मे प्रमाणानि स्युरिति तस्याऽर्थः।

अथ वा विधिनिषेधाभ्यां इष्टानिष्टसाधनत्वबोधेऽपि उत्साहद्वेषजनकतया स्तुतिनिन्दयोर्लोकेऽपेक्षादर्शनेन विधिनिषेधानां अर्थवादाकाङ्क्षायाः स्वार्थवत्त्वायाऽर्थवादानां विधिनिषेधाकाङ्क्षायाश्चैकवाक्यतामूलभूतायास्स-

---

१. मा. सं. २४. २०.
२. जै. सू. १. २. १.
३. औत्पत्तिकसूत्रैकदेशोऽयम्।
४. जै. सू. १. १. २५.
५. जै. सू. १. २ ७.

त्वात् विधिना निषेधेन च सह स्तुत्यर्थवादानां निन्दार्थवादानाञ्चैकवाक्यत्वात् विधीनां निषेधानाञ्च स्तुत्यर्थेन निन्दार्थेन च तेऽर्थवादा धर्माधर्मयोः प्रमाणानि स्युरिति ।

ननु य एव लौकिकाश्शब्दास्त एव वैदिकास्त एव चाऽमीषामर्था इति (१)न्यायाद्विधिशब्दस्य लोके यत्र शक्तिर्गृहीता वेदेऽपि तदर्थकेनैव तेन भवितव्यम् । लोके च प्रेषणादिपुरुषधर्मवाचित्वं क्लृप्तमिति वेदे शब्दभावनावाचित्वं कथमुपपद्यते ।

उच्यते—लोकवेदयोरैकरूप्यमेव । तथा हि—लोके प्रेषणादिकं न तेन तेन रूपेण विधिपदवाच्यम्, अननुगमेन नानार्थत्वप्रसङ्गात्, तद्वदेव भावनावाचित्वोपपत्तेश्च । किन्तु प्रेषणाध्येषणानुज्ञास्वस्ति प्रवर्तनात्वमेकम् । तच्च शब्दव्यापारेऽपि तुल्यमिति तदेव लिङादिपदवाच्यम् । तच्च लौकिकशब्दे नाऽस्त्येव । तत्र राजादीनामेव प्रवर्तकत्वात् । प्रवर्तकव्यापार एव हि प्रवर्तना । प्रवर्तकत्वं च राजादेरिव वेदस्याऽप्यनुभवसिद्धम् ।

ननु वेदेऽपि प्रवर्तनावानीश्वरः कल्प्यताम्, लोके राजादिवत् । तदुक्तम्—'विधिरेव तावद्गर्भ इव श्रुतिकुमार्याः पुंयोगे मानमि' ति । न; वेदस्याऽपौरुषेयत्वात् । न हि वेदस्य कर्ता पुरुषो लोके वेदे वा प्रसिद्धः। तत्कल्पने च तज्ज्ञानप्रामाण्यापेक्षया वेदप्रामाण्ये(२)'औत्पत्तिकस्तु शब्दस्याऽर्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चाऽर्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्याऽनपेक्षत्वादि' त्यत्र निरपेक्षत्वेन स्थितं स्वतःप्रामाण्यं भग्नं स्यात्, बुद्धवाक्येऽपि प्रामाण्यप्रसङ्गाच्च । सम्बन्धः प्रत्याय्यप्रत्यायकभावः औत्पत्तिको नित्यः । तस्य सम्बन्धस्य ज्ञानं ग्राहक उपदेशः प्रसिद्धपदसमभिव्याहारः प्रत्यक्षाद्यगृहीतेऽर्थे अव्यतिरेकः विधिवाक्यजन्यं ज्ञानं न व्यभिचरति अनपेक्षत्वात् वेदवाक्यप्रामाण्यग्रहे परापेक्षाराहित्यात् । शेषं सुगमम् । ईश्वरवचनत्वे समानेऽपि बुद्धवाक्यं न प्रमाणम्,

---

१. अयं च न्यायः लोकवेदाधिकरणसिद्धः ( पू. मी. १. ३. ९ )।

२. जै. सू. १. १. ५.

वेदवाक्यन्तु प्रमाणमिति सुभगाभिक्षुकन्यायप्रसङ्गः । महाजनाना-मुभयसिद्धत्वाभावेन तत्परिग्रहापरिग्रहाभ्यामपि विशेषानुपपत्तेः । लोकेऽपि राजादीनां प्रेरकत्वं न स्यात् । ईश्वरप्रेरणायां स्थितायामेव राजादि-रप्यसाधारणतया प्रेरक इति चेत्; हन्त ? सा तिष्ठतु न वा, किन्त्विहाऽप्यसाधारणः प्रेरको वेद एव राजादिस्थानीय इत्यागतं मार्गे, ईश्वरप्रेरणायास्साधारणाया असाधारणप्रेरणासहकारेणैव प्रवर्तकत्वात् ।

किञ्च ईश्वरप्रेरणायां सर्वोऽपि विहितं कुर्यादेव, न तु कश्चिदपि लङ्घयेत् । निषिद्धेऽपि चेश्वरप्रेरणाऽस्त्येव, अन्यथा न कोऽपि तत्र प्रवर्तेतेति तदपि विहितं स्यात् । तथा चोक्तम्—

(१)'अज्ञो जन्तुरनीशोऽयमात्मनस्सुखदुःखयोः ।
ईश्वरप्रेरितो गच्छेत्स्वर्गं वा श्वभ्रमेव वा' ॥ इति ॥

तस्माद्राजादिरिव वेदोऽपि स्वप्रवर्तनां ज्ञापयन्निच्छोपहारमुखेन प्रवर्तयतीति सिद्धं लोकवेदयोरैकरूप्यम् । पूर्वमीमांसकानां स्वतन्त्रो वेदः, ब्रह्ममीमांसकानां तु ब्रह्मविवर्तस्तत्परतन्त्रो वेद इति यद्यपि विशेषः, तथाऽपि श्वासिततुल्यत्वेन वेदस्याऽपौरुषेयत्वमुभयेषामपि समानम् ।

अत्र च प्रवृत्त्यनुकूलव्यापारत्वं प्रवर्तनात्वं सखण्डोऽखण्डो वा उपाधिः । तस्मिन्विधिपदशक्येऽपि तदाश्रयविशेषोपस्थितिर्गवादितुल्यैव । अनुकूलव्यापारत्वं वा शक्यम् । प्रवृत्त्यंशस्त्वाख्यातार्थत्वेन शक्त्यन्तरलभ्य एव । दण्डीत्यत्र सम्बन्धिनि मतुबर्थे प्रकृत्यर्थदण्डांशवत् । फलसाधनताबोध एव प्रेरणा । तामेव कुर्वन् प्रेरको विधिः । अतः फलसाधनतैव प्रेरणात्वेन विधिपदशक्येति मण्डनाचार्याः । फलसाधनता चाऽर्थभावनान्वयलभ्येत्युक्तं प्राक् । इममेव च पक्षं पार्थसारथिप्रभृतयः पण्डिताः प्रतिपन्नाः । औपनिषदानामपि केषाञ्चिदिष्टसाधनतावादोऽनेनैव मतेनोपपादनीयः ।

---

१, म. भा. व. ३०. २८,

इष्टसाधनत्वं स्वरूपेणैव लिङादिपदशक्यम्, न प्रेरणात्वेनेति तार्किकाः। तन्न; गौरवादन्यलभ्यत्वादन्वयायोग्यत्वाच्च । इच्छाविषयसाधनत्वापेक्षया प्रवर्तनात्वमतिलघु, इच्छातद्विषययोरप्रवेशात् इच्छाज्ञानस्याऽपि प्रवृत्तिज्ञानवत्प्रवृत्तिहेतुत्वापातात्। वस्तुगत्या य इच्छाविषयस्तत्साधनमिति शब्देन प्रतिपादयितुमशक्यत्वात् । साधनत्वमात्रस्यैव शक्यत्वे च तेनैव प्रत्येयनोपस्थापितया प्रकृत्या सह श्रुत्या तदन्वयसम्भवे पदान्तरोपस्थापितस्वर्गेण सह वाक्येन तदन्वयासम्भवात्प्रवर्तनात्व एव पर्यवसानम्, श्रुत्या वाक्यस्य बाधात्। (१)प्रत्ययश्रुतेः पदश्रुतितोऽपि बलीयस्त्वेन 'पशुना यजेत' इत्यत्र प्रकृत्यर्थं पशुं विहाय प्रत्ययार्थेन करणेन सहैवैकत्वस्याऽन्वयादेकं करणं पशुरिति वचनव्यक्त्या करत्वङ्गत्वमेकत्वस्य (२)स्थितम्, किमु वक्तव्यं पदान्तरसमभिव्याहाररूपाद्वाक्याद्बलीयस्त्वमिति ।

वाक्यार्थान्वयलभ्यत्वाच्च नेष्टसाधनत्वं पदार्थः, किन्तु प्रवर्तनात्वमेव । तथा चाऽऽह भगवान् पाणिनिः-(३)'विधिनिमन्त्रणामन्त्रणाधीष्टसम्प्रश्नप्रार्थनेषु लिङ्' इति । अस्याऽर्थः—विध्यर्थेषु द्योत्येषु वाच्येषु वा लिङ् स्यादिति । विधिः—प्रेरणं निकृष्टस्य प्रवर्तनं यजेतेति । निमन्त्रणम्—नियोगकरणमावश्यके श्राद्धभोजनादौ दौहित्रादेः प्रवर्तनं भुञ्जीतेति । आमन्त्रणम्—कामचारानुज्ञा इहाऽऽसीतेति । अधीष्टः—सत्कारपूर्वको व्यापारः पुत्रमध्यापयेद्भवानिति । सम्प्रश्नः—सम्प्रधारणं किं भो वेदमधीयीय उत तर्कमिति । प्रार्थनम्--याच्ञा भोजनं लभेयेति । अत्र प्रवर्तनैव लिङ्शब्दवाच्या, अन्येषां पृथगुपादानं प्रपञ्चनार्थमिति बोध्यम् ।

---

१. प्रत्ययश्रुतेः समानाभिधानश्रुतेरित्यर्थः । अस्या एकपदश्रुत्यपेक्षया बलीयस्त्वेऽयं हेतुः—'पशुना यजेत' इत्यत्र तृतीयाविभक्त्युपस्थितायाः संख्यायाः पश्वङ्गत्वे एकपदश्रुतिर्मानम् । कारकाङ्गत्वे च समानाभिधानश्रुतिः । कारकं च सन्निहितम्, प्रकृत्यर्थः पशुस्तु विप्रकृष्टः । विप्रकृष्टान्वयापेक्षया सन्निकृष्टान्वयोऽभ्यर्हितः । अतोऽस्या बलीयस्त्वे सन्निकृष्टत्वमेव हेतुरिति ।　　२ पश्वेकत्वाधिकरण इत्यर्थः ।

३. पा. सू. ३. ३. १६१.

ननु 'स्वर्गकामो यजेत' इत्यत्र धात्वर्थ एव यागो भावनायां भाव्यत्वे-नाऽन्वेतु, न पुनः स्वर्गः, एकपदोपस्थापितत्वात्तस्य। स्वर्गस्तु भिन्नपदोपात्तः कर्तृविशेषणीभूतश्च। तथा चैकपदोपस्थापितेन यागेन सह पदश्रुत्या तदन्व-यसम्भवे कथं भावनाभाव्यत्वं स्वर्गस्येष्टमिति चेत्-न; अपुरुषार्थककर्मिकायां तस्यां प्रवर्तनानुपपत्तेः। तस्माद्धात्वर्थमात्रं भाव्यमित्यनुपपन्नमित्यत्रो-च्यते। तथा हि--प्रवर्तनाकर्मभूता पुरुषप्रवृत्तिरूपाऽर्थभावना किं केन कथमित्यंशत्रयवती विधिना लिङ्त्वेन प्रतिपाद्यत इत्युक्तं प्राक्। अपुरुषार्थ-कर्मिकायां च तस्यां प्रवर्तनानुपपत्तेरेकपदोपस्थापितमप्यपुरुषार्थं धात्वर्थं विहाय भिन्नपदोपात्तमन्यविशेषणमपि कामिपदसम्बन्धेन साध्यतान्वय-योग्यं स्वर्गमेव पुरुषार्थं सा भाव्यतयाऽऽलम्बते, इच्छाविषयस्यैव कृति-विषयत्वनियमात्। स्वर्गं कामयते स्वर्गकाम इति कर्मण्यपि द्वितीयाया अन्तर्भूतत्वात् यजतेरकर्मकत्वेन स्वर्गमित्युक्तेऽनन्वयाच्च। अत एव यत्र कामिपदं न श्रूयते तत्राऽपि तत्कल्प्यते। यथा—'प्रतितिष्ठन्ति ह वा य एता रात्रीरुपयन्ती' त्यादौ प्रतिष्ठाकामा रात्रिसत्रमुपेयुरित्यादि।

एवञ्च लब्धभाव्यायां तस्यां समानपदोपस्थापितो धात्वर्थ एव कर-णतयाऽन्वेति भाव्यांशस्य कामिविषयेणाऽवरुद्धत्वात् सुब्विभक्तियोगः। धात्वर्थनामधेये-ज्योतिष्टोमादौ तृतीयाश्रवणात्। यत्राऽपि नामधेये द्वि-तीया श्रूयते, तत्राऽपि व्यत्ययानुशासनेन तृतीयानुकल्पनात्। तदुक्तं महाभाष्यकारैः-'अग्निहोत्रं जुहोतीति तृतीयार्थे द्वितीये'ति। अत एव तैः 'प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोः प्रत्ययार्थः प्राधान्येन प्रकृ-त्यर्थो गुणत्वेने'ति प्रत्ययार्थं भावनां प्रति धात्वर्थस्य गुणत्वेन करणत्वमु-क्तम्। (१)आख्यातं क्रियाप्रधानमिति वदद्भिर्निरुक्तकारैरप्येतदेवोक्तम्। (२)भावार्थाधिकरणे च तथैव स्थितम्। तेन सर्वत्र प्रत्ययार्थं प्रति धा-त्वर्थस्य करणत्वेनैवाऽन्वयनियमः। अत एव गुणविशिष्टधात्वर्थविधौ

---

१. 'भावप्रधानमाख्यातमि'ति ( निरु. १. १. ९. ) यास्कवचनस्याऽर्थतोऽनु-वादोऽयम्। २. पू. मी. २. १. १.

धात्वर्थानुवादेन केवलगुणविधौ च मत्वर्थलक्षणा, विधेर्विप्रकृष्टविषयत्वञ्च । यथा—'सोमेन यजेते'ति विशिष्टविधौ सोमवता यागेनेति, 'दध्ना जुहोती'ति गुणविधौ दधिमता होमेनेति । नामधेयान्वये तु सामानाधिकरण्योपपत्तेर्धात्वर्थमात्रविधानाच्च न मत्वर्थलक्षणा, न वा विधिविप्रकर्षः । तदेवं 'ज्योतिष्टोमेन यजेत स्वर्गकाम' इत्यत्राऽऽख्यातार्थो भावयेदिति । किमित्याकाङ्क्षायां कर्मविषयं स्वर्गमिति, विधिश्रुतेर्बलीयस्त्वादाकाङ्क्षाया उत्कटत्वाच्च । तथा च स्थितं षष्ठाद्ये ।

ततः केनेत्यपेक्षिते यागेनेति तृतीयान्तपदसमानाधिकरणत्वात्, करणत्वेनैवाऽन्वयनियमाच्च । किं नाम्नेत्यपेक्षिते ज्योतिष्टोमेनेति, तन्नाम्नेत्यर्थः । शब्दादनुपस्थितोऽपि ज्योतिष्टोमशब्दो भासत एव शाब्दबोधे श्रवणेनोपस्थापितस्तात्पर्यवशात् । नामधेयान्वये च न विभक्त्यर्थो द्वारम् । तेन मत्वर्थलक्षणामन्तरेणैव ज्योतिष्टोमनामकेनेत्यन्वयलाभः । तथा च कविप्रयोगः—'हिमालयो नाम नगाधिराजः' इति । हिमालयनामवानित्यर्थः । एवमिह 'प्रभिन्नकमलोदरे मधूनि मधुकरः पिबती'त्यादावगृहीतसङ्गतिकैकपदवति वाक्ये मधुकरादिपदं स्वरूपेणैव भासते, नामधेयवन्नाऽर्थमुपस्थापयति प्रागगृहीतसङ्गतिकत्वात् । अत एव मधुकरशब्दवाच्य इत्यपि लक्षणया नाऽन्वयः, शक्यज्ञानपूर्वकत्वाल्लक्ष्यज्ञानस्य । स्वरूपतस्तु शब्दो भासते, वाच्यवाचकसम्बन्धः पश्चात्कल्प्यते संसर्गनिर्वाहायेति । तदयं वाक्यार्थः—ज्योतिष्टोमनाम्ना यागेन स्वर्गमिष्टं भावयेदिति ।

कथमित्यपेक्षायां श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यासंज्ञकैः षट्प्रमाणैः सन्निपत्योपकारकावघातप्रोक्षणाद्यङ्गजातैः, तथा आरादुपकारकप्रयाजानूयाजाद्यङ्गजातैः पूरणेन, तथा विकृतौ प्रकृतिवदित्युपबन्धेन, नित्ये यथाशक्तीत्युपबन्धेन, मुख्यालाभे प्रतिनिधिं कृत्वाऽपीति यावन्न्यायलभ्यं तत्पूरणम् । एवञ्च यागस्य स्वर्गावच्छिन्नभावनाकरणत्वेन स्वर्गकरणत्वम्, करणत्वेन च साक्षात्कर्तृव्यापारविषयत्व-

रूपं कृतिसाध्यत्वं श्रुत्यर्थाभ्यां लभ्यत इति तदुभयमपि न लिङा-दिपदवाच्यम्, अप्राप्ते शास्त्रमर्थवदिति न्यायात्। अनन्वयाच्च इष्टसाधन-मिति समासे गुणभूतमिष्टपदं स्वर्गकाम इति समासान्तरगुणभूतेन स्वर्ग-पदेन कथमन्वियात् इष्टस्वर्गसाधनमिति। न हि राजपुरुषो वीरपुत्र इत्यत्र वीरपदराजपदयोरन्वयोऽस्ति, पदार्थः पदार्थेनाऽन्वेति, न तु पदार्थैक-देशेनेति न्यायात्। करणविभक्त्यन्तज्योतिष्टोमादिनामधेयानन्वयप्रसङ्गा-दिदोषाश्चाऽस्मिन्पक्षे द्रष्टव्याः। एतेनेष्टसाधनत्वं अनिष्टसाधनत्वं कृति-साध्यत्वमिति त्रयमपि विध्यर्थमित्यपास्तम्, अतिगौरवात्, अर्थवादानां सर्वथा वैयर्थ्यापत्तेश्च। अत एव कृतिसाध्यत्वमात्रं विध्यर्थ इत्यपि न, भावनाकरणत्वेनाऽर्थलभ्यत्वादित्युक्तेः। अलौकिको नियोगस्त्वलौकिक-त्वादेव न विध्यर्थः, पराक्रान्तश्चाऽत्र सूरिभिः। तस्मादन्यलभ्या लघुभूता च प्रेरणैव लिङादिपदवाच्येति स्थितम्। प्रवर्तकं तु ज्ञानं वाक्यार्थम-र्यादालभ्यमन्यदेव सर्वेषामपि वादिनाम्। आख्यातार्थ एव च विशेष्य-तया भासते, न धात्वर्थः, न नामार्थः स्वर्गकामो वेति चोक्तप्रायमेव। एतेन च यागानुकूलकृतिमान् स्वर्गकाम इति तार्किकमतं पुरुषविशेष्य-कवाक्यार्थज्ञानमप्यपास्तम्। तस्माच्छब्दकर्तृकतद्विशिष्टज्ञानकरणिकपुंप्र-यत्नसाध्यकप्रवर्तना शाब्दी भावना लिङर्थः। स्वर्गकामकर्तृकस्वर्गफलक-यागविषयकप्रवृत्तिरार्थी भावना आख्यातार्थ इति निर्णयः।

## ( आर्थी भावना )

अथ पुनरार्थीभावनां निरुक्तिपूर्वकं प्रश्नपूर्वकञ्च विविच्य प्रदर्शयिष्या-मः—तत्र तावदाख्यातलक्ष्यकर्तृरूपार्थनिष्ठो धर्मविशेष आर्थी भावना। आख्या-तवाच्या तु भावनैव कर्तारं विनाऽनुपपन्ना तमाक्षिपतीति स्थितम्। अत एव यजेतेत्याख्याताभिहितसंख्याया भावनाङ्गत्वं समानाभिधानश्रुतेः। पदश्रुत्या च यागाङ्गत्वम, अमूर्तस्याऽप्येकत्वस्य कर्तृपरिच्छेदद्वारा तदु-पपत्तेः। यद्यपि भावना कारकान्तरणाऽपि सम्बद्धा तान्यप्याक्षिपति, तथाऽ-पि तिष्ठतीत्यादिषु दया तदनाक्षेपात्प्रथमं सा कर्तारमेवाऽऽक्षिपतीति न सं

स्या कारकान्तरेण सम्बध्यते, किन्तु कर्त्रैव । अतः प्रथमोपस्थितेः कर्त्रैवाऽऽख्यातार्थे इत्यर्थनिष्ठा प्रवृत्तिरार्थी भावना आख्यातांशेनोच्यते ।

ननु केयमार्थी भावना ? कर्तृव्यापार इति चेन्न; यागादेरपि तद्व्यापारत्वेन भावनात्वोपपत्तेः । न चेष्टापत्तिः, तस्य प्रकृत्यर्थत्वेन प्रत्ययार्थत्वाभावादिति चेत्—

## ( आर्थीभावनायां न्यायसुधाकारमतम् )

अत्राऽऽहुः—सत्यं न यागो भावना, किन्तु स्वर्गेच्छाविषयोपजनितो यागे यः प्रयत्नः, सा भावना । स एव चाऽऽख्यातांशेनोच्यते । यजेतेत्यत्राऽऽख्यातश्रवणेन तादृशप्रतीतेर्जायमानत्वात् । यश्च प्रयत्नपूर्वकं गमनादिकं करोति, तस्मिन् देवदत्तो गमनं करोतीति करोतिप्रयोगदर्शनात् । वातादिना स्पन्दमाने तु नाऽयं करोति, किन्तु वातादिना स्पन्दो जायत इति प्रयोगात् । करोत्यर्थस्तावत्प्रयत्नः । करोतिसामानाधिकरण्यञ्चाऽऽख्याते दृश्यते । यजेत–यागेन कुर्यात्, पचति–पाकं करोति, गच्छति–गमनं करोतीति । अतश्च करोतिसामानाधिकरण्यात्प्रयत्नस्य आख्यातवाच्यत्वम् । न च रथो गच्छतीति प्रयोगानुपपत्तिः, रथे यत्नाभावादिति वाच्यम् । वोढृश्वगतं प्रयत्नं रथे आरोप्य प्रयोगोपपत्तेः । यन्मतेऽपि अन्योत्पादानुकूलव्यापारसामान्यं भावना, तन्मतेऽपि रथे गमनातिरिक्तव्यापारानुपलब्धेः, रथो गच्छतीति प्रयोगस्यौपचारिकत्वमेवेति । अतश्च प्रयत्न एव आर्थी भावना । यथाऽऽहुः—

'प्रयत्नव्यतिरिक्तार्थभावना तु न शक्यते ।
वक्तुमाख्यातवाच्येह प्रस्तुतेत्युपरम्यते' ॥ इति ॥

## ( पार्थसारथिमिश्रमतम् )

अन्ये त्वाहुः—भवितुर्भवनानुकूलो भावकव्यापारस्तावद्भावना । यस्मिन् व्यापारे कृते करणफलोत्पादनाय समर्थं भवति तादृशो व्यापार इति यावत् । स एव चाऽऽख्यातार्थः । कुठारेण छिनत्तीत्याख्यातश्रवणे हि भवत्येतादृशी मतिः—कुठारेण तथा व्याप्रियेत यस्मिन् व्यापारे

कृते कुठाराच्छेदनं भवतीति। एवं 'यजेत स्वर्गकामः' इत्यस्याऽयमर्थः--यागेन तथा व्याप्रियेत, यस्मिन् व्यापारे कृते यागात्स्वर्गो भवतीति। स च व्यापारः क्वचिदुद्यमननिपतनादिः, क्वचिच्चाऽन्न्यन्वाधानादिर्ब्राह्मणतर्पणान्तः कथंभावाकाङ्क्षायां विशेषरूपेण पश्चादवगम्यते। अन्योत्पादनानुकूलत्वेन सामान्यतस्त्वाख्यातादेव। रथो ग्रामं गच्छतीत्यत्राऽऽख्यातेन ग्रामप्राप्त्यनुकूलो व्यापार एव प्रतीयते—रथस्तथा गमनेन व्याप्रियते, यस्मिन् व्यापारे कृते गमनाद्ग्रामप्राप्तिर्भवतीति प्रतीतेः। न त्वत्र गमनमात्रमाख्यातार्थः, तस्य धातुनोक्तत्वात्। तत्र कोऽसौ व्यापार इत्यपेक्षायां पूर्वोत्तरावान्तरदेशविभजनसंयोजनरूप इति पश्चादवगम्यते। पूर्वेण प्रदेशेन विभज्योत्तरेण संयुज्य रथो गच्छतीति प्रयोगात्, उद्यम्य निपात्य कुठारेण छिनत्तीतिवत्। एवं देवदत्तः प्रयतत इत्यत्राऽपि देवदत्तस्तथा व्याप्रियते, यथा प्रयत्नो भवतीति प्रयत्नानुकूलव्यापार एवाऽऽख्यातार्थो न तु प्रयत्नः, तस्य धातुनोक्तत्वात्। व्यापारविशेषापेक्षायां चेच्छादिः पश्चादवगम्यते, उद्यमननिपतनवत्। तथा च सर्वत्राऽनुगतत्वादन्योत्पादानुकूलव्यापारसामान्यमेवाऽऽख्यातार्थः, न तु प्रयत्नमात्रम्, रथो गच्छति, देवदत्तः प्रयतत इत्यादिषु तदभावात्। न चाऽत्रौपचारिकत्वं वक्तुं युक्तम्, मुख्ये सम्भवति तस्याऽन्याय्यत्वात्। करोत्यर्थोऽप्यन्योत्पादनानुकूलो व्यापार एव, न प्रयत्नमात्रम्, करोतेश्चेतनाचेतनकर्तृकाख्यातसामानाधिकरण्यादिति। तत्सिद्धमन्योत्पादानुकूलो व्यापार आर्थी भावनेति। सैव च यजेतेत्यत्राऽऽख्यातांशेनोच्यते—भावयेदिति। तस्याश्च भाव्याकाङ्क्षायां स्वर्गादिर्भाव्यत्वेन सम्बध्यते। करणाकाङ्क्षायां यागादिः करणत्वेन सम्बध्यते। प्रयाजादय इतिकर्तव्यतात्वेन। तत्सिद्धमाख्यातलिङ्त्वाभ्यां भावनैवोच्यत इति।

सा च चोदनाख्या वेदपुरुषस्य नारायणाख्यस्य सर्वप्रकाशिका पराशक्तिः, तया यजेत, तदेतत्कुरु, कर्तव्यं इत्यादिरूपया स्वर्गाद्युद्देशेन यागादिविधानात्सिद्धं यागादेर्धर्मत्वम्। यागो नाम यज्ञ एव द्रव्यदेवता-

स्मा । तथा चोक्तम्–(१)'यज्ञं व्याख्यास्यामः' 'द्रव्यं देवता त्यागः' इति कल्पकारैः । 'देवतोद्देशेन द्रव्यत्यागो यज्ञ' इति निरुक्तश्च । स च पुनर्द्विविधः । तत्र यजतिना चोदितो यागः, जुहोतिना चोदितो होम इति । तत्र (२)'तिष्ठद्धोमा वषट्कारप्रयोगान्ता याज्यापुरोनुवाक्यावन्तो यजतयः' 'उपविष्टहोमाः स्वाहाकारप्रयोगान्ता याज्यापुरोनुवाक्यारहिता जुहोतय' इति च ।

स च विष्णुः 'परमो यज्ञो वै विष्णु'रिति श्रुतेः । सोऽयं वेदबोधितो धर्मो यदुद्देशेन विहितस्तदुद्देशेन क्रियमाणस्तद्धेतुर्भवति । परमेश्वरार्पणबुध्या क्रियमाणस्तु ज्ञानप्रतिबन्धकसर्वपापनिवृत्तिद्वारा मोक्षहेतुरेव भवतीति सर्वं शिवम् ।

भवन्तीं भवशक्तिं तां भवानीं भवनाशिनीम् ।
भावनां भावयेद्यस्तु स भावो न भवेद्भवे ॥

पूर्वाचार्यैः मतं भाट्टं विस्तरेणोपवर्णितम् ।
मया तदेवोपचितं सारतो मतिशुद्धये ॥

ज्ञानक्रियाशक्तिरूपभावनाद्वयमण्डितम् ।
वन्दे वेदं धर्मसारं सुहृदं हृदि साक्षिणम् ॥

येषां सतां सुपदवीमनुनीय नूनं
सद्यो निबन्धकरणे कुशलोऽहमस्मि ।
तानानमामि ननु नौमि हरिं हरं मां
काशीं शिवां शिवसुतं द्युमणिं च गङ्गाम् ॥

वेदप्रकाशकमलं कमलायाः पदाम्बुजे ।
प्रीत्या समर्पितं नत्वा तेन तुष्यतु तत्सदोम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामकृष्णानन्दतीर्थपादकिङ्कर-श्रीसत्यज्ञानानन्दतीर्थयतिना विरचिते वेदप्रकाशे भावनाभेदनिरूपणाख्यं तृतीयं प्रकरणं समाप्तम् ॥

॥ समाप्तश्चायं वेदप्रकाशः ॥

॥ शुभमस्तु ॥

---

१. का. श्रौ. १. २. १.　　　　२. का. श्रौ. १. २. ६.

# अस्मत् प्रकाशित मीमांसाशास्त्रग्रन्थाः ।

१ मीमांसाश्लोकवार्त्तिकम् । भट्टकुमारिलविरचितम् । श्रीपार्थसारथिमिश्रकृतन्या-
यरत्नाकराख्यया व्याख्यया सहितम् । सम्पूर्णम् । रु० १५-०

२ भाट्टचिन्तामणिः । म.म. श्रीगागाभट्टेति प्रसिद्धश्रीविश्वेश्वरभट्टविरचितः । रु० ३-०

३ न्यायरत्नमाला । श्रीमत्पार्थसारथिमिश्रविनिर्मिता । सम्पूर्णा । रु० ३-०

४ विधिरसायनम् । श्रीमदप्पय्यदीक्षितविरचितं सम्पूर्णम् । रु० ३-०

५ न्यायसुधा । अयं तन्त्रवार्त्तिकव्याख्या श्रीमद्भट्टसोमेश्वरकृता । रु० २४-०

६ मीमांसाबालप्रकाशः । सूत्रद्वादशाध्यायानां प्रतिपाद्यनिरूपको ग्रन्थः सम्पूर्णः
श्रीभट्टशङ्करविरचितः । रु० ३-०

७ प्रकरणपञ्चिका । म. म. श्रीशालिकनाथमिश्रविरचिता । प्रभाकरमतानुसारि-
मीमांसादर्शनं, सम्पूर्णम् । रु० ५-०

८ शास्त्रदीपिका । श्रीपार्थसारथिमिश्रप्रणीता । पण्डितप्रवररामकृष्णविरचितयुक्ति-
स्नेहप्रपूरण्याख्यव्याख्यया सहिता । तर्कपादः । रु० १-८

९ पूर्वमीमांसाधिकरणकौमुदी । म.म. पण्डितरामकृष्णभट्टाचार्य विरचिता । रु० १-८

१० मीमांसाकौस्तुभः । श्रीखण्डदेवविरचितः प्रथमाध्यायस्य तृतीयचतुर्थपादात्मको-
भागः । रु० ४-८

११ ,, द्वितीयाध्यायस्य तृतीयचतुर्थौ पादौ, तृतीयाध्यायस्य प्रथमद्वितीय
तृतीयपादात्मकोऽयं भागः । रु० ६-०

१२ ,, प्रथमाध्यायस्य द्वितीयपादः, द्वितीयाध्यायस्य प्रथमद्वितीयपादात्मकोऽयं
भागः । रु० ७-८

१३ मीमांसानुक्रमणिका । श्रीमण्डनमिश्रकृता । म. म. डा० पं० गङ्गानाथझा-
शर्मणा मैथिलेन रचितेन मीमांसामण्डनेन मण्डिता । अस्य अध्ययनेन अधि-
करणन्यायमालायां शीघ्रतया प्रवेशो भवति । मीमांसाध्येतॄणां प्रथमतः प्रवेशे
इयमतीवोपयोगिनी सम्पूर्णा । रु० ७-८

१४ बृहती । प्रभाकरमिश्रविरचिता । [ शाबरभाष्यव्याख्या ] म. म. मिश्र-
शालिकनाथविरचितया ऋजुविमलया विभूषिता । प्रथमाध्यायस्य प्रथमः
पादः समाप्तः । रु० ४-८

१५ तन्त्रवार्त्तिकावशेषः टुप्टीका । श्रीमत्कुमारिलभट्टपाद विरचिता । श्रीशबरस्वा-
मीभाष्यचतुर्थाध्यायप्रथमपादाद् द्वादशाध्यायपर्यन्तम् व्याख्यानरूपम् । रु० ६-०

१६ अर्थसंग्रहः । पूर्वमीमांसासारसंग्रहरूपः । श्रीलौगाक्षिभास्करविरचितः । श्रीरामे-
श्वरशिवयोगिभिक्षुविरचित मीमांसार्थकौमुद्याख्यया व्याख्यासहितः । रु० ०-१४

१७ मीमांसान्यायप्रकाशः [ आपदेवीयः ] श्रीचिन्नस्वामिशास्त्रिकृतयासारविवेचि-
न्या व्याख्यया सहितः । रु० २-०

१८ मीमांसान्यायप्रकाशः ,, भाट्टालङ्काराख्यव्याख्यासहितः । रु० २-८

१९ मीमांसादर्शनम् । श्रीशबरस्वामिविरचित भाष्यसहितम् संपूर्णम् । रु० १०-०

२० अधिकरणकौमुदी । श्रीदेवनाथठक्कुर कृता । रु० १-०

२१ मीमांसापरिभाषा । श्रीकृष्णयज्वकृता । म. म. पर्वतीय पण्डित नित्यानन्द-
पन्तेन विरचितया लघुटिप्पण्या सहिता । रु० ०-२

२२ मीमांसासूत्रपाठः । श्रीमन्महर्षिजैमिनिमहामुनीप्रणीतः । रु० ०-६

२३ भाट्टभाषाप्रकाशः । श्रीनारायणतीर्थमुनि विरचितः । रु० ०-१०

प्राप्तिस्थानम्-चौखम्बा संस्कृत पुस्तकालय, बनारस सिटी ।

७१ ब्रह्मसूत्रशाङ्करभाष्यम् । चतुःसूत्र्यन्त पूर्णानन्दीय व्याख्या सहितया श्रीगोविन्दानन्द प्रणीतया रत्नप्रभया समन्वितम् । सम्पूर्णम् । [ वेदान्तविभागे ९ ] रु० ५—०

७२ सिद्धान्तशिरोमणिः । श्रीभास्कराचार्य विरचितः । वासनाभाष्य सहितः ज्योतिषाचार्य म०म० श्री ६ मद्बापूदेवशास्त्रिकृतटिप्पणी सहितः । "गणिताध्यायः" । रु० २—० "गोलाध्यायः" । रु० २—० [ ज्यो० वि० ४ ] सम्पूर्ण रु० ४—०

७३ काकचण्डीश्वरकल्पतन्त्रम् । पण्डित रामकृष्ण शर्म्मणा सम्पादितम् । पण्डित बटुकनाथ शर्म्मा एम. ए. साहित्योपाध्याय इत्येतेन लिखितया प्रस्तावनया सनाथीकृतम् । [ आयुर्वेद शास्त्रविभागे १ ] रु० ०—८

७४ किरातार्जुनीयम् । श्रीमत्कविकुलचूडामणिभारविविरचितम् मल्लिनाथसूरिकृतया घण्टापथसमाख्यव्याख्यया तथा पं० श्रीगङ्गाधरशर्मणा कृतया सुधाऽऽख्यव्याख्यया समलङ्कृतम् । [ सर्गत्रयमात्रम् ] । [ काव्य वि० १० ] रु० ०—१२

७५ चन्द्रालोकः । पीयूषवर्षश्रीजयदेवकवि प्रणीतः । श्रीमत्पद्मनाभमिश्रापराभिधान प्रद्योतनभट्टाचार्य विरचितया चन्द्रालोकप्रकाशापराख्य 'शरदागम' टीकया सङ्कलितः । साहित्याचार्येण खिस्ते इत्युपाख्यनारायणशास्त्रिणा भूमिकादिभिः सम्भूष्य सम्पादितः । [ अलङ्कार वि० ३ ] रु० ०—१२

७६ किरातार्जुनीयम् । श्रीमत्कविकुलचूडामणिभारविविरचितम् । मल्लिनाथसूरिकृतया घण्टापथसमाख्यया तथा पं० श्रीकनकलालशर्मणा कृतया भावार्थदीपिनीव्याख्यया समलङ्कृतम् । [ सर्गत्रयमात्रम् ] [ काव्य वि० ११ ] रु० ०—१

७७ शक्तिवादः, श्रीगदाधरभट्टाचार्यप्रणीतः, पण्डितप्रवरश्रीहरिनाथतर्कसिद्धान्तभट्टाचार्यविरचितविवृतिसहितः । [ न्यायविभागे ० ] रु० ३—०

७८ माथुरीपञ्चलक्षणी । पं श्रीउमानाथज्यौलकृतव्याख्या सहिता तथा माथुरीसिंहव्याघ्रलक्षणम् । पं० श्रीहरिरामशुक्ल विरचितया व्याख्यया सहितं तथा पं० श्रीहरिहरशास्त्रि सङ्कलित माथुरीपञ्चलक्षणी क्रोडपत्रेण च । [न्याय वि० ११] रु० ०—१

७९ रसाध्यायः । टीकया संवलितः । [ आयुर्वेदशास्त्र वि० २ ] रु० ०—

८० (१) पाणिनिव्याकरणे वादरत्नम् । न्यायव्याकरणाचार्य मीमांसक शिरोमणि पं० सूर्यनारायणशुक्लेन विरचितम् । ( तत्र च न्यास परिष्कारपरिशिष्ट भेदेन प्रकरणत्रयम् यत्र पञ्चन्यून सार्धशतसूत्रेषु १४५ महताटोपेन न्यासाविचारताः तत्र प्रथमं प्रकरणं मुद्रितं प्रथमो भागः । [ व्या० वि १० ] रु० १—

८० (२) पाणिनीव्याकरणे वादरत्नम् । द्वितीयोभागः [ व्या० वि० ] रु० १—

८१ गणितकौमुदी । [ हिन्दीभाषाटीकासहिता ] प्रथमापरीक्षापाठ्यनिर्द्धारितगणितसंग्रहपुस्तकम् । [ गणितविभागे १ ] रु० ०—

८२ छन्दः कौमुदी । [ हिन्दीभाषाटीकासहिता ] प्रथमापरीक्षापाठ्यनिर्द्धारितछन्दसंग्रहपुस्तकम् । [ छन्दोविभागे ३ ] रु० ०—

८३ योगदर्शनम् । महर्षिप्रवरपतञ्जलिप्रणीतम् । तत्र ( १ ) भोजवृत्तिः, [ २ ] भावागणेशवृत्तिः, [३] नागोजीभट्टवृत्तिः, [४] मणिप्रभा, [५] योगचन्द्रिका, [६] योगसुधाकराख्य टीका षट्कसमेतम् । सटिप्पण । [ योग० विभागे १ ] रु० २—

८४ रघुवंशमहाकाव्यम् । श्रीकालिदासविरचितम् म० म० मल्लिनाथकृत सञ्जीविनीटीका तथा परीक्षोपयोगि सुधाऽऽख्यव्याख्या सहितः। १ से ४ सर्गः मूल्यम् रु० १-४-० तथा १ से ५ सर्गः रु० १—८ तथा ६ से १० सर्गः । रु० १—

८५ योगदर्शनम् । पं० श्रीबलदेवमिश्रकृत योगसूत्रप्रदीपिकाख्यव्याख्यया सहितम् । सटिप्पण । [ योग वि० २ ] १—

८६ काव्यमीमांसा । राजशेखरविरचिता । साहित्याचार्य पं० श्रीनारायणशास्त्रि खिस्ते कृत काव्यमीमांसा—चन्द्रिका टीका सहित [ १ से ५ अध्याय ] प्रथमो भागः। [ काव्यविभागे १३ ] रु० ०—

८७ नागानन्दनाटकम् । श्रीहर्षदेवप्रणीतम् । काशीविश्वविद्यालयाध्यापकेन एम० ए० साहित्याचार्य पण्डित श्री बलदेव उपाध्यायेन स्वप्रणीतया भावार्थदीपिकाख्यया व्याख्यया समलङ्कृत्य बृहत् भूमिका हिन्दीभाषानुवादादिभिः सनाथीकृत्य सम्पादितम् । [ नाटक विभागे १ ] रु० १—८

८८ मेघदूतकाव्यम् । महाकवि श्रीकालीदास विरचितम् । मल्लिनाथकृत सञ्जीविन्या, चारित्रवर्द्धनाचार्य विरचित चारित्रवर्द्धिन्या तथा साहित्याचार्य पं० श्री नारायण शास्त्री खिस्तेकृत भावप्रबोधिनीव्याख्यया टिप्पण्या च सहितम् । [काव्य० १४] रु० ०—८

८९ जागदीशीव्यधिकरणम् । न्यायाचार्यश्रीशिवदत्तमिश्रविरचित गंगाख्यव्याख्या टिप्पणी सहितम् । ( न्यायविभागे १२ ) रु० २—०

९० काव्यकल्पलतावृत्तिः । श्रीअमरचन्द्रयतिनिर्मिता अरिसिंहकृतसूत्रसहिता । ( अलङ्कारविभागे ४ ) रु० १—४

९१ वैयाकरणसिद्धान्तचन्द्रिका । श्रीरामाश्रमप्रणीता । श्रीसदानन्दकृत-सुबोधिन्या, श्रीलोकेशकरकृत-तत्त्वदीपिकया व्याख्यया च सहिता । पं० श्रीनवकिशोरशास्त्रिणा-निर्मितया चक्रधराख्य महत्या टिप्पण्या अव्ययार्थमालया लिङ्गानुशासनप्रक्रियया उणादिकोषेण च सहिता । (व्या० वि० ११) पूर्वार्द्धम् । रु० २—८ उत्तरार्द्ध । रु० २—

९२ त्रिपुरारहस्यम् ( महात्म्यखण्डम् ) साङ्ख्ययोगशास्त्राचार्य श्रीमुकुन्दलाल शास्त्रिणा संशोधितम् । साहित्याचार्य खिस्ते-इत्युपाख्य पं० श्रीनारायणशास्त्रिणा निबद्धाभ्यां भूमिकाऽध्यायानुक्रमणिकाभ्यां च सहितम्।(पुराणेतिहास वि०१) रु० ६—०

९३ आपस्तम्बधर्मसूत्रम् । श्रीमद्धरदत्तमिश्र विरचितया उज्ज्वलाख्यया वृत्त्या संवलितम् । ( कर्मकाण्डविभागे ७ ) रु० ४—०

९४ अवच्छेदकत्वनिरुक्तिः । श्रीजगदीशतर्कालङ्कारकृताः । न्यायाचार्य श्रीशिवदत्त-मिश्रविरचित गंगाख्यव्याख्या टिप्पणी सहितः । ( न्याय वि० १३) रु० १—४

९५ संस्कारदीपकः । म० म० पण्डित श्रीनित्यानन्दपन्त पर्वतीयविरचितः । संपूर्णः । ( कर्मकाण्ड वि० ८ ) रु० ८—०

९६ वर्षकृत्यदीपकः । कालनिर्णयव्रतोद्यापनसहितः । म० म० पं० नित्यानन्दपन्त-पर्वतीय विरचितः । ( कर्मकाण्ड वि० ९ ) रु० ३—८

९७ श्रौतसूत्रम् । श्रीमन्महर्षि-लाट्यायनप्रणीतमग्निष्टोमान्तम् । (कर्म० वि० १०) रु० २—०

९८ नलचम्पूः अथवा दमयन्तीकथा । महाकविश्रीत्रिविक्रमभट्ट विरचिता । विषमपद-प्रकाशाख्यव्याख्यया सहिता । भावबोधिनी टिप्पणी सहिता । (का० वि०१६) रु० १-४

९९ श्रीब्रह्मसूत्रम् । श्रीभगवन्निम्बार्क महामुनीन्द्रविरचित वेदान्तपारिजात सौरभा-ख्यसूत्रवाक्यार्थेन श्रीश्रीनिवासाचार्यचरणप्रणीत श्रीवेदान्तकौस्तुभभाष्येन च सनाथीकृतम् । ( श्रीनिम्बार्कभाष्यम् ) ( वेदान्त वि० १० ) रु० ३—०

१०० वाग्वल्लभः । सर्वथाऽपि नवीनोऽपूर्वः प्रौढः परमोपयोगितया नियतमुपादेयतमश्छ-न्दोनिबन्धः, श्रीमता देवशाप्रेसरणागममामिकेण कविपुङ्गवेन दुःखभञ्जनविदुषा विरचितः, तत्सुतेन बहुशास्त्रपारगेण कविचक्रवर्तिना महामहोपाध्यायेन देवीप्रसाद-पण्डितप्रवरेण कृतया वरवर्णिन्या टीकयोपस्कृतः । ( छन्दः शास्त्र वि० ४) रु० २—८

१०१ सिद्धान्तलक्षणम् । श्रीजगदीशतर्कालङ्कारकृतम् । न्यायाचार्य श्रीशिवदत्तमिश्र-विरचित गंगाख्यव्याख्या टिप्पणी सहितम् । (न्याय विभागे १४) ) रु० १—८

१०२ वेदभाष्यभूमिकासंग्रहः । ( सायणाचार्यविरचितानां स्ववेदभाष्यभूमिकानां संग्रहः ) । [ वेद० वि० ८ ] रु० २-८

प्राप्तिस्थानम्--चौखम्बा संस्कृत पुस्तकालय, बनारस सिटी ।